Oriental Research Institute Series No. 191
University of Mysore
प्राच्यविद्यासंशोधनालयग्रन्थमाला - १९१
मैसूरु विश्वविद्यानिलयः

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

Critically edited by
Vidwan A. V. Nagasampige M.A.

Oriental Research Institute, Mysore
2000

Price: 38=00

Oriental Research Institute Series No. 191
University of Mysore
प्राच्यविद्यासंशोधनालयग्रन्थमाला - १९१
मैसूरु विश्वविद्यानिलयः

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

Critically edited by
Vidwan A. V. Nagasampige M.A.

Oriental Research Institute, Mysore
2000

Price: 38=00

First Edition - 2000

Sponsored by
Sri 1008 Sri Satyatmatirtha Swamiji
Uttaradimatha, Bangalore

Copies: 1000

Published by
The Director,
Oriental Research Institute
University of Mysore
Mysore-570 005

Printed by
Bhavana Printers
Kuvempunagar, Mysore-570 004

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

प्रधानसम्पादकः

डा. के. वि. रमेशः

गौरवनिर्देशकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः, मैसूरु

२०००

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

General Editor

Dr. K. V. Ramesh

Honorary Director

Oriental Research Institute, Mysore

2000

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

सम्पादकः

विद्वान् ए. वि. नागसम्पिगे एम्.ए.

न्याय-वेदान्तविद्वान्

संशोधकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः, मैसूरु

२०००

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

Critically edited by

Vidwan A. V. Nagasampige M.A.
Nyaya-Vedanta Vidwan
Research Assistant
Oriental Research Institute, Mysore

Oriental Research Institute, Mysore
2000

PREFACE

It gives me great pleasure to present two hitherto unpublished works viz., The Oṃkāravāda of Śrī Vidyādhīśatīrtha Swamiji of Uttaradimatha and the Tārasvarūpaprakāśa of Śrī Hulagi Śrīnāthācārya. Both these works are very valuable for scholars interested in understanding the nuances of the Dvaita system of philosophy.

These two works prove with elaborate quotations and arguments that the sacred syllable 'Om' is a part of the first Brahmasūtra, just as the word 'Atha'. The two venerated authors have discussed many theories and views regarding the meaning and significance of 'Om'. There is no doubt that these two works occupy a high place among the works of the Madhva Vedanta system.

Vidwan Sri. Nagasampige, a Senior Research Assistant of our Institute, is an out-standing scholar in the field of Dvaita philosophy. He has many works to his credit in addition to numerous translations of Dvaita Works. He has edited the two works mentioned above with the help of four manuscripts. I trust these two works will be received by interested scholars with warmth.

Sri Śri Satyatma Tirtha Swamiji, the present pontiff of Śri Uttaradi Matha, is a scholar of very high standard in many branches of learning. He has very generously extended financial support for the publication of these two works. The Oriental Research Institute records its sincere gratitude to the holy feet of Śri Śri Satyatma Tirtha Swamiji.

I acknowledge the help extended by our Vice-Chancellor Prof. S.N. Hegde for the publication of Sanskrit classics. My thanks are due to the Registrar Prof. V.G.Talwar and Finance Officer Sri Mahadevaswamy for their co-operation. Our gratitude is due to M/s Bhavana Printers for their neat work.

Dr. K. V. Ramesh
Hon. Director
O.R.I. Mysore

प्राङ्निवेदनम्

महदिदं प्रमोदस्थानं यत् प्राच्यविद्यासंशोधनालयग्रन्थमालायाः एकनवत्युत्तरशततमं (191) पुष्पं विकसतीदानीमिति ।

ग्रन्थप्रकाशनमेवास्याः संस्थायाः प्रधानं कर्म इति निश्चप्रचम् । भारते वर्षे तत्र तत्र सञ्चार्य ग्रन्थाः सङ्गृह्यन्ते । सङ्गृहीताश्च संशोध्यन्ते, प्रकाश्यन्ते विक्रीयन्ते च ।

सन्ति चात्र एकादशसंख्याकाः संशोधकाः नानाशास्त्रविशारदाः संशोधनकर्मणि निरताः । तेषु अन्यतमः श्री आनन्दतीर्थनागसम्पिगे महोदयः ग्रन्थस्यास्य सम्पादकः ।

अत्र ग्रन्थद्वयं सम्पादितं वर्तते । एकः ओङ्कारवादः, स च श्रीविद्याधीशतीर्थविरचितः । अन्यः तारस्वरूपप्रकाशः, स च श्री श्रीनाथाचार्यविरचितः ।

वेदान्तोदयः "द्वापरे सर्वत्र ज्ञान आकुलीभूते ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान्नारायणः व्यासत्वेन अवततार"। अवतीर्य च वेदविभागमकरोत् ।

ऋग्वेदादिवेदविभागकरणेन तस्य वेदव्यास इति नाम अन्वर्थमासीत् । ततः वेदार्थनिर्णयाय ब्रह्मसूत्राणि चकार ।

वेदव्यासकृतब्रह्मसूत्राणि अधिकृत्य कालक्रमेण एकविंशतिभाष्याकाराः स्वस्वमतानुसारेण भाष्याणि अलिखन् । द्वाविंशो भाष्यकारः श्रीमदानन्दतीर्थभगवत्पादाचार्यः । तेन कृतं यत् ब्रह्मसूत्रभाष्यं तदधिकृत्य टीकाटिप्पणीकाराः बहवः वर्तन्ते । एवं वेदव्यासादारभ्य अद्यावधि वेदान्तप्रवाहः सुष्ठु प्रवहन् विराजते ।

ओङ्कारवादः - वेदव्यासेन रचितेषु ब्रह्मसूत्रेषु आदिमं सूत्रम् "अथातो ब्रह्मजिज्ञासा" इति । द्वैतवेदान्तानुसारेण "ओम् अथातो ब्रह्मजिज्ञासा" इति आदिमं सूत्रम् । अत्र आदौ विद्यमानः ओङ्कारः सूत्रावयवो वा न वेति महान् वाक्यार्थः शास्त्रकारैः कृतो वर्तते । अपि च "स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यत" इति प्रमाणानुसारेण आद्यन्तयोः ओङ्कारोच्चारणे सति "ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्" इति आदिमं सूत्रं सम्पन्नं भवति ।

"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" । "तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्" "सर्वस्य प्रणवो ह्यादिः मध्यमन्तस्तथैव च" । "सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तास्मात् प्राथमिकौ क्रमात् तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः" इत्यादि श्रुतिस्मृतिरूपप्रमाणानुरोधेन सर्वेषां सूत्राणाम् आद्यन्तयोः ओङ्कारोच्चारणं प्रसज्यते । तथा च प्रथमसूत्रे ओङ्कारत्रयम् इति एकः पक्षः । एकस्यैवोङ्कारस्य दृष्टादृष्टोभयफलकत्वेन द्वावोङ्काराविर्त्यपरः पक्षः । अयमेव विषयः सप्रमाणं सविमर्शं ग्रन्थेऽत्र महानुभावैः श्री श्री विद्याधीशतीर्थभट्टारकैः न्यायव्याकरणमीमांसावेदान्तचतुरैः सम्यक् प्रतिपादितो वर्तते ।

तारस्वरूपप्रकाशः - "ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्" "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" । इति प्रमाणानुरोधेन "ओम् अथ" इति सूत्रारम्भे विद्यमानः एकः ओङ्कारः सूत्रावयवः । स्रवत्यनोङ्कृतम् इति प्रमाणानुरोधेन आद्यन्तयोः ओङ्कारद्वयं, तथा च "ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्" इति आद्यसूत्रे ओङ्कारत्रयम्। द्वितीयादिसूत्रेषु तु स्रवणविशरणाभावसम्पादकतया आद्यन्तयोः ओङ्कारद्वयम् इति अयं

विषयः सुविस्तृततया सप्रमाणतया सविमर्शं पाण्डित्यपूर्णया शैल्याऽस्मिन् ग्रन्थे सुस्पष्टं निरूपितः । ग्रन्थस्यास्य कर्ता श्री श्रीनाथाचार्यः । स च न्यायव्याकरणवेदान्त- मीमांसादिशास्त्रेषु प्राप्तप्रावीण्यः । द्वैतद्युमणिकार इत्येव प्रसिद्धश्च ।

ओङ्कारविषये अयं वाक्यार्थप्रवाहः विद्वज्जनेषु तत्र तत्र प्रचलति। तादृशवाक्यार्थविषये मार्गदर्शकौ एतौ ग्रन्थौ, प्राच्यविद्यासंशोधनालयस्य संशोधकेन विदुषा आनन्दतीर्थनागसम्पिगे महोदयेन सुष्ठु संशोधितौ अध्येतृजनेभ्यः अर्पितौ च । स च सम्पादकः सम्पिगे महोदयः न्यायशास्त्रे वेदान्तशास्त्रे च कृतपरिश्रमः । सविमर्शं संशोधनकर्मणि निमग्नश्च । प्राच्यविद्यासंशोधनालये तथान्यत्र ग्रन्थालयेषु विद्यामानमातृकासाहाय्येन ग्रन्थाविमौ संशोधितवान् । महत्त्या श्रद्धया प्रतिभया च शुद्धः पाठः प्रदत्तः। तथा अध्येतॄणाम् आनुकूल्यार्थं अनुव्याख्यान-श्रीमन्न्यायसुधा-वाक्यार्थचन्द्रिका-परिमळ-यादुपत्य-तात्पर्यचन्द्रिका-प्रकाशादिग्रन्थमूलपाठोऽपि प्रदत्त इत्ययं महान् विशेषः।

ग्रन्थद्वयप्रकाशनार्थं श्रीमदुत्तरादिमठाधीशाः, श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः सकलतन्त्रविचक्षणाः विपश्चिद्वरेण्याराधितकमनीयचरणाः विश्रुतौदार्यादिगुणिनः अपेक्षितमूल्यप्रदानेनानुगृहीतवन्तः । प्रतिक्षणमपि श्रीमन्न्यायसुधादिपाठप्रवचनैकदीक्षाः राजा भोज इव श्रीमत्सत्यध्यानतीर्थगुरुराज इव च विद्वन्निर्माण-पोषण-सम्मान-ग्रन्थप्रकाशन-परवादिनिग्रह-सज्जनानुकम्पादिगुणैः विश्वविख्याताः। तेभ्यः प्रणतिततयः समर्प्यन्ते । ग्रन्थस्यास्य सम्पादनसमये संशोधनालयस्यास्य भूतपूर्वनिर्देशिका श्रीमती डा. एच्. पि. देवकी महाभागा, सम्पादनकर्मणि प्रोत्साहदायिनी, योग्या मार्गदर्शिका,

विद्वत्पक्षपातिनी, गुणग्राहिणी, स्वयं संस्कृतज्ञा च । इदानीं अस्याः संस्थायां निर्देशकमहाभागः श्रीमान् डा. के. वि. रमेश महाभागः संस्कृतप्रियः, संस्कृतज्ञः, विद्यापक्षपाती, कार्यचतुरः सौजन्यशीलश्च ।

अनयोः शुभाशीवदिन ग्रन्थोऽयं प्राकाश्यं नीयत इति सन्तोषस्य स्थानम्। ग्रन्थस्यास्याध्ययनेन विद्वज्जनाः तुष्टा भवेयुरित्याशासेऽहम्। ।

इति
सुधीविधेयः
'पाण्डितरत्नं' 'विद्यावाचस्पतिः'
'वेदान्तभूषणम्' 'प्रवचनचतुरः'
'न्यायवेदान्तविद्वान्'
आर. जि. माळगी, एम्.ए.
उपनिर्देशकः
प्राच्यविद्यासंशोधनालयः

मैसूरु
14-12-1999

कृतिद्वयसमर्पणम्

ग्रन्थरत्नयोरनयोः प्रकाशनार्थं समग्रमूल्यप्रदानेनानुगृहीतवतां श्रीमदुत्तरादिमठाधीशानां श्री १००८ श्रीमत्सत्यात्मतीर्थश्रीमच्चरणानां करकमलयोः कार्तज्ञ्याविष्करणपूर्वकं कृतिद्वयं समर्प्यते ।

श्रीमदुत्तरादिमठपरम्परा

स्वज्येष्ठकुमारं चतुर्मुखं निमित्तीकृत्य सज्जनानुजिघृक्षया भगवान् नारायणः हंसरूपी तत्त्वधर्मस्वरूपाद्युपदिदेशेति श्रीमद्भागवते श्रूयते[1] । ब्रह्मणा च तन्मानसपुत्राः दिग्वाससः उपदेशं लेभिरे । ततः परं भगवान् शङ्करो दुर्वासोरूपी ज्ञानपरम्परां प्रावर्तयत् । ततो ज्ञाननिधितीर्थाः तेभ्यः गरुडवाहनतीर्थाः ततः परं कैवल्यतीर्थाः सिद्धान्तं प्रवर्तयामासुः । एवं परम्पराक्रमेण ज्ञानेशतीर्थाः परतीर्थाः सत्यप्रज्ञतीर्थाः प्राज्ञतीर्थाश्च सनातनविज्ञानपरम्पराप्रवर्धकाः सन्तः जगतीतले विरेजुः । सर्वेऽमी दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः भूरिभक्तिभराः अणिमाद्यष्टसिद्धि - समेधितज्ञानविज्ञानविभवाः परम्परां प्रवर्तयामासुः[2] ।

ततः प्राग्जन्मनि कृष्णाकरसिद्धशुद्धान्नभोजनसमेधितशुद्धान्तःकरणाः विज्ञानवैराग्यभूमयः अच्युतप्रज्ञाः (अच्युतप्रेक्ष्यतीर्थाः) विज्ञानपीठमलङ्कृत्य सज्जनानुद्धृतवन्तः । ततोऽस्मिन्नेव पीठे मुख्यप्राणावताारभूताः मूलावताररूपेष्वस्पृष्टाज्ञानमिथ्याज्ञानादिदोषाः विलीनप्रकृतयः सन्ततभगवत्साक्षात्कारेणापूरितनित्यविज्ञानविभवाः श्रीमदानन्दतीर्थ भगवत्पादाचार्याः तत्त्वज्ञानपरम्पराप्रवर्तकविज्ञानपीठमलङ्कुर्वाणाः परश्शतनिबन्धप्रणयनेन उपदेशादिना सनातनवैष्णवसिद्धान्तसमुद्धरणेन च सज्जनाननुगृहीतवन्तः । हिरण्यगर्भपित्रा हंसेन, मुख्यप्राणेन

---

१. भागवतम् - ११.१३. १६-४२ ।

२. गुरुवंशकथाकल्पतरुः - अ. १ श्लो. ७-१५.

चाधिष्ठितपीठमेव 'सर्वज्ञपीठम्' इति तदीयपरम्परागप्रवर्तकस्यैव मठस्य 'उत्तरादिमठ' इति च नाम प्रथितम् विद्वज्जनानुमोदितं च।

ततस्तार्किकशिखामणयः सकलदुर्मतप्रभञ्जनाः प्रभञ्जनसंसेवनलब्धशुद्धविद्यासुधाम्भोनिधयः वेदप्रवचनाचार्यशिष्या इति असाधारण्येन व्यपदेशभाजः श्रीमत्पद्मनाभभट्टारकाः पीठमिदमलञ्चक्रुः। ततोऽविहायैव यतिधर्मं द्वादशवर्षपर्यन्तं कलिङ्गराज्यपरिपालनेन तत्त्वोपदेशादिना च तत्रत्यसज्जनानुग्रहपरायणाः श्रीमदानन्दतीर्थ भगवत्पादाचार्यकृपाविशेषादानीतश्रीमन्मूलरामार्चाविभवाः श्रीमन्नरहरितीर्थाः पीठमिदमलञ्चक्रुः। या चेयं सीतासमेता मूलरामार्चा भुक्तिमुक्तिकरी सदा परम्परायामस्यां श्रीमदानन्दतीर्थभगवत्पादाचार्यादारभ्य सर्वज्ञपीठेऽधुना विराजमानैः श्रीमत् सत्यात्मतीर्थश्रीमच्चरणैरपि समर्च्यमाना चतुर्विधपुमर्थप्रापिका राराज्यते।

ततोऽस्यां परम्परायां चतुर्वेदव्याख्यातार इति सुप्रसिद्धाः श्रीमन्माधवतीर्थाः, विद्यापक्षपातेन परश्शतनिबन्धप्रणयनेन च भुवि प्रथितकीर्तिभिर्निगमान्तमहादेशिकैर्वेदान्ताचार्यैः विशिष्टाद्वैतमतदिवाकरैः,

असिना तत्त्वमसिना परजीवप्रभेदिना।
विद्यारण्यमहारण्यम् अक्षोभ्यमुनिरच्छिनत्॥

इति निर्णयप्रदानेन समभिनन्दिताः[१] श्रीमदक्षोभ्यतीर्थाः पीठमिदमलञ्चक्रुः।

एतेषामन्तेवासिनः, भगवत्पादाचार्यकृतप्रबन्धाशयविशेषाविष्करणेन अश्रुतपूर्वप्रतिभया श्रुतिस्मृत्यविरोधिन्याऽनितरसाधारण्या शैल्या श्रीमन्न्यायसुधाप्रणयनेन 'टीकाचार्या' इति प्रथितकीर्तयः श्रीमज्जयतीर्थपूज्यचरणाः सर्वज्ञपीठमिदमलङ्कृत्य दिवाकर इव

---

१. अ. वेदान्तवैभवप्रकाशिका - पु. ७१
आ. आचार्यचम्पू - पु.५५ श्रीनिकेतनमुद्रणालयः, चेन्नपट्टणम्।
इ. गुरुपम्पराप्रभावम् - पु.१२४ सरस्वतीमुद्रणालयः, चेन्नपट्टणम्।

विज्ञानमरीचिमालिभी रेजुः ।

ततः परम्पराक्रमेण, उत्तरभारते वैष्णवसिद्धान्तप्रचारकाः विद्याधिराजतीर्थाः, येषां भक्त्यामलया परितुष्टो रामस्सीतासहायः विभिद्य भुवं करनलिनैस्सुपूजितस्तादृशाऽनवद्यविद्यातपोभूमयः विद्यानिधयः इदमेव पीठमलञ्चक्रुः । ततः रघुनाथतीर्थाः - रघुवर्यतीर्थाः - रघूत्तमतीर्थाः वेदव्यासतीर्थाः - सत्यव्रततीर्थाः - सत्यनिधितीर्थाः - सत्यनाथतीर्थाः - सत्याभिनवतीर्थाः - सत्यपूर्णतीर्थाः - सत्यविजयतीर्थाः - सत्यप्रियतीर्थाः - सत्यसन्धतीर्थाः - सत्यधर्मतीर्थाः - सत्यध्यानतीर्थपर्यन्ताः सर्वेऽमी कर्मन्दिवृन्दाराधितकमनीयचरणाः विश्रुतौदार्याः परश्शतप्रबन्ध प्रणयनदुर्वादविद्रावण - वैष्णवसिद्धान्तप्रतिष्ठापनादिना आसेतुहिमाचलं विश्रुतकीर्तयः व्यराजन्तेति विज्ञातमेव विदुषामिति नेह विस्तीर्यते ।

या चेयं, माध्ववेदान्तिष्विदानीन्तनेषु सर्वत्र प्रथिता प्रसार्यमाणा च तत्त्वविद्या चकास्ति, सा सर्वाऽपि 'अभिनवानन्दतीर्थभगवत्पादाचार्या' इति प्रथितानां श्रीमत्सत्यध्यानतीर्थानामनुग्रहविशेषसमेधितैवेत्यत्र न काऽपि संशीतिर्महताम् ।

प्रातः स्मरणीयानाममीषां सत्पथ एव पञ्चाशद्वर्षपर्यन्तं श्रीरामपूजनरताः परवादिनिग्रह - अपूर्वग्रन्थप्रणयनादिना विपश्चिदाराध्या, अद्वैतवेदान्तविद्वन्मूर्धन्यैः श्रीमदनन्तकृष्णशास्त्रिभिः तथान्यैर्विद्वत्प्रवरैः सङ्कीर्तितविद्याविभवाः अनेकवारमनुष्ठित योगिजनैकविधेयव्रतविधयः, प्रातः स्मरणीयाः श्रीमत्सत्यप्रमोदतीर्था अस्मिन्नेव सर्वज्ञपीठे व्यराजन्त ।

वेदान्तविद्यानिजराज्यपालने श्रीमत्सत्यात्मतीर्थश्रीमच्चरणायोजनमेव यशः शरीराणां तेषां कृपाविशेषं भक्तजनेषु विद्योतयति । अस्योपकारस्य 'भवाम ऋणिनो वयम्' इति तदनुग्रहविशेषस्मरणं करकञ्जैः तत्पदपङ्कजपूजनं चाश्रितानामधमर्णताद्योतकं नान्यदिति मन्यामहे ।

श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः

एतेषां महाभागानां पूर्वाश्रमनामधेयं सर्वज्ञाचार्य इति । सर्वमूल-श्रीमन्न्यायसुधाप्रवचनसमेधितविद्याविभवाः सदाचारविनयादिगुणविभूषिताः श्रीमज्जयतीर्थविद्यापीठस्य उपकुलपतिस्थानमलङ्कुर्वाणाः श्रीगुत्तलरङ्गाचार्याः एतेषां पितृपादाः । माता च सकलसुजनमान्या उभयकुलयशोगाथाप्रवर्धिका पतिव्रता नैकव्रतपरायणा सौ. वैजयन्तीनाम्नी ।

एतेषां विद्यागुरवः चत्वारिंश एव वयसि अशीति वर्षीयैर्विद्यावृद्धै - र्जेगीयमानकीर्तयः न्याय - वेदान्त - मीमांसा - व्याकरणादि शास्त्रेषु सम्पादितामलज्ञानाः नैकवारं श्रीमन्न्यायसुधापाठप्रवचनादिना विद्वन्मान्याः द्विशताधिकच्छात्राणाम् अन्नदान-विद्यादानादिना सत्सम्प्रदाय - परम्पराप्रवर्तनेन च विश्रुतौदार्याः श्रीमत्सत्यध्यानविद्यापीठस्य कुलपतयः महाव्याघ्रोपपदाः विद्यासिंहाचार्याः ।

सर्वज्ञाचार्याः गर्भाष्टम एवोपनीताः, श्रीविद्यासिंहाचार्याणां सविध एवाधिगतसकलशास्त्राः विद्वद्गोष्ठीषु नैकमठीयेषु, सर्वकारीयासु संस्थासु च वाक्यार्थाहवे स्वीकृतभागाः 'अल्पीयस्येव वयसि सर्वैरपि विद्वन्मूर्धन्यैस्सानन्दं **'चुलुकीकृताम्भोधिरिव विद्यार्णवोऽयं वटुः सर्वानतिशेत'** इति समभिनन्दिता इति नूनमिदं महदभिमानास्पदम् ।

श्रीमत्सत्यप्रमोदतीर्थस्वामिपादानुग्रहविशेषेण स्वीकृततुर्याश्रमाः 'सत्यात्मतीर्था' इत्यन्वर्थाभिधाः श्रीमच्चरणा अधुना सर्वज्ञपीठमलङ्कृत्य श्रीमन्न्यायसुधा - व्यासत्रय - भारत - भागवतादिसच्छास्त्रप्रवचनेन निजजनाननुगृह्णन्ति इति विदुषां विदितचरमेवैतत् ।

वाक्यार्थवारिधिविहारिणः

श्रीमत्सत्यात्मतीर्थश्रीमच्चरणानां वाक्यार्थपाटवमनुवर्णयितुं न वयं प्रभवामः । विश्वसंस्कृतसम्मेलनमहोत्सवे प्रबन्धमण्डनादिना सम्मानितेभ्यः नैकदेशीयाद्वैतवेदान्तविद्वन्मूर्धन्येभ्यः साकं 'तत्त्वमसि' श्रुत्यर्थविषये वाक्यार्थः प्रावर्तत । तदा स्वामिचरणैरद्वैतव्याख्यापरम्परानुवादपुरस्सरं तत्रापरिहार्या दोषा उट्टङ्किताः । तदा तन्निरासाय प्रयतमाना अपि विपश्चितः

न शेकुः । प्रौढिमानं च श्रीमच्चरणानामसाधारणीं प्रशंसन्तः श्रीचरणकटाक्षवीक्षणेनैव प्रमुदितस्वान्ताः धन्यंमन्या रेजुः।

काशीदिग्विजयः

१९९९ तमे वर्षे सरस्वतीसन्निधानविशेषपात्रीभूते वाराणसीक्षेत्रे श्रीमच्चरणा वाक्यार्थगोष्ठीमेकामायोज्य तत्रत्यान् अद्वैतन्यायशास्त्रदिग्दन्तिनः ईक्षत्यधिकरणादिशास्त्रवाक्यार्थे निरुत्तरान् निश्चोद्यांश्च चक्रिर इत्यतिरोहितं विदुषाम् । काशीस्थाश्च विद्वांसः, श्रीमच्चरणानां नैकशास्त्रपाण्डित्यं, धर्मतत्त्वज्ञाननिष्ठां च समीक्ष्य सप्रश्रयं सादरं तान् समभिनन्द्य कृतज्ञतापत्रशतपत्रसमर्पणेन स्वात्मानं कृतार्थांश्चक्रुः ।

श्रीमन्न्यायसुधाब्धिक्रीडनविशारदाः

१९९९ तमे वर्षे फेब्रवरीमासे मान्यखेटग्रामे श्रीमट्टीकाकृत्पादाचार्य-मूलवृन्दावनस्थले प्रवृत्ते श्रीमन्न्यायसुधामङ्गलमहोत्सवे पञ्चघण्टापर्यन्तं श्रीपादैर्न्यायसुधाशयविशेषाविष्करणार्थमद्वितीयोऽसाधारणश्चानुवादः कृतः । अस्खलितानवरतसौधव्याख्यानश्रवणसमुत्खातदुःखसङ्घातः अध्यात्मविद्याप्रवणो पण्डितवर्गः अमृतपायीव नितान्तममन्द-मानन्दमन्वभवदिति सुविदितमेतत् समेषां विदुषामिति सानन्दं सबहुमानमुल्लिख्यते । एवं शास्त्रपाठप्रवचनाश्रमधर्मपालन विद्वत्पोषणापूर्वग्रन्थप्रकाशनादिना विश्वमान्या श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः ग्रन्थद्वयप्रकाशनार्थं समग्रमूल्यप्रदानेनास्मान् अन्वगृह्णन् इति साष्टाङ्गप्रणतिततिसमर्पणपूर्वकं ग्रन्थाविमौ तेषां करनलिनयोरुपायनीक्रियेते।

विक्रमसंवत्सरस्य चैत्रकृष्णसप्तमी

२६ ०४-२०००

इति श्रीमच्चरणानुग्रहाकाङ्क्षी
विद्वज्जनविधेयः
आ. वै. नागसम्पिगे एम्. ए.
न्याय-वेदान्तविद्वान्
संशोधकः
प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः, मैसूरु-५

प्रस्तावना

भारतस्य वैशिष्ट्यम्

भारतभूमिरियं स्वकर्मभिः भुवनं पुनानानां विरक्तशिखामणीनां अध्यात्मामृतपानतृप्तानां सतां, वीराग्रगण्यानां, दयौदार्यमूर्तीनां, विविधकलाविचक्षणानां विदुषां च जन्मभूमिरित्यतिरोहितं विदुषाम्। अत्र हि सकलधर्मीया परदेशीया अपि स्वप्रतिभया स्वीयविचारततीराविष्कुर्वन्तः परान् बोधयन्तश्च राराजन्ते । विभिन्नेष्वपि दर्शनेषु, सम्प्रदायेषु जाग्रत्स्वपि विचारप्रेम चास्मिन् देशे दरीदृश्यते। अत एव हि क्रैस्ता मह्मदीयाः नास्तिकाः बौद्धाः वेदान्तिनोपि चान्ये मिलित्वात्र मतविभेदेऽपि मत्यविभेदेन परस्परोपकारेण भ्रातृभावेन च जीवन्तीत्येतन्महदभिमानास्पदम् आनन्दप्रदञ्च ।

अध्यात्मविद्या विद्यानाम्

तत्र सङ्ख्या-विज्ञान-राजनीति-शृङ्गारादि-सकलकलाविद्यासु सतीष्वपि "अध्यात्मविद्या विद्यानाम्" इति भगवतः श्रीकृष्णस्योक्तिमनुरुध्याध्यात्मविदः ब्रह्मज्ञानेनैव परां मुदमनुभवन्तः परान् मोदयन्तश्च विराजन्ते । 'न हि सर्वाधिकारिकं किमपि शास्त्रं विद्यते' इति अभियुक्तवचनानुरोधेन स्वासक्तविद्याकलादिनैपुण्यं सम्पाद्य अन्येषामुपदेशादिना अनुग्राहकाश्च बहवो विद्वांसः अत्र समुल्लसन्ति । समयाः किलानादिकालतः प्रवाहरूपेण वृत्ताः समेषामात्यन्तिकशान्तिसाधनान्युपदेष्टुम् । तत्रापि शङ्कर-रामानुज--मध्वनामानस्त्रय आचार्यपुरुषा अस्मिन् देशे वेदान्तमवलम्ब्य स्वस्वसिद्धान्तं प्रतिपाद्य सज्जनाननुगृहीतवन्त इत्यतिरोहितमाविपालगोपालानाम् ।

तत्रेदानीं पद-वाक्य-प्रमाणपारावारपारीणानां श्रीमदानन्द-तीर्थशुभसम्प्रदायप्रवर्तकानां श्रीमदुत्तरादिमठाधीशानां श्रीमद्विद्याधीश तीर्थस्वामिपादानाम् 'ओङ्कारवाद' नामकग्रन्थरत्नं तथा द्वैतद्युमण्यादि-प्रौढप्रबन्धनिर्मातृणां श्रीहुलगी श्रीनाथाचार्याणां 'प्रणवदर्पण' विमर्शनात्मकं तारस्वरूपप्रकाशनामकं चापूर्वकृतिरत्नं विद्वत्करक-मलयोस्समर्पयितुमानन्दतुन्दिला वयम् । अपूर्वप्रमेयपरिप्लुताविमौ ग्रन्थौ विदुषाम् ओङ्कारस्वरूपविषये निर्ष्कृष्टज्ञानं जनयत इत्यत्र न विशयलेशोऽपि । कृतिस्वरूपपरिचयात्पूर्वं कृतिकाराणां चरितं 'मनोविशुद्धयै चरितानुवादः' इति न्यायेन किञ्चदिव निरूप्यते ।

श्रीविद्याधीशतीर्थस्वामिपादाः

श्रीमद्विद्याधीशयतीनां पूर्वाश्रमनाम श्रीनृसिंहप्रसादजन्यत्वात् 'नृसिंहाचार्य' इति प्रथितम् । एतेषां तातपादाः आनन्द-तीर्थाचार्याभिधाः, न्याय-वेदान्तादिशास्त्रेष्वसाधारणपाटवं सम्पाद्य भुवि प्रथितकीर्तयो रराज्यन्त। 'यच्छिष्यशिष्यशिष्याद्याः टिप्पण्याचार्यसंज्ञिताः' इति विद्वत्प्रसिद्धिमनुरुध्य व्याख्यातृकर्मन्दिवृन्दनिर्मातारः नैकवारं श्रीमन्न्यायसुधा - पाठप्रवचनादिना दिगन्तविश्रान्तकीर्तयः तत्त्वप्रकाशिकाभावबोध-बृहदारण्यकभावबोध -न्यायविवरणटीकाप्रणयनादिना विद्वप्रपञ्चमनुगृहीतवन्तः, पदवाक्य-प्रमाणपारावारविहारिणो ज्ञान-वैराग्यसागराः श्रीरघूत्तमस्वामिपादा एवानन्दभट्टारकाणां विद्यागुरवः।

महावाक्यार्थविजयिनाम् आनन्दतीर्थाचार्याणां श्रीहरिगुरु-भक्तिं सद्विनयादिगुणगणं चावलोक्य, श्रीकृष्णसाक्षात्कार-संसाधितामलज्ञानाः कर्मन्दिवृन्दारकाराधितकमनीयचरणाः रमात्रि-

विक्रम-हयग्रीवाद्युपासका शताधिकदिव्यप्रबन्धनिर्मातारः श्रीमद्वादिराजपूज्यचरणाः, 'आनन्दभट्टारक' इति सकलशास्त्रवैदुष्यानुमोदकोपाधिप्रदानेन सम्मान्य सर्वज्ञपीठमलङ्कुर्वाणः "सद्गुणमण्डितः कुलपावनः पुत्रः भवतां जायताम्" इत्याशीर्भिरनुगृहीतवन्तः । अत्र महान्तः प्रमाणम् ।

ततः गुरुसन्ततिपरमानुग्रहेण नृसिंहोपासनया च जातस्य पुत्रस्यानन्दभट्टारकाः 'श्रीनृसिंहाचार्यः' इति नाम चक्रुः । अयं च बालकः पितृसविधे काव्य-कोश-व्याकरणादिकमधीत्य श्रीमद्वेदव्यासपूज्यचरणसन्निधौ कृतसमस्तशास्त्राध्ययनः हरिगुरुचरणोपासनलब्धसमस्तभाग्योदयः श्रीवेदव्यासतीर्थ श्रीमच्चरणानुग्रहेण प्राप्ततुर्याश्रमः श्रीविद्याधीशतीर्थनामा प्रतिवादिभयङ्करः साधु जनाभयङ्करश्च रेजे।

गयागदाधरसाक्षात्कार - वाक्यार्थविजय - विष्णुपादार्चकानुग्रहादिमहिमविशेषाः विद्याधीशविजयादिग्रन्थेषु सम्यङ् निरूपिताः विस्तरभिया नेह तन्यन्ते ।

द्वैतवेदान्ते 'टीकाचार्या' इत्येव प्रथितानां श्रीमन्न्यायसुधाप्रणयनेन न केवलं द्वैतिनामपि तु सकलसमयगतसूक्ष्मातिसूक्ष्म प्रमेयनिरूपणेन समेषां समयिनामध्येतॄणां चोपकारकाणां श्रीमज्जयतीर्थवर्याणां श्रीमन्न्यायसुधाग्रन्थस्य वाक्यार्थचन्द्रिकानामकापूर्वप्रमेयपरिष्कारोपबृंहितव्याख्याप्रणेतॄणां श्रीमद्विद्याधीशयतिवराणां को वा तत्त्वजिज्ञासुर्नाधमर्णः ।

न केवलमियं व्याख्या सौधवाक्यार्थविवरणात्मिकाऽपि तु श्रीकर्णाटकविद्यासिंहासनाधीश्वर श्रीमद्व्यासतीर्थश्रीमच्चरणकृतग्रन्थोपर्यापादितदोषाभासनिरासिका मन्दारमञ्जरीचन्द्रिकादिग्रन्थगतविशेषानाविष्कुर्वन्त्यपि [illegible] इत्यविरोहितं

विदुषाम् । प्रौढा विद्वद्वर्यैकहृद्या अनवद्या च शैली वाक्यार्थचन्द्रिकादिषु परिदृश्यमाना नोङ्कारवादे दृश्यतेऽथापि तैर्बाल्य एव प्रणीतः सङ्गृहीतो वेत्यभ्यूह्यते ।

द्वैतद्युमणिकर्तारः श्रीनाथाचार्याः (1800 AD)

अमी किल महानुभावाः न्याय-वेदान्त-व्याकरण-मीमांसादि-शास्त्राब्धिविक्रीडनविशारदाः' स्वीयपितृपादेष्वेवाधिगतसकलविद्याः भेदोज्जीवन - तत्त्वोद्योत - सुधाव्याख्यानप्रणयनेन विद्वत्समाजे विख्याताः । पितृचरणानामनुग्रहं सोत्कण्ठं स्मरन्ति स्वग्रन्थेषु । यथा -

"श्रीमद्व्याघ्रपुरीवासिवासुदेवार्यसूनुना ।
शिष्येण तेषां रचिता भेदोज्जीवनटिप्पणी ।।" इति भेदोज्जीवनटिप्पण्यां, तथैव तत्त्वोद्योतटीकाव्याख्यादावन्ते च -

"श्रीमद्वेदान्तशास्त्रप्रवचनमहिमत्रस्तषट्शत्रुमुख्य
स्तातः श्रीवासुदेवाभिधगुरुतिलकः सर्वविघ्नान्निरस्य ।
ग्रन्थस्यैतस्य पारं कलयतु कमलानाथपादावलम्बी
यस्मात् माध्वागमार्थानमलमपि मनुं प्राप्तवानस्मि हृष्टात् ।।"

"अद्वैतवादप्रतिभासमार्जितैः यशोभिरामोदितसन्मनस्ततिः ।
श्रीवासुदेवार्यगुरूत्तमः पिता विद्याप्रदातास्तु मयि प्रसन्नः ।।"

इति, तारस्वरूपप्रकाशे च -

मद्गुरूंश्च पितॄंश्चापि वासुदेवाभिधान् वयम् ।
नत्वोङ्कारस्याद्य सूत्रावयवत्वं विवृण्महे ।। इति च पितृभक्तिमाविष्कृतवन्तः ।

एवमेव पद - वाक्य - प्रमाणशास्त्रपारङ्गतानां श्रीसत्यधर्माब्धिसम्भूतानां श्रीसत्यसङ्कल्पतीर्थानां चरणनलिनयोरसाधारणी भक्तिराविष्कृता । तत्त्वोद्योतटीकाव्याख्यारम्भे समाप्तौ च तत्कृतां स्तुतिं पश्यन्तु कोविदाः -

"रघुपतिपदपाथोजातगन्धाभिनन्दी
निखिलनिगमचर्चास्तद्विलासैकशौण्डः ।
जयति यमिकुलेशः सत्यसङ्कल्पनामा
गुरुरखिलबुधानां भक्तिवैराग्यरागः ।।"
यन्मन्त्राक्षतमाहात्म्यात् ग्रन्थोऽयं पूर्णतां गतः ।
तान् वन्दे सत्यसङ्कल्पान् अन्वर्थाभिधया युतान् ।।इति ।

श्रीनाथाचार्याणां कृतयः

हुलगी श्रीनाथाचार्याणाम् असाधारणप्रतिभाविष्करणं द्वैतद्युमण्यामामूलाग्रतया दरीदृश्यते (विदुषाम्) । द्वैतद्युमणिरयं श्रीमदानन्दतीर्थभगवत्पादाचार्यकृततत्वोद्योतनामकप्रकरणग्रन्थस्य जयतीर्थार्यनिर्मितटीकाव्याख्यानरूपोऽपि अद्वैतसिद्धि - गुरुचन्द्रिकालघुचन्द्रिकाद्यद्वैतप्रौढप्रबन्धखण्डनदीक्षः श्रीमन्न्यायामृतव्याख्यारूपोऽपि विराजते ।

यदीयतर्कताण्डव - न्यायामृत - तात्पर्यचन्द्रिकादि कृतिजातमुपजीव्य वेदान्तिनो वाक्यार्थाहवपटवः शास्त्रविचक्षणाश्चाभवन् तेऽमी श्रीमद्व्यासतीर्थश्रीमच्चरणाः न्यायामृतप्रणयनेन विचारप्रणालीप्रवर्तकाः समभवन् । अत एव विद्वच्चक्रचूडामणिभिरनन्तकृष्णशास्त्रिभिः -

"द्वैताद्वैतवादप्रस्थानप्रसङ्गेन तत्र तत्र न्यायमकरन्द-चित्सुखी-प्रमाणमाला-अद्वैतदीपिकादिग्रन्थेषु विशकलिततया उपलभ्यमानानां

खण्डनमण्डनादिप्रसङ्गेनोट्टङ्कितानां प्रक्रियाविशेषाणां एकत्र सङ्कलनेन, विनैव कलङ्कं तत्तन्मतप्रक्रियाविशेषाणां अतिगम्भीरया प्रणाल्या सरलसरलतयोपपादनेन श्रीव्यासतीर्था एव न्यायामृतकारा मूलाचार्या इति नेयमतिशयोक्तिरिति वयं विश्वसिमः ।

यत् न केवलं द्वैतिनः किन्त्वद्वैतिनोऽपि विमर्शनकुतूहला अधमर्णा एव न्यायामृतकाराणां श्रीव्यासरायमठादिपुरुषाणां सर्वतन्त्रस्वतन्त्राणां परःशतनिबन्धनिर्मातॄणाम् । विश्वसिमः यत् व्यासतीर्थाः अनितरसाधारणमहिमशालिनस्तेजस्विनः सर्वविद्याधिष्ठानदेवताः शान्तप्रकृतयश्च यतिवर्या इदानीमपि स्वतेजसा जीवन्ति श्रीव्यासरायमठास्थाने, यत्र तत्पीठाधिष्ठानमात्रेण बालोऽपि बृहस्पतिसमानो मूकोऽपि वाग्मिप्रवरो भवति, इति वयमद्वैतमता-वलम्बिनोऽपि तच्चरणकमलाश्रयणमात्मनो भूषणमेव मन्महे । श्रीव्यासरायमठाधिष्ठानाः श्रीविजयीन्द्रतीर्थादयोऽपि विश्वसि-मस्तत्पीठमहिम्नैव परश्शतनिबन्धनिर्माणेन लोकोपकारं व्यदधुः"[1] इति ।

अद्वैतवेदान्तनिष्णातानां मेधाविमूर्धन्यानां महामहोपाध्या-यानन्तकृष्णशास्त्रिणां वचांसि गुणैकपक्षपातिनां सर्वविद्वज्जनाना-मानन्दोद्रेकं जनयन्तीत्यत्र न विप्रतिपत्तिलेशः ।

न्यायामृतस्य विद्यमाना असङ्ख्या व्याख्याग्रन्था अस्य महत्त्वं प्रौढतां चावगमयन्ति । शताधिकप्रबन्धनिर्मातृभिः कर्मन्दिवृन्दारकवृन्दवन्दितपदैः श्रीविजयीन्द्रपूज्यचरणैर्निबद्धानि लघ्वामोद-मध्यमामोद-गुर्वामोदनामकानि त्रीणि व्याख्यानानि सुप्रसिद्धानि ।

पद-वाक्य-प्रमाणविक्रीडनविशारदानां सर्वतन्त्रस्वतन्त्राणां तात्पर्यचन्द्रिकाप्रकाशाद्यसाधारणप्रवन्धप्रणयिनां श्रीमद्राघवेन्द्रतीर्थ-

---

1 श्रीमन्मन्त्रालयक्षेत्रस्थ श्रीगुरुसार्वभौमविद्यापीठ प्रकाशित न्यायामृतामोदपीठिकात उध्दृतमिदं वाक्यजातम् ।

श्रीमच्चरणानां पूर्वाश्रमपुत्रैः श्रीलक्ष्मीनारायणाचार्यैः प्रणीतं मधुरी-संज्ञकमपरं व्याख्यानं विद्यते।

तथैव श्रीमन्न्यायसुधा - भागवतादिदिव्यग्रन्थव्याख्यातॄणां श्रीमद्यादवाचार्यपूज्यचरणाराधकानां, श्रीमद्राघवेन्द्रस्वामिपादैरेव 'तीर्थ' इत्यन्वर्थोपाधिप्रदानेनानुगृहीतानां वंशपल्ली श्रीनिवास-तीर्थाचार्याणां न्यायामृतप्रकाशनामकमन्वर्थं सर्वजनमनोरञ्जनं व्याख्यानं समुल्लसति ।

तथैव लक्ष्मीनाथयति - यादवेन्द्रतीर्थ - सुमतीन्द्रतीर्थपूज्य - पादैरन्यैश्च महद्भिः प्रणीतानि व्याख्यानानि समुपलभ्यन्ते ।

वाक्यार्थविमर्शप्रवाहः

न्यायामृतोक्ताद्वैतवाददोषोद्धरणाय सकलशास्त्रविचक्षणाः मेधाविमूर्धन्याः मधुसूदनसरस्वतीमहाभागा, 'अद्वैतसिद्धि' नामकं ग्रन्थं रचयामासुः ।

अद्वैतसिद्धिखण्डनाय न्यायामृतस्याबाध्यतोपपादनाय च श्रीरघूत्तमस्वामिपादच्छात्रैः श्रीरामाचार्यैः 'न्यायामृततरङ्गिणी, एवम् आनन्दभट्टारकैः 'न्यायामृतकण्टकोद्धारश्च निरमायिषाताम् ।

ततस्तरङ्गिणीखण्डनार्थं गौडब्रह्मानन्दः, गुरुचन्द्रिका लघुचन्द्रिका-ख्यौ द्वौ प्रबन्धौ निर्ममे । अत्र चाद्वैतसूक्ष्मप्रक्रिया निपुणतरं प्रौढ्या शैल्या निरूपिता । ततः तरङ्गिणीसौरभ- न्यायामृतसौगन्ध्यप्रणयनेन च महान्तः श्रीवनमालिमिश्राः गुरुचन्द्रिका-लघुचन्द्रिकोक्तदोषा-भासनिराकरणेन न्यायामृताद्युक्तवाक्यार्थस्य परिपूर्णतामखण्ड्यत्तां च प्रत्यपादयन् । एवमेव मन्नारीकृष्णाचार्यविरचितं न्यायामृत-माधुर्यनामकं चापरं व्याख्यानं गौडब्रह्मानन्दीयखण्डनपरं राराजते ।

ततः परं सकलाद्वैतप्रबन्धनिरसनदीक्षः, ब्रह्मानन्दप्रणीताद्वैतचन्द्रिकानिरसनदक्षश्च श्रीश्रीनाथसूरिप्रणीतः द्वैतद्युमणिरजायत। यस्याधुनाऽपि खण्डनार्थं नैकोऽपि प्रबन्धो निबद्ध इति सोऽयं ग्रन्थः अखण्ड्योऽपूर्वश्च विद्वत्प्रपञ्चे विराजते ।

येन च द्वैतप्रकाशः नितान्तं व्याप्तः, निराकृतश्च निखिलाज्ञानवादः सौऽयमनर्घ्यग्रन्थरत्नप्रणेतैव श्रीनाथाचार्यः 'तारस्वरूपप्रकाशं' निर्ममे। ग्रन्थश्चायमोङ्कारस्य शारीरकसूत्रावयवत्वनिरसनार्थं प्रवृत्तस्य तत्त्वमार्ताण्डादिप्रौढप्रबन्धनिर्मातुः विद्वच्चक्रचूडामणेः श्रीश्रीनिवासाचार्यस्य ' प्रणवदर्पण' प्रबन्धस्य खण्डनात्मकः प्रौढः परमगम्भीरश्च विद्योतते ।

इतः परम् ओङ्कारवाद - तारस्वरूपप्रकाशादि ग्रन्थावलम्बनेनोङ्कारस्य ब्रह्ममीमांसासूत्रावयवत्वं प्रसाधयतां महात्मनामाशयलेशः यथामत्युपवर्ण्यते ।

श्रुत्यर्थनिर्णायकं ब्रह्ममीमांसाशास्त्रं सज्जनानुजिघृक्षया भगवान् बादरायणो व्यतनोत् । शरीरे विद्यमानानां जीवपरमात्मनां स्वरूपपरिचायकत्वात् ब्रह्ममीमांसासूत्राणां शारीरकमीमांसेत्यप्यस्ति प्रथितं नाम । तत्र आद्यसूत्रपाठविषये द्वैतिनां पन्थाः विशिष्टः विलक्षणश्च। आनन्दतीर्थीयसम्प्रदाये तु 'ओम् अथातो ब्रह्मजिज्ञासा',इति सूत्रपाठः । शङ्कररामानुजाद्यशेषसूत्रव्याख्यातॄणां मते ओङ्काररहितः 'अथातो ब्रह्मजिज्ञासा' इत्येव सूत्रपाठः । एवं प्रतिसूत्रमप्यादावन्ते च ओङ्काराध्याहारः "स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यत" इत्यादि निन्दार्थवादप्राप्तः स्वीकृतः माध्वसम्प्रदायिभिः। अतोऽत्र पाठसम्प्रदायविभेदाद् विप्रतिपत्तिः स्वाभाविकी । किमोङ्कारः आद्यसूत्रावयवः, एवं प्रतिसूत्रमादावन्ते चोङ्काराध्याहारः किमावश्यक उत

नेति ।

'मानाधीना मेयसिद्धि' रित्यादि न्यायानुसारेण उक्तार्थे प्रमाणानि निरूप्यन्ते -

(i) 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते' (भ.ता.उ. (श्रुतिः) (ii) 'तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' (भ. गी. १७-२४) (iii) 'अनोङ्कृतं ह्यासुरं स्याद् यत् तस्मादोङ्कृतं त्वपि । ओङ्कारार्थहरेः सम्यक् अज्ञानादासुरं भवेत्' (भ. ता. उ. श्रु.१७.७) (iv) 'सर्वस्य प्रणवो ह्यादिः मध्यमन्तस्तथैव च (माण्डूक्य. ४. ५)।' (v) 'सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् । तद्धेतुत्वं वदंश्चाऽपि तृतीयोऽत उदाहृतः (ब्र. सू. भा. १.१.१) ।" इत्यादि- श्रुतिस्मृतयः सकलसत्कर्मानुष्ठानारम्भे ओङ्कारोच्चारणतत्प्रति-पाद्यभगवत्स्वरूपानुसन्धानं प्रतिपादयन्त्यः वेदार्थनिर्णायकसूत्रादावन्ते च तदध्याहारं प्रतिपादयन्ति ।

उक्तप्रमाणानां, सावकाशोऽर्थः यथा न स्यात्तथोपरि वाक्यार्थः निरूप्यते। ततः प्राक् 'स्रवत्यनोङ्कृतं ब्रह्म' इति निन्दार्थवादबलेन मन्त्रस्य स्रवणविशरणाभावकाम आद्यन्तयोः ओङ्कुर्यात्' इति कल्पित-विधिवाक्यमेव मानं भवतीत्यपि वक्तुं शक्यते । कल्पितविधि वाक्यस्यार्थसाधकत्वं लिङ्गादीनामङ्गत्वे प्रामाण्यवादिनां मीमांसकानाम्, मङ्गलस्य समाप्तिकारणत्वे 'समाप्तिकामो मङ्गलमाचरेत' इति शिष्टा-चारानुमितश्रुतेः प्रामाण्यवादिनां नैय्यायिकानां च सम्मतमेव। तस्मात् निन्दार्थवादबलात् प्रतिसूत्रमाद्यन्तयोरोङ्कारोऽध्याहार्यः। ओङ्कारस्य सूत्रावयवत्वमनुव्याख्याने प्रतिपादितम्

'तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते ।
सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः ।(ब्र. सू. अ. १.१.१)' इति ।

व्याख्यातं च सुधायाम् -(ब्र. सू. अ. सुधा. १.१.१)

"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" इति श्रुतिबलात् प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योहः कार्यः । न चोह्यमानं पृथगिति शक्यते वक्तुम् । मन्त्रेष्वप्यूह्यमानस्य तदनवयवत्वप्रसङ्गात्। ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहिततया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थः" इति ।

ननु कथमध्याहृतस्य तदवयवत्वमुच्यते? 'सूर्याय' इत्यूहं प्रति 'अग्नये' इत्यादेरिव प्रकृते स्थानिनोऽभावात् । 'प्राकृतस्थानपतितपदार्थान्तरकार्यतः। ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः' इति प्रकृतियागीय व्रीह्यग्निलक्षणद्रव्यदेवतारूपस्थाने विकृतियागसम्बन्धि नीवारसूर्यलक्षणद्रव्यदेवतारूपं तस्य यत्कार्यं प्राकृतकार्यतुल्यं होमादि, तदर्थं 'सूर्याय' इत्यादिरूपः विकृतः प्रयोगः ऊहविषयत्वादूह इत्युच्यते । एवं च प्रकृते स्थानिनोऽभावादूहोऽसम्भवि।

किञ्च ऊहप्रवरनामधेयानाममन्त्रत्वस्य द्वितीये सिद्धान्तितत्वात् मन्त्रेष्वपि ऊह्यमानस्य तदनवयवत्वमिष्टमेव ।

अत्रोच्यते । नात्र ऊहशब्दो 'मन्त्रसामसंस्कारोहः' इत्यादाविव कर्मव्युत्पत्या विकारपरः, किन्तु 'अध्याहारस्तर्क ऊहः' इति प्रसिद्धेर्भावव्युत्पत्त्यां अध्याहारवाचकः 'ऊहो नाम तर्कणा'। सा चैकरूपा मन्त्रसामसंस्कारेषु क्रियमाणा' इत्यादि टुप्टीकोक्तदिशा तर्क एव

मुख्य ऊहः । तद्विषयत्वात् मन्त्रादेरन्यथात्वमप्यूह इत्युक्तम्। तत्र च 'स्रवत्यनोङ्कृतं ब्रह्म' इति श्रुतिरेव मानम् । अध्याह्रिय-माणस्यापादितममन्त्रत्वं च मन्त्रेण सहैककार्यकारित्वाभाव इति नेष्टापत्तिः । वाक्यार्थप्रतीतिरूपैककार्यकारित्वाभावस्य अदृष्टरूपै-ककार्यकारित्वाभावस्य वा वक्तुमशक्यत्वात् । अन्यथा 'संयज्ञपति-राशिषा' इत्यादावध्याहृतस्य 'गच्छताम्' इत्यस्य 'इषे त्वा' इत्यादौ 'छिनत्ति' इत्यध्याहृतस्य वाक्यार्थान्वयप्रतियोगिसमर्पकत्वरूपा-वयवत्वाभावप्रसङ्गात्' । किञ्च एवमेव 'व्यवायान्नानुषज्यत' इति जैमिनिसूत्रकृतः 'व्यतिहारो विशिंषन्ति' इति ब्रह्मसूत्रकृतश्च तत्र तत्राध्याहारोक्तिरयुक्ता स्यात् । अतस्तदन्यथानुपपत्त्या अध्याह्रि-यमाणस्यावयवत्वाङ्गीकार आवश्यक एव ।

अत्रेदं रहस्यमवधेयम् । ओङ्कारस्य प्रथमसूत्रावयवत्वं नाम तदुपयुक्तार्थप्रतिपादकत्वम् । ब्रह्मजिज्ञासा कर्तव्येत्यत्र निर्विषयत्व-शङ्कापरिहाराय ब्रह्मपदेन वेदप्रतिपाद्यत्वरूपं विषयत्वमीश्वरस्योक्तम् । तत्कथमित्याकाङ्क्षायां वेदस्य परममुख्यवृत्त्यादिना ईश्वरप्रतिपाद-कतया तद्विषयकत्वसमर्थनार्थमोङ्कारः सूत्रकृता ब्रह्मणि प्रयुक्तः। तत्प्रकारश्च "स एव ब्रह्मशब्दार्थो नारायणपदोदितः । स एव भर्गशब्दार्थो व्याहृतीनां च भूमतः । भावनाच्चैव सुत्वाच्च सोऽयं पुरुष इत्यपि । स एव सर्ववेदार्थः जिज्ञास्योऽयं विधीयते।" इति व्याख्यानव्याख्येयभावप्रतिपादनादिनाऽनुव्याख्याने निरूपितः ।

द्वितीयादिसूत्रेषु ओङ्कारस्य तदवयवत्वं नाम तेन सहैककार्य-कारित्वम्। स्रवणविशरणाभावसम्पादकतया सूत्रेण सह पुण्यरूपै-ककार्यकारित्वात् । आद्यन्तयोरोङ्कारोच्चारणपूर्वकं सूत्रोच्चारणे पुण्यं सम्पद्यत इति भावः । एतादृशादृष्टार्थत्वं प्रथमसूत्रेप्यक्षतमेव। एवं

च प्रथमसूत्रे चन्द्रिकोक्तदिशा ओङ्कारस्य स्विष्टकृदादिवत् दृष्टादृष्टोभयार्थत्वम् । द्वितीयादिसूत्रे तु केवलादृष्टार्थत्वमिति विज्ञेयम्। सर्वमेतद् विवृतं श्रीसुधाचन्द्रिकादिग्रन्थेषु ।

अत्रैके चोदयन्ति -

"इह केचित् ओङ्कारस्य सूत्रावयवतां कल्पयन्ति तन्न ।"

"अप्रमाणतया यस्य यत्रोच्चारणमेव न ।
तस्यावयवता तत्र शशशृङ्गार्जवोपमा ।।"

ब्रह्मसूत्रयोराद्यन्तोङ्कारोच्चारणे यदि किञ्चित्प्रमाणमुपलभेमहि तदा तस्यावयवत्वं कथञ्चित् कल्पयेमहि । यदा तदुच्चारणमेवाप्रामाणिकम् तदा तस्यावयवत्वकल्पनं शशश्रृङ्गार्जनवदपहास्यास्पदमेव। तथाहि -

'प्रत्यक्षम् अनुमानं वा नाऽदृष्टार्थे प्रवर्तते ।
श्रुतिस्त्वनन्यथासिद्धा न दृश्यत ...... ।।' (प्रणवदर्पणे)
'प्रणवोच्चारणस्योक्ता वेदाद्यन्तस्तथा श्रुतौ ।
उपक्रमोपसंहारमात्रे चैतद् व्यवस्थितम् ।
प्रतिवाक्यं प्रतिपदं न तद् दृष्टम् न सम्मतम् ।
प्रतिसूत्रं तदिष्टं चेत् प्रमाणमपि दुर्लभम् ।'

(तत्वमार्ताण्डे १.१.१. P५)

इत्यादि ।

अत्रेदमभिधीयते - ओङ्कारस्य सूत्रावयवत्वे सूत्रघटकत्वे च श्रीमद्ब्रह्मसूत्रभाष्य एव भगवत्पादैर्गारुडवचनमुदाहृतम् । तथोक्तवक्ष्यमाणप्रमाणानुसारेणोङ्कारस्य सूत्रावयवत्वमङ्गीकरणीयमेव । तथा हि -

"सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ ।
ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ।।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।
... अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः ।
अथातः शब्दयोरेवं वीर्यमाज्ञाय तत्वतः ।
सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते ।" (ब्र. सू. भा. १.१.१)

इति

एवमेव माण्डूक्यश्रुतिरत्र मानं भवति -

"सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।।" इति
(माण्डूक्य ४.५.)

एवं च सूत्राद्यन्तयोः ओङ्कारोच्चारणानुसन्धानादेः प्रतिपादित-त्वादोङ्कारस्य सूत्रावयवत्वमभ्युपेयम् ।

न चेदं मुण्डकवाक्यं परमात्मनः जगदुत्पत्यादिकारणत्वपर[illegible]ं कथमुक्तार्थपरं स्यादिति वाच्यम् । पूर्वग्रन्थस्य प्रणवघटकाकारा[illegible] दिवर्णप्रतिपाद्यरूपमाहात्म्यपरस्य तादृशाक्षरमाहात्म्यप्रतिपादनेऽपि[illegible] तात्पर्यमस्तीत्यवगम्यते । 'ओमित्येतदक्षरमिदं सर्वम्' इत्युपक्रमात[illegible] प्रणवमाहात्म्यकथनपरतया तात्पर्योपवर्णनमपि नासङ्गम् ।

एवं 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते' इति श्रुतिरपि[illegible] प्रत्येकमनेकवेदवाक्यविचारपराणां सूत्राणामाद्यन्तयोरोङ्कारोच्चा[illegible]रं प्रतिपादयति।

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः'(भ. गी. १७.२३. ..) 'गिरामस्म्ये-कमक्षरम्'(भ. गी. १०. २५.) 'प्रणवः सर्ववेदेषु' (भ[illegible].

गी. ७. ८.)इत्यादौ भगवता प्रणवस्य ब्रह्मवाचकत्वं माङ्गलिकत्वं चोपपादितम्। **'ओमित्येकाक्षरं ब्रह्म व्याहरन्'** (भ. गी. ८. १३.) **"तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्"** (भ. गी. १७. २४.) इत्यादौ च यज्ञादिसत्कर्मणां ओङ्कारोच्चारणतदर्थभगवदनुसन्धानपुरस्सरं कर्तव्यत्वमुक्तम् । यज्ञशब्देन चात्र **'श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परंतप'** (भ. गी. ४.३३.) इति गीतोक्तदिशा सर्वयज्ञप्रधानभूतः ज्ञानयज्ञ एवाभिहितः। स च ब्रह्ममीमांसाध्ययनादिरूप एव । अत एव 'स्वाध्यायज्ञानयज्ञाश्च' इत्यत्र स्वाध्याययज्ञस्य वेदाध्ययनरूपस्य, ज्ञानयज्ञात् पृथक् गृहणमपि सङ्गच्छते । उक्तोऽयमर्थः अद्वैतनिष्णातैर्व्याख्यातृभिः **भाष्योत्कर्षदीपिकायाम्** -'विधिवद् वेदाभ्यासो यज्ञो येषां ते स्वाध्याययज्ञाः। ज्ञानं पूर्वोत्तरमीमांसाविचारेण शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञान- यज्ञाः' इति । एवमेव सदानन्दमधुसूदनसरस्वत्यादयोऽपि व्याचक्षते।

एवं च गीतोपदेशकादनन्येन व्यासेन गीतायां ज्ञानयज्ञस्य ओङ्कारोच्चारणपूर्वकत्वं समर्थ्य सूत्रप्रणयनकाले तदननुष्ठाने हेत्वभावात्। सर्वशिष्टशिक्षार्थं प्रवृत्तेन भगवता ओङ्कारोच्चारणं कृतमित्यङ्गीकरणं समुचितम्।

'यो वेदादौ स्वरः प्रोक्तः वेदान्ते च प्रतिष्ठितः' इति श्रुतिरपीममेवार्थमभिदधाति । 'एष उ स्वरः' इति छान्दोग्योपनिषदनुसारेणात्र स्वरशब्द ओङ्कारपर एव । तथा च 'यः स्वरः' य ओङ्कारः, वेदादौ प्रोक्तः 'वेदान्ते' ब्रह्मसूत्रे च प्रतिष्ठित इत्यर्थः । ओङ्कारस्य सूत्रावयवत्वं च 'प्रतिष्ठित' इति प्रत्युपसर्गपूर्वकष्ठाधातुना विशदीकृतः।

न चैवमोङ्कारस्य सूत्रघटकत्वे तदवयवत्वे च ओमथातो ब्रह्मजिज्ञासा इति संहिततया सूत्रपाठेन भाव्यमित्यसंहिततया निर्देशः कुत इति वाच्यम् । 'स्वरितेनाधिकारः' इति नियमानुसारेण यथा

व्याकरणशास्त्रे केषाञ्चित्पदानामुत्तरसूत्रेष्वनुवृत्तिज्ञापनाय स्वरितयुक्ततया निर्देशः क्रियते तद्वदिहापि प्रथमसूत्रावयव एवायमोङ्कार इति न ज्ञेयमपितूत्तरसूत्रेष्वप्यदृष्टसम्पादकतयोच्चारणीय इति प्रज्ञापयितुम् असंहिततया निर्दिष्ट इत्यवधेयम् ।

स्यादेतत् । यदि 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यत्र ब्रह्मपदं सूत्रपरं स्यात् । न चैवम् । तस्य 'ब्रह्म तत्वं तपो वेद' इत्यादिकोशानुसारेण वेदपरत्वादिति चेत्, उच्यते । तत्रैव कोशे ब्रह्मशब्दस्य तपस्यपि शक्तेरुक्तत्वेन 'स्रवतीत्यादिकं तपः परं किं न स्यात् । न च 'ब्रह्मणः प्रणवं कुर्यात् आदावन्ते च, इत्येतत् शिक्षावाक्यं वेदप्रकरण एव पठितमिति प्रकरणवशात् वेद एव ग्राह्य इति वाच्यम् । मनुस्मृतौ ब्राह्मणसम्बन्ध्याचारकथनप्रस्ताव एवैतद्वचनस्य सत्त्वेन तपसोऽपि ग्रहणस्य युक्तत्वात् । एवं च "**तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्**" (भ. गी. १७. २४.) इति गीतायां यज्ञादीनामपि ओङ्कारोच्चारण - पूर्वकत्वाभिधानेन तथैव शाङ्करभाष्येऽस्य गीतावाक्यस्य व्याख्यानाच्च ब्रह्मविद्यायाः ज्ञान-यज्ञरूपत्वेन 'स्वाध्यायप्रवचन एवेति नाको मौद्गल्यः। तद्धि तपः तद्धि तपः ।' इति तैत्तिरीयश्रुतौ श्रुतिव्याख्यानभूतस्य तपस्त्वोक्तेः, ब्रह्मसूत्राणां श्रुतिव्याख्यानरूपत्वेन तपस्त्वाच्च, विध्यर्थवादयोरेकवाक्यत्वानुरोधेन स्रवतीत्यर्थवादघटकब्रह्मशब्दस्य ब्रह्मविद्या- परत्वावश्यम्भावात् आद्यन्तयोरोङ्काराध्याहारसिद्धिः ।

न च निखिलसूत्राणां वेदार्थनिर्णायकत्वेनैकविद्यात्वात् शास्त्रस्यादावन्ते चोङ्कारोहः स्यात् । न तु प्रतिसूत्रमिति वाच्यम्। प्रत्येकमपि ब्रह्मसूत्राणां तत्तद्वेदार्थनिर्णायकत्वेन ब्रह्मविद्यात्वात् पृथगुच्चारणीय एवोङ्कार आद्यन्तयोरिति ।

ब्रह्मसूत्राणामेव परविद्यात्वम्

प्रसङ्गसङ्गत्या तारस्वरूपप्रकाशे वेदापेक्षया ब्रह्मसूत्राणां मुख्यपरविद्यात्वमुपपादितम् । तथाहि - तत्र आथर्वणोपनिषदि श्रूयते - **"द्वे वा व विद्ये वेदितव्ये परा चैवापरा च । तत्रापरा- ऋग्वेदो यजुर्वेदः सामवेदः अथर्ववेदः शीक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषमिति । अथ परा-यया तदक्षरमधिगम्यते"** (आथ. १. ४&५) इति । अत्र साङ्गान् वेदानपरविद्यात्वेनोक्त्वा अक्षराधिगतिकरणस्य परविद्या- त्वमुक्तम् । **"वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदाः"**(त. उ. पै.) इति वेदानामक्षरा- धिगतिकरणत्वस्याबाधितत्वेऽपि तेषामपरविद्यासु परिगणनं विवक्षाविशेषमनुरुध्येति भाति । स आशयविशेषः श्रीमध्वगुरुचरणैः प्रमाणोदाहरणपुरस्सरं निरूपितः । -

'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः ।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः ।।' इति

(आ. भा. १.)

अयमाशयः - वेदार्थनिर्णायकन्यायग्रथनात्मकब्रह्ममीमांसा - शास्त्रानुपकृताः' हि वेदादयः न परस्वरूपपरिचायकाः, अपि तु तदुपकृता एवेति वेदेन ईश्वरज्ञाने जननीये इतिकर्तव्यताभूतं मीमांसा- शास्त्रं, बीजनिष्ठाङ्कुरजननशक्त्युद्बोधकजलमिव अक्षराधिगतिकरणं भवति । यागीयहिंसाया इतिकर्तव्यताभूतायाः प्राबल्यमिव भगवद- परोक्षज्ञानसाधनेषु श्रवणादिषु गुरुप्रसादस्येतिकर्तव्यताभूतस्य प्राबल्यमिव च मीमांसाशास्त्रस्यापीतिकर्तव्यताभूतस्य प्राबल्यमव्याहतम् । श्रुति - युक्ति - आप्तिमूलकत्वाच्चास्य निरवधिकं प्रामाण्यम्।

एतेन उपनिषदः परविद्येति व्याख्यातारो निरस्ताः । ऋगादि-ग्रहणेन तासामपि गृहीतत्वात् । उपनिषज्जन्यं ज्ञानं परविद्येत्यप्यचारु । अक्षराधिगतिकरणत्वाभावात् ।

अपौरुषेयत्वेन सकलप्रमाणोपजीव्यानां वेदानामपरत्वं तदधीनप्रामाण्यकस्य ब्रह्ममीमांसाशास्त्रस्य तु कथं परत्वमिति शङ्का निपुणतरं निराकृतात्र -

"परापरत्वयोर्धर्मिविशेषाधीनत्वेनापरिनिष्ठितत्वात् प्रामाण्य-स्थापकनिर्दोषतायाः स्वतःसिद्धत्वेन तेषामधिकं प्रामाण्यम्, सूत्राणामाप्तिमूलत्वेन निर्दोषत्वमिति तदमुख्यतया प्रामाण्यस्या-मुख्यत्वमिति स्थितावपि, विद्यापदार्थतावच्छेदककोटिप्रविष्टस्य सूत्रसाध्यस्य यथार्थज्ञानस्य निश्चितप्रामाण्यकत्वेन प्रवृत्तिद्वारा पुरुषार्थोपयोगितयाऽधिकेन विद्यात्वेनास्य परत्वात् परविद्या-शब्दमुख्यार्थत्वं, सूत्राननुगृहीतवेदसाध्यज्ञानस्यानिर्धारणात्मकस्य प्रवृत्त्यादिद्वारा पुरुषार्थानुपयोगितया तज्जनकानां केवलवेदानाम-परविद्यात्वं चोपपन्नमेव ।

यथा पित्रपेक्षया पुत्रस्य स्वभावतोऽवरत्वेन पितुः पुरः पूज्यत्वा-भावेऽपि तपोज्ञानादिभिराधिक्ये तद्गुणप्रयुक्तश्रैष्ठ्येन पितुरपेक्षया श्रेष्ठत्वादि तद्वत्" इति ।

अत एव 'संहितापाठतः प्रोक्तं द्विगुणं पदपाठतः । ' इत्त्यारभ्य संहितापाठात् पदपाठस्य, ततः क्रमपाठस्य द्विगुणितफलहेतुत्वमुक्त्वा 'प्रत्यक्षरं तु लभते गायत्रीशतजं फलम्' इत्तनेनात्यन्तं ब्रह्मज्ञानहेतु-भूतब्रह्मसूत्राणामतिशयितफलत्वोक्तिरपि वराहपुराणोक्ता सुष्ठूप-पद्यते।

एवमेव ब्रह्मसूत्राणामुत्तमत्वे पुराणान्तरवचनान्यप्यनुसन्धेयानि । यथा -

"ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।" अतश्च पूर्वमुच्चार्याः सर्व एते सतां मता,' इति प्रमाणानुरोधेन 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यादिश्रुत्यनुसारेण चाध्याहृतः सूत्रकृता सूत्रप्रणयनात् प्रागेवोच्चारितः । एवञ्चायमोङ्कारः आद्यसूत्रं करिष्यामिति चिकीर्षाधीनाद्यसूत्रघटकपदानुकूलकृत्यविषय एवेति आद्यसूत्राघटकः। तथापि सूत्रावयव एव । एवमेव शिष्टैर्जैमिन्यादिप्रणीतसूत्रेष्वप्यवधेयम् । अथापि तद्भाष्यकारादिभिरोङ्काराव्याख्यानं परिमळोक्तदिशा अज्ञानाद् वा तत्सूत्रार्थेऽनुपयोगाद्वेति ज्ञेयम् ।

न चैवं सूत्राद् बहिरेवोङ्कारोच्चारणे सूत्राघटकोङ्कारापेक्षया सूत्रघटकातःशब्दस्य कथं तृतीयत्वमिति वाच्यम् । सूत्रवचनवेलायामोङ्कारमारभ्य अथशब्दातिरिक्तशब्दान्तरोच्चारणव्यवधानाभावेन तृतीयतयोच्चारणविषयत्वरूपतृतीयत्वस्याबाधितत्वात् ।

स्यादेतत् । यदि सूत्रप्रणयनात्प्राक् सूत्रकृता आदौ ओङ्कार उच्चारित इत्यत्र किञ्चिन्मानं निरवकाशमुपलभेमहि न चैवम् । 'ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्' इति प्रमाणं तु यथा वेदे ओङ्कारस्य प्रथमत उच्चारणं तथैव सूत्रे अथशब्दस्य प्राथमिकत्वमित्यर्थकम् । 'तृतीयोऽत उदाहृतः' इत्यस्यापि न साधकत्वम् । विष्णुना सृष्टिकाले तृतीयतयोदाहृतत्वस्य तत्प्रमाणादवगमेऽपि सूत्रे तृतीयतयोदाहृतत्वार्थे उदाहृतमानस्यौदासीन्यात् । 'अतश्च पूर्वमुच्चार्याः' इत्यस्यापि वेदपाठकाले आदौ ओङ्कार उच्चार्यः। सूत्रप्रणयने तु आदावथातःशब्दौ प्रयोक्तव्यौ इत्येवार्थः । ततश्चोङ्कारस्य सूत्रप्रणयनात् प्रागुच्चार्यत्वे निरवकाशप्रमाणमेव नास्तीति ।

अत्रोच्यते - 'सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।' इति पूर्ववाक्ये द्वयोरुत्पत्तिः स्मर्यते । एकनिःसरणक्षण एवापरस्योच्चारण-

रूपनिस्सरणस्य युगपदुच्चारणद्वयायोगेनायुक्तत्वात् क्रमे अवश्य-मनुसर्तव्ये तयोर्नामिग्रहणक्रमस्यैव बुद्धिस्थत्वात् स एव प्रतीयते। 'तस्मात्' इत्यनेन तमेव हेतूकृत्य विधीयमानमुभयोः प्राथम्यमेकत्रैव क्रमिकतया प्राथम्य एव युज्यते । एकस्य एकत्र प्राथम्येनान्यस्यान्यत्र प्राथम्ये तादृश क्रमस्याप्रयोजकतया तस्य हेतुत्वानुसरणासङ्गतिः। तस्मादेकस्मिन्नेव क्रमिकप्राथम्येऽवश्यमनुसर्तव्ये वेदस्याप्रसक्तत्वात् अथशब्दोच्चारणपूर्वकपाठस्य सम्प्रदायसिद्धत्वाभावाच्च सूत्रस्यैव ग्रहणमावश्यकम् । एवं च सूत्रविषयकप्रश्नप्रतिवचनात्मकत्वादस्य वाक्यस्य सूत्रविषयकत्वनिश्चयात् सूत्र एवोभयोः क्रमात् प्राथमिकत्वं सिध्यति ।

'अतश्च पूर्वमुच्चार्याः' इत्यस्य यत्र कुत्रचिदप्रसक्तेः यथाकथञ्चिदुच्चार्यत्वकथनस्य प्रसक्तसूत्रस्वरूपनिरूपणानुपयोगित्वात् अप्रसक्तवेदे ओङ्कारोच्चारणकथनस्यानाकाङ्क्षितत्वात् प्रकृतहाना-प्रकृतस्वीकारप्रसङ्गात् तद्वाक्येन पूर्वपक्ष्युक्तार्थाप्रतिभासाच्च ।

किञ्च 'तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' 'ओमित्युक्त्वा स्वकर्माणि कुर्वन्त्युद्दिश्य केशवम् ।' इत्यादिभिर्मानैः जपस्वाध्यायप्रवचनादिसत्कर्मानुष्ठानात् प्राक् कर्माङ्गतया माङ्गलिकोच्चारणं प्रथितमेव नापलपितुं शक्यते ।

इत्थं चोङ्कारः सूत्रकृता सूत्रादावभिप्रायविशेषेण प्रयुक्तः । अभिप्रायविशेषश्च 'स्रवती'त्यर्थवादबलेन पठनीयोऽयमोङ्कारः प्रथम-सूत्रेणैकवाक्यतामापन्नः अदृष्टमात्रनिर्वाहको वा भवतु प्रथमसूत्रान्वि-तस्वार्थबोधनद्वारा प्रथमसूत्रसाध्यविषयसिद्ध्यादौ अभ्युच्चययुक्ति-सूचको वा भवत्वित्याकारकसमूहालम्बनात्मकः । यथा धूमेन वा आलोकेन वा वन्ह्यनुमितिर्जायतामित्यादिरूपः ।

परैरपि एतादृशाभिप्रायविशेषोऽङ्गीकार्य एव । अन्यथा 'वदतीति

चेन्न प्राज्ञो हि 'प्रकरणात्' इत्येकं सूत्रं पठित्वा व्याख्याय अथवा 'प्रकरणात्' इति पृथक् सूत्रं पठित्वा व्याख्यानमसङ्गतं स्यात् ।

एवं चाद्यपक्षे प्रथमसूत्रादादावुच्चारितोङ्कारः तत्र वाक्यार्थान्वयेन दृष्टफलकः भवन् अदृष्टफलकश्च भूत्वा सूत्रावयवः । तथापि अथादिशब्द इव न सूत्रघटकः । द्वितीयपक्षे तु वाक्यार्थान्व- येनाथशब्दवदेव ओङ्कारस्सूत्रघटकः । आद्यपक्षमवलम्ब्य सूत्रभाष्या- दिप्रवृत्तिः । 'एवं निरपवादेनादावुच्चारणेनोङ्कारस्य प्रथमसूत्रे अवयव- तासिद्धौ' इति 'एवमनुमाने निरस्ते निरपवोदेनादावुच्चारणेन ओङ्कार- रस्यावयवतासिद्धौ उक्तमुपपन्नम्' इति सौधवचनमप्युक्तार्थे गमकम् इत्यादि विशिष्टवाक्यार्थः तारस्वरूपप्रकाशे सुन्दरतया निरूपितः।

द्वितीयपक्षावलम्बनेनानुव्याख्यान-सुधा-चन्द्रिकादि प्रवृत्तिः । अत एव 'तारश्चाथश्च ताराथौ तयोर्मूलत्वं क्रमेणादित्वम् । आदौ प्रयुक्तौ ओङ्काराथशब्दाविति यावत्' इति, 'एवं प्राप्ते सूत्रयामास भगवानाचार्यः - 'ओम् अथातो ब्रह्मजिज्ञासा' इति', 'यदुक्तं जीवव्य- तिरिक्त ईश्वर एव नास्तीति तत्परिहाराय सूत्रकृता ओङ्कारब्रह्मशब्दौ प्रयुक्तौ' इत्यादि सुधावचनानि च उक्तार्थे प्रमाणानि । पक्षद्वयमपि सुधाचन्द्रिकाकर्तृणां सम्मतमेवेति निपुणतरमुपपादितं तारस्वरूप- प्रकाश इति तदध्ययनेन ब्रह्मानन्दसहोदरानन्दमनुभवन्तु इति सुधियः प्रार्थ्यन्ते । पृथगुच्चरितो वेदितव्य इति सन्यायरत्नावल्यपि नाऽथशब्दवत् सूत्रोपनिबद्ध इति संहिततया सूत्रावयवत्वं प्रतिषेधति न पुनस्सूत्रावयवतामेव । अन्यथा 'न सूत्रनिबद्ध' इत्येवावक्ष्यत् ।

चन्द्रिकायां तु - 'स्रवत्यनोङ्कृतं ब्रह्मे'ति निन्दार्थवादबलेन आद्यन्तयोरोङ्कार उच्चार्यः । 'ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्' इति गारुडोक्तदिशा अथातश्शब्दतुल्यतया अन्य एव ओङ्कारस्सूत्रघटक इत्यङ्गीकार्यः । अस्मिन् पक्षे नारायणाष्टाक्षरमन्त्र

इव 'ओम् ओम् नमो नारायणाय ओम्' इतिवत् 'ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्' इति पाठः सम्भवति । अष्टाक्षरादाविव एक ओङ्कारः, ओतत्वरूपार्थबोधनेन सूत्रावयवः अन्यौ पुनरदृष्ट-मात्रार्थावनवयवौ चेति त्रय ओङ्काराः । एवं च सन्न्यायरत्नावली 'स्रवत्यनोङ्कृतं ब्रह्मेति श्रुतिप्राप्तसाधारणोङ्कारविषया सती स्मृतिप्राप्तासाधारणोङ्कारस्य न सूत्रावयवत्वं प्रतिषेधयतीति तस्यापि ओङ्कारस्य सूत्रघटकत्वं सम्मतमेव ।

यद्वा श्रुतिप्राप्तोङ्कारस्य स्मृतिविषयत्वसम्भवात् नोङ्कारद्वयं कल्प्यम् । स्मृतिप्राप्त एवोङ्कारः स्विष्टकृदादिन्यायेन प्रथमसूत्रे दृष्टादृष्टोभयार्थकः सन् द्वितीयादिसूत्रेषु तु अदृष्टमात्रार्थको भवति । सन्न्यायरत्नावल्युक्तं पृथक्त्वं तूह्यमानत्वमेव न पुनर्वाक्येऽनन्वय इत्यविरोधः । एवं च 'पृथगुच्चरितो वेदितव्य' इत्यस्य सर्वसूत्रेषूहनीयः न त्वेतत्सूत्रमात्रसम्बद्ध इत्यर्थ इति सुधा-सन्न्यायरत्नावल्याद्यविरोधः निपुणतरमुपपादितः। असंहिततयोच्चारणप्रयोजनं तूत्तरसूत्रेष्वनुगतिसूचनार्थमिति पूर्वमेव सुधायामुपपादितम् ।

अस्तु नाम प्रमाणगतिर्यथाकथाञ्चिदथापि ब्रह्मशब्देनैव विषय-सूचनात् नोङ्कारस्य सूत्रघटकत्वे प्रयोजनं पश्याम इति चेत्, मैवम्। न केवलं जिज्ञास्ये 'तद् विजिज्ञासस्व तद् ब्रह्म' इत्यादौ ब्रह्मपदश्रवणात् तस्य जीवाद्भिन्नत्वेन जिज्ञास्यता, अपि तु 'ओमित्येतदक्षर-मुद्गीथमुपासीत' 'आत्मानं जानथ' इत्यादौ जीवेष्वसम्भावितगुण-पूर्तिवाचकोङ्कारादिश्रवणादपीति नान्यतरवैयर्थ्यम् । 'ओतत्ववाची ह्योङ्कारः' इत्यनुव्याख्यानोक्तरीत्या व्याहृति-गायत्री-पुरुषसूक्तद्वारा वा 'तद्यथा सर्वाणि पर्णानि शङ्कुना सन्तृण्णान्येवमोङ्कारेणैव सर्वा वाक् सन्तृण्णा इत्यादि सुधोदाहृतश्रुत्या साक्षाद्वा ओङ्कारव्याख्यानरूपमीमांसा-नुग्राह्यवेदरूपप्रमाणोक्त्यर्थत्वादपि ओङ्कार आवश्यक एव ।

ननु ओङ्कारस्य सूत्रघटकत्वे गुणपूर्तिवाचित्वे च कथं ब्रह्मपदेनान्वयः? ब्रह्मशब्दस्यापि गुणपूर्णार्थकत्वेन घटो घट इत्यत्रेव गुणपूर्णं गुणपूर्णमित्यनन्वयात् इति चेत्, न । ओम् ब्रह्मशब्दयोरेकस्य यौगिकत्वमपरस्य रूढत्वं चाश्रित्य 'ओम् = गुणपूर्णस्य ब्रह्मणः = विष्णोः जिज्ञासा कर्तव्या इति सूत्रवाक्यार्थनिरूपणान्नानुपपत्ति-लेशोऽपि।

प्रादिर्शि च प्रकारान्तरं तारस्वरूपप्रकाशे यथा - 'ओम्पदस्य स्वरूपग्राहकत्वेन वाच्यतासम्बन्धेन ब्रह्मपदार्थेन्वयः । तथात्वेप्यनु-कार्यानुकरणयोरभेदपक्षे निपातत्वानपायाद् भेदान्वयोपपत्तिः । अस्य प्रमाणाभावशङ्कानिरासकत्वात् सूत्रकारीयतात्पर्यविषयता युक्ता । अनुकार्यानुकरणयोर्भेदपक्षेऽपि ओम् शब्दोत्तरं षष्ठ्या वा तृतीयाया वा 'सुपां सुलुक्' इति लुक् । वाच्यत्वं षष्ठ्यर्थो ब्रह्मण्यन्वेति । तृतीयापक्षे करणत्वं तृतीयार्थो जिज्ञासायामन्वेति ।

यद्वा ओङ्कारार्थो गुणपूर्णताविशिष्टः प्रकारितासम्बन्धेन जिज्ञासायामन्वेति । तथा च गुणपूर्तिविशेष्यिका अभेदसम्बन्धेन तादृशविशिष्टवस्तुप्रकारिका जिज्ञासा कर्तव्येति बोधः । '

एवं च वाक्यार्थान्वयस्य बहुधा निरूपितत्वेनोङ्कारस्योक्तदिशा सूत्रावयवत्वं प्रामाणिकमेवेति स्थितम् ।

मातृकास्वरूपविवृतिः : (Description of Manuscripts)

ओङ्कारवाद - तारस्वरूपप्रकाशग्रन्थसम्पादनायोपयुक्त - मातृकास्वरूपमितः परं निरूप्यते -

ओङ्कारवादः

क सं	ग्रन्थसंख्या	संज्ञा	परिमाणः	पत्राणि	पङ्क्तिः	अक्षराणि	लिपिः	स्थितिः	मातृकोपलब्धिस्थानम्
१	A १६६	क	२० X २० cm	१८	११	२७	दे	उत्तमा प्रायः	श्रीविद्याधीशप्राच्यग्रन्थसङ्ग्रहालयः, संस्थापकाः - प्रो.के.टि. पाण्डुरङ्गी वेंगळूरु
२	C १२७६	ख	२१ X २०	११	८	२८	दे	उत्तमा अशुद्धा	प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः मैसूरु
३	A २४०	ग	१८ X २२	१५	१०	२८	दे	उत्तमा प्रायः शुद्धा	श्रीजयतीर्थप्राच्यग्रन्थसङ्ग्रहालयः, संस्थापकाः - प्रो. प्रभञ्जनाचार्याः वेंगलूरु
४	A १५६	घ	२८ X २०	१६	११	२५	दे	प्रायः शुद्धा	पूर्णप्रज्ञविद्यापीठीयप्राच्यविद्यासंशोधनालयः, वेंगलूरु. संस्थापकाः-श्री पेजावरमठाधीशाः विश्वेशतीर्थश्रीपादाः

तारस्वरूपप्रकाशः

क सं	ग्रन्थसंख्या	संज्ञा	परिमाणः	पत्राणि	पङ्क्तिः	अक्षराणि	लिपिः	स्थितिः	मातृकोपलब्धिस्थानम्
१	C ८६१	क	३० X १०	४४	१४	५२	दे	उत्तमा प्रायः शुद्धा	प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः, मैसूरु
२	A ४२६	ख	३३ X ११	७३	८	५३	दे	उत्तमा प्रायः शुद्धा	श्रीजयतीर्थप्राच्यग्रन्थसङ्ग्रहालयः वेंगळूरु, संस्थापकाः - प्रो. प्रभञ्जनाचार्याः
३	A २८१	ग	३१ X १०	७०	८	४८	दे	उत्तमा	पूर्णप्रज्ञविद्यपीठीयप्राच्यविद्यासंशोधनालयः संस्थापकाः - श्रीविश्वेशतीर्थस्वामिपादाः पेजावरमठम्, उडुपि.

कृतज्ञतानिवेदनम्

स्वीयपूर्णप्रज्ञविद्यापीठीयप्राच्यविद्यासंशोधनालयात् मूलमातृकाप्रदानेनानुगृहीतवद्भ्यः प्रतिभा - वाक्यार्थपाटव-परमकारुण्याद्यनेकगुणगणमण्डितेभ्यः परमपूजनीयेभ्यः ममाध्यात्मविद्योपदे- शकेभ्यः श्रीपेजावरमठीय श्रीविश्वेशतीर्थस्वामिपादेभ्यः नमांसि भूयांसि समर्पये । तेषां कृपालेशत एवायं ग्रन्थः यथामति समशोधीति सविनयं विद्वत्सु निवेदये ।

तथैव मातृकाप्रदानेन प्रोत्साहितवद्भ्यः बेंगळूरु विश्वविद्यानिलय-संस्कृतविभागीयभूतपूर्व प्राध्यापकेभ्यः भारते अन्यत्र च सुप्रथितेभ्यः अप्रटितापूर्वग्रन्थसंशोधनप्रकाशनादिना विद्वन्मान्येभ्यः प्रो, के.टि. पाण्डुरङ्गीमहाभागेभ्योऽपि प्रणतयो विज्ञाप्यन्ते।

एवमेव मातृकाप्रदानेन प्रोत्साहकेभ्यः 'पण्डितरत्नम्' 'वेदान्तभूषणम्' 'विद्यावाचस्पतिः' इत्यद्युपाधिविभूषितेभ्यः पाठ-प्रवचन-ग्रन्थनिर्माणादिना विद्वन्मान्येभ्यः प्रो. प्रभञ्जनाचार्येभ्योऽपि प्रणतयो विज्ञाप्यन्ते।

इमौ कृतिरत्नौ यस्या भगीरथप्रयत्नाद् विदुषां करनलिनयो-रुपायनीकृतौ, यस्या मार्गदर्शने विदुषोऽविदुषोऽपि परमादरेण कर्तव्यपरायणा भवन्ति; या च मातुरिवास्माकं नितान्तमभिवृद्धिं कामयते, तस्याः डा. देवकी इति सुगृहीतनाम्न्याः अलङ्कारादि-शास्त्रपारङ्गतायाः भूतपूर्व निर्देशिकायाः उपकृतिं प्रोत्साहं च न कदापि विस्मरे । पूजार्हायास्तस्या प्रणतयो विज्ञाप्यन्ते ।

अधुना निर्देशकस्थानमलङ्कृत्य स्वीयपाण्डित्यप्रतिभया विनयादि गुणैश्च सर्वेषां प्रीतिपात्रेभ्यः अपूर्वानिकनिबन्धप्रणयनेन विविधदेशीय

विद्वद्भिः सम्मानितेभ्यः डा. के. वि. रमेशमहोदयेभ्यः सादरं प्रणतयो विज्ञाप्यन्ते ।

संशोधनकर्मणि प्रीत्यतिशयेन प्रोत्साहकेभ्यः 'पण्डितरत्नम्' 'वेदान्तभूषणम्' 'विद्यावाचस्पतिः' इत्याद्युपाधिविभूषितेभ्यः उपनिर्देशकेभ्यः आर्.जि. माळगि. एम्.ए. महोदयेभ्योऽपि प्रणतयो विज्ञाप्यन्ते ।

गहनवाक्यार्थपरिप्लुतस्यास्य ग्रन्थस्य संशोधनसमये तत्र तत्राज्ञानविपरीतज्ञानादिना संशयसमास्कन्दितचेतसो मे स्वीयनिर्ष्कृष्ट-पाण्डित्याप्रकटितग्रन्थसम्पादनानुभवादिना विशयान्निरस्य नितान्तमु-पकृतवद्भ्यः 'पण्डितरत्नम्' 'सच्छास्त्रप्रवचनविचक्षणरत्नम्' इत्याद्युपाधिविभूषितेभ्यः पि.एस्. शेषगिरि आचार्यः बि.एस्.सि., एम्.ए. महोदयेभ्यः सादरं नतिततयः समर्प्यन्ते ।

'गच्छतः स्खलनं क्वापि' इत्यादि न्यायेन विद्यमानदोषान्निरूप्य 'हंसक्षीरन्यायेन गुणावलोकनदीक्षाणां विद्वद्वरेण्यानां सर्वेषामपि करकमलयोः सविनयमिदमुपायनीक्रियते । नमो महद्भ्यः ।

10-10-1998
मैसूरु.

इति सज्जनविधेयः
आनन्दतीर्थ . वि. नागसम्पिगे, एम्.ए.
न्याय-वेदान्तविद्वान्
संशोधकः
प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः, मैसूरु.

ओङ्कारवादविषयानुक्रमणिका

तारस्वरूपप्रकाशविषयानुक्रमणिका

तारस्वरूपप्रकाशे उदाहृताः प्रमाणग्रन्थाः

श्रीविघ्नेश्वरान्तर्गतश्रीभारतीरमणमुख्यप्राणान्तर्गत

श्रीविश्वम्भराय नमः । श्री वेदव्यासाय नमः

ओङ्कारवादः

श्रीविद्याधीशतीर्थविरचितः

(मङ्गलाचरणम्)

द्योतयन्तं[1] दश दिशो भासा सूर्यसमानया ।
बुद्धिमन्तं हनूमन्तं दयावन्तमुपास्महे ।। १ ।।
तात्पर्यचन्द्रिकायुक्तं न्यायामृतकलानिधिम् ।
तर्कोडुताण्डवकृतं व्यासतीर्थ[2]विधुं भजे ।। २ ।।

"ओम् अथातो ब्रह्मजिज्ञासा" इति न्याय[3]ग्रथनात्मकब्रह्ममीमांसाशास्त्रस्यादिमसूत्रस्थोङ्कारो एतत्सूत्रावयवो न वेति प्रतिपत्तिः। नेत्यन्ये । भवत्येवेति व्यासमतानुयायिनः ।

(ओङ्कारः न सूत्रावयव इति वदतां मतोपन्यासः)

तत्रान्येषामयमभिसन्धिः । मेयसिद्धेर्मानाधीनत्वात् ओङ्कारस्यैतत्सूत्रावयवत्वे मानं वक्तव्यम् । [4]तच्च न तावत्प्रत्यक्षम् । असम्भवात्। ...पि विमत ओङ्कारः एतत्सूत्रावयवः शिष्टैस्तदादौ नियमेन

...दिश दशो.क.ख.
...विभुम्.ग.घ.गुरुम्.क.
...न्थ - क - ग्रन्थि - ग.
...च इति ख.ग.ध. कोशेषु नास्ति ।

पठ्यमानत्वात् । प्रथमसूत्रस्थाथशब्दवत् इत्यनुमानम् । जन्मादि-सूत्रोक्त ओङ्कारे व्यभिचारात् । तत्रादौ ओङ्कारस्यापि[1] अदृष्टार्थं नियमेन शिष्टैः पठ्यमानत्वेन[2] एतत्सूत्रावयवत्वाभावात् ।

किञ्चाध्ययनोपक्रमकाले अध्यापकैरुच्चार्यमाण ओङ्कारे व्यभिचारः। तत्र साध्याभावात् । किञ्च[3] ग्रन्थारम्भे माङ्गलिकशब्दोच्चारणवत् ओङ्कारस्याद्य[4]सूत्रानवयवत्वेपि उक्तहेतोरुपपन्नत्वेन अप्रयोजकत्वम्।

(ओङ्कारस्य सूत्राघटकत्वे अनुमानोपन्यासः)

अपि च विमत ओङ्कार नाद्यसूत्रावयवः लक्षणान्तराभावे सति असंहिततया सम्पाठे अखिलैः पठ्यमानत्वात् । वेदोपक्रमेऽध्या-पकैरुच्चार्यमाणोङ्कारवदिति सत्प्रतिपक्षः । 'सुध्युपास्य' इति वाक्यावयवे सुधीति पदे अखिलैः पठ्यमाने[5]व्यभिचारपरिहाराय असंहिततयेति। तत्र संहिततया पठ्यमानत्वस्य सत्वात्।[6] 'कृष्णा एहि' इति वाक्यावयवे अव्यभिचाराय लक्षणान्तराभावे सतीति । असंहितता-प्रापकसूत्रान्तराभावे सतीत्यर्थः । तत्र 'प्लुतप्रगृह्या अचि' इति सूत्रमेवास्तीति न व्यभिचारः । पदपाठकालेऽखिलैः असंहिततया पठ्यमानेषु पदेषु व्यभिचारपरिहाराय सम्पाठेति । संहितापाठकाल

1. दृष्टार्थं. क. ग.
2. तत्सूत्रावयवत्वाभावादिति पाठः साधुरिति भाति ।
3. ग्रन्थारम्भ इति नास्ति ख. घ.
4. सूत्राव्यवत्वे. ख. ग.
5. अव्यभिचारपरिहाराय. क. ग.
6. कृष्णा आयाहि क. ग.

इत्यर्थः । तत्पाठकालेऽपि[1] प्रामादिकेष्वसंहिततया पठ्यमानेषु[2] पदेषु व्यभिचारपरिहाराय अखिलैरिति । न हि सर्वेषां प्रमाद इति भवति तन्निरासः ।

न चाप्रयोजकता । तथात्वे अथशब्दवत् संहिततया निर्देशापत्तेः । न च दृष्टान्तः साध्यविकलः । 'ओमिति ब्रह्म' इतिवत्[3] नियतस्थानतया पाठप्रसङ्गात् ।

(स्मृतेरर्थान्तरोपन्यासः)

किञ्च "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा[4] विनिर्यातौ तस्मात् माङ्गलिकावुभौ ।
(ब.भा. 1.1. 1.) " इत्यादिना ओङ्कारस्य शङ्खवीणावेणुध्वनिवत् श्रुतितो माङ्गलिकत्वेन समस्त[5]शास्त्राङ्गतया अन्यार्थमुद्दिष्टस्य तस्य कथं सूत्रावयवत्वम् ।

(ओङ्कारस्य सूत्रानवयवत्वे सन्न्यायरत्नावली सम्मतिकथनम्)

किञ्च ओङ्कारस्य सूत्रावयवत्वे "ओङ्कारस्तु पृथगुच्चरितो वेदितव्यः। नाऽथशब्दवत् सूत्रोपनिबद्धः" (१.१.१)इति सन्न्यायरत्नावलीविरोधः कथं परिहरणीयः । "सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः" (ब्र.अ.1.1. 1.) इत्यनुव्याख्यान[6]विरोधश्च । तत्र उभयत्राऽपि पृथगित्यनेन[7] सूत्रानवयवत्वोक्तेः।

---

1. प्रामादिकेषु संहिततया. ख.घ.
2. पदेषु इति ख. ग. कोशेषु नास्ति ।
3. नित्य. ख.
4. समुत्पन्नो. ख.
5. शास्त्राद्य. क. ख.
6. विरोधः ख. ग.
7. सूत्रावयवत्वोक्तेः - क.

(ओङ्कारस्य सूत्रघटकत्वेऽपि विवक्षितासिद्ध्योङ्कारवैयर्थ्यशङ्का)

किञ्च ओङ्कारस्य सूत्रावयत्वे असौ क्वान्वित इति वक्तव्यम् । न तावत्तदर्थस्य ब्रह्मणा सहान्वयः । ब्रह्मणः [1]शब्दत उपसर्जनत्वेन तेन सहान्वयानुपपत्तेः पदान्तरोपात्तत्वादोतत्वस्य ।

किञ्च आद्यसूत्रे ओङ्कार एव कुतः ? प्रयोजनाभावात् । विषयसूचनार्थमिति चेन्न । ब्रह्मशब्देन तत्सम्भवात् ।

ननु 'बृह जाति जीव कमलासन शब्दराशिषु' इति रूढ्या जीवेऽपि ब्रह्मशब्दवाच्यत्वसम्भवेन न ब्रह्मशब्दमात्रेण ईश्वर[2]रूपविषयसिद्धिः । किन्तु जीवासम्भावितानन्तकल्याणगुण-पूर्त्यभिधायकोङ्कारोऽपेक्षित इति चेन्न । **'अथ कस्मादुच्यते ब्रह्मेति? बृहन्तो ह्यस्मिन् गुणाः'** (ब्र.न्या. 1.1.1.) इति न्यायविवरणोदाहृत विद्वद्योगेन, **'तदेवर्तं तदु सत्यमाहुः तदेव ब्रह्म परमं कवीनाम्'** (भाग.1.2.11.) इति विद्वद्रूढ्या च **'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते।** [3] **असम्पूर्णाः परे यस्मात् उपचारेण वा भवेत् । 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'** इत्यादिस्मृत्या (ब्र.भा.1.1.12.) **'ब्रह्मशब्दश्च विष्णावेव'** इति सावधारणभाष्येण मुख्यया वृत्त्या विष्णोरेव[4] ब्रह्मशब्दवाच्यत्वेन जीवादि- ग्रहणासम्भवात् ।

न च **"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते"** इति

---

1. शब्देन. ख. 2. स्वरूप. ग. स्वरूपविषयत्व. घ.
3. असम्पूर्णा इत्यारभ्य .....शब्द्यते इत्यन्तो भागः 'क' कोशे नास्ति ।
4. ब्रह्मवाच्यत्व. क. ब्रह्मशब्दवाच्यत्वसम्भवेन. ख.

[1]श्रौतार्थवादवललब्धश्रवणविशरणाभावरूपादृष्टमेव प्रयोजनमिति- नोङ्कारस्य वैयर्थ्यमिति वाच्यम् । अदृष्टार्थत्वेऽपि जन्मादिसूत्रोच्चार्य- माणोङ्कारवत्[2] आद्यसूत्रानवयवत्वप्राप्तेः ।

ननु "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" इत्यनुव्याख्याने सूत्रादित्वमुक्त्वा असौ व्याख्यातः । तदन्यथाऽनुपपत्त्या सूत्रावयवत्वं ज्ञायत इति चेन्न । तर्हि भर्गादिपदानामपि सूत्रावयत्वं स्यात् । 'स एव भर्गशब्दार्थः' इति तदर्थस्यापि[3] कथनात् । तद्व्याख्यानं च सर्ववेदव्याख्येयोङ्कारार्थवाचकनारायणपदवाच्यस्य सर्ववेदार्थतया तस्य शास्त्रविषयत्वमित्यभिप्रेत्यैव ।

(*सूत्रावयवत्वनिर्वचननिराकरणम्*)

किञ्च ओङ्कारस्य किमिदं सूत्रावयत्वं नाम ? न तावदाद्य- सूत्रार्थान्वय[4] प्रतियोग्यर्थोपस्थापकपदत्वम् । कर्तव्येति पदे अध्याहृते [5]अतिव्याप्तेः । नाप्यदृष्टार्थत्वे सति तत् । वाक्यप्रत्ययरूपदृष्टफल- त्वेनासम्भवात् । नापि दृष्टादृष्टोभयफलकत्वे सति पूर्वोक्तमिति वाच्यम् । तथात्वे अयमोङ्कारः [6]अनवयवोङ्कारादिभ्यो भिद्यते दृष्टादृष्टोभयफलकत्वे सति आद्यसूत्रार्थान्वयप्रतियोग्यर्थो- पस्थापकपदत्वात् इत्यनुमानेन इतरभेदसाधने व्यर्थविशेषणत्वात् । असाधारण्यात् । व्याप्तिरहितत्वाच्च । तस्मादोङ्कारस्य सूत्रावयवत्वं [7]निष्प्रमाणकम् ।

---

1. श्रुतार्थवाद. क. ग.
2. आद्येति क. घ. कोशेपु नास्ति । आद्यसूत्रावयवत्वाप्राप्तेरिति पाठः स्वरस इति भाति ।
3. तदर्थस्यापि कथनं तु तद्व्याख्येयोङ्कारार्थवाचक. क.
4. प्रतियोग्युपस्थापकत्वम् - क.
5. अव्याप्तेः - ख.
6. अन्यावयव. ख.
7. निष्प्रमाणिकम्. क.

(*मतान्तरमवलम्ब्य ओङ्कारस्य सूत्रावयवत्वोपपादननिरासौ।*)

अत्र केचित् **"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते"** इति श्रवणविशरणाभावरूपादृष्टार्थं प्रतिसूत्रं ब्रह्मविद्यात्वात् [1]सर्वसूत्रेषु आद्यन्तयोरोङ्कारः सर्वत्राध्याहार्य इत्येतदविवादम् । आद्यसूत्रोच्चार्यमाणोङ्कारो आद्यसूत्रार्थान्वित इति तदवयव इति मन्महे ।

न च ब्रह्मशब्देनान्वयानुपपत्तिः । अर्थवादार्थस्य प्राशस्त्यस्य 'यजेत' इत्यत्र यागविशेषणत्ववत् उपसर्जनीभूतेन ब्रह्मण सहोतत्वा[2]देरन्वयोपपत्तेः । न च ब्रह्मशब्देन विषयसूचनात् ओङ्कार-वैयर्थ्यम् । न केवलं **"तद् विजिज्ञासस्व तद् ब्रह्म"** इति श्रुतौ जिज्ञास्ये ब्रह्मपदश्रवणात् जीवभिन्नत्वेन जिज्ञास्यता किन्तु **"ओमित्ये-तदक्षरमुद्गीथमुपासीत"** इति श्रुतौ (छा.अ.1.) जीवेष्व - सम्भावितानन्तानवद्यकल्याणगुणपूर्तिवाचकोङ्कारश्रवणाच्चेति युक्त्यन्तरसूचकत्वेन सार्थक्योपपत्तेः । न च युक्त्यार्थान्तरसूचन व्यर्थम्। दाढर्यार्थत्वात्।

[3]न च पौनरुक्त्यम् । [4]'विशिष्टवाचकपदानां विशेषणसम-वधाने विशेष्यमात्रपरत्वम्' इति न्यायेन सौत्रब्रह्मशब्दस्य रूढ्य केवलविष्णुरूपार्थकत्वस्वीकारेणोङ्कारस्य तु गुणपूर्त्यभिधायकत्वेन अपौनरुक्त्यात् । यथा [5]"स कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यादौ ।

प्रमाणं त्वनुमानम् । विमत ओङ्कारः आद्यसूत्रावयव

1 सर्वत्र - क. सर्वत्र सूत्रेपु इति ख कोशे नास्ति ।

2. रन्वयानुपपत्तेः - ख. घ.

3. न च पौनरुक्त्यम् इति पङिक्तः क कोशे नास्ति ।

4. विशिष्टवाचकपदानां पृथक् विशेषणवाचकपदसमवधाने सति विशेष्यमात्र-परत्वमिति पाठेन भाव्यमिति भाति । 5. स कीचकैरित्यादि. क

प्रथमसूत्रार्थान्वितत्वात् प्रथमसूत्रस्थाथशब्दवत् इति । किञ्च "ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्" इत्यादिस्मृत्या (ब्र.भा.1.1.1.) "तत्र [1]ताराथमूलत्वं सर्वशास्त्रस्य चेष्यत" इत्यनुव्याख्यानेन च [2]अथातःशब्दतुल्यतया आद्यसूत्रावयवताया उक्तत्वेनोङ्कारस्याद्यसूत्रावयवत्वमिति आहुः ।

तदुपेक्षणीयम् । तथाहि यत्तावदुक्तं - आद्यसूत्रावयवत्वेऽनुमानं प्रमाणमिति । तच्चिन्त्यम् । "ओङ्कारः पृथगुच्चरितो वेदितव्यः । नाथशब्दवत् सूत्रोपनिबद्धः ।" इति सन्न्यायरत्नावलीविरोधात् । "सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः" इत्यनुव्याख्यानविरोधश्च स्यात् । साध्यसमत्वाच्च ।

किमिदम् आद्यसूत्रावयवत्वम् ?[3] आद्यसूत्रार्थान्वितप्रतियोग्यर्थोपस्थापकपदत्वं चेत् [4]हेतुरपि स एव । तथा च साध्यसमः कथं न स्यात् ।

ओङ्कारो न आद्यसूत्रावयवः लक्षणान्तराभावे सत्यसंहिततया सम्पाठेऽखिलैः पठ्यमानत्वात् इति[5] सत्प्रतिपक्षश्च [6]आनन्तर्यप्रतिपादकत्वरूपोपाधेश्च ।[7] माङ्गलिकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् नाथशब्दे साध्याव्यापकता ।

---

1. वाराथ. क.
2. अतःशब्दतुल्यतया. क. अथशब्दतुल्यतया. घ.
3. नाद्यसूत्रान्वप्रतियोग्युपस्थापकत्वं - क.
4. हेतुरपि इति ग कोशे नास्ति.
5. सत्प्रतिपक्षत्वात् - क.
6. आनन्तर्याप्रतिपादक. क. ग.
7. माङ्गलिकरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्नाथशब्देन साध्यव्यापकता - क.

किञ्च जन्मादिसूत्र उच्चार्यमाण ओङ्कारः तदवयवः सप्रयोजनत्वात् सम्मतवदित्याभाससाम्यम् । अध्ययनोपक्रमकाले उच्चार्यमाण ओङ्कारः पक्षतुल्य एवेति न तत्र व्यभिचारः शङ्कनीयः । कर्तव्येतिपदस्य जिज्ञासान्वितत्वेपि [1]आद्यसूत्रानवयवत्ववत् ओङ्कारस्यापि सूत्रान्वितत्वेपि[2] अनवयवत्वोपपत्त्या अप्रयोजकत्वं च । कर्तव्येतिपदे[3] सूत्रार्थान्विते व्यभिचाश्च । अदृष्टार्थत्वे सतीति विशेषणे आनन्तर्यप्रतिपादकत्वरूपदृष्टार्थकेऽथेतिशब्दे उक्तहेतोरभावेन पक्षमात्रव्यावृत्या असाधारण्यम् । [4]असिद्धेश्च। [5]उपसर्जनीभूतब्रह्मणा सह पदान्तरोपात्तोतत्वादेरन्वयानुपपत्तेः।

[6]न चार्थवादस्य प्रशस्तस्य उपसर्जनीभूतयागविशेषणत्वस्येव ब्रह्मणि ओतत्वादेः [7]अन्वयः सम्भवतीति शङ्क्यम् । यागविशेषणत्वे बाधकाभावात् । प्रकृते वैयर्थ्यलक्षणबाधकस्योक्तत्वात् । एवं च असिद्धिः, व्यभिचारः, अप्रयोजकत्वम्, आभाससाम्यम्, उपाधिः, सत्प्रतिपक्षत्वं साध्यसाम्यापादनं विरोधद्वयं चेति उक्तनवदूषणभूषितत्वादनुमानं न मानम् ।

[8]यदपि [9]सूत्रावयत्वे भाष्योदाहृतस्मृति[10]र्मानमस्तीति । तदप्यसत् । अतश्च 'पूर्वमुच्चार्या' इत्यनेन ओङ्कारस्यादावुच्चार्यमाणत्वस्यैव विधीयमानत्वेन [11]सूत्रावयवत्वानुक्तेः ।

---

1. आद्येत्यारभ्य अप्रयोजकत्वात् इत्यन्तो भागः ख कोशे नास्ति ।
2. अवयवत्वापत्या. क.
3. सूत्रार्थसमन्वये. क.
4. असिद्धेः - ख.
5. उपाङ्गभूत. ग. उपांशुभूत. घ.
6. न चार्थवादार्थस्य प्राशस्त्यस्योपसर्जनीभूतेत्यादि पाठेन भाव्यमिति भाति
7. अन्वय इति क कोशे नास्ति ।
8. यद्यपि. क.
9. सूत्रानवयवत्वे. ख.
10. मौनम् । घ.
11. सूत्रानवयकत्वानुत्तेः. ख.

न चाथातःशब्दतुल्यतयोच्यमानत्वान्यथानुपपत्त्या ओङ्कारस्या - द्यसूत्रावयवत्वं ज्ञायत इति वाच्यम् । तर्हि तस्याद्यसूत्रावय - वत्वेऽन्यथानुपपत्तिः प्रमाणमित्युक्तं स्यात् । तस्या[1] अनुमानरूपतया प्रागेव दूषितत्वात् ।

यच्चोक्तं दार्ढ्यार्थं हेतुद्वयसूचनमिति । तदपि मन्दम् । सौत्रब्रह्मशब्दार्थप्रतिपादकश्रुतिस्मृतिवाक्यार्थपर्यालोचनया ब्रह्म - शब्देनैवातिदार्ढ्योपपत्तेः । सूत्रत्वहानेश्च [2]तेषां निर्णायकत्वात् ।

यदपि पौनरुक्त्यपरिहाराय 'विशिष्टवाचकानाम्' इत्यादिवा - णिरभाणि । तन्न । तर्हि सर्वत्राप्येवं वक्तुं शक्यत्वेन पुनरुक्तेः क्वापि दोषत्वं न स्यात् । ब्रह्मशब्दस्यापि स एव ब्रह्मशब्दार्थ' इति सुधायां [3]गुणपूर्णार्थत्वस्य प्रतिपादितत्वात् तद्विरोधापत्तेश्च । तस्मादोङ्कारो न सूत्रावयव इति पूर्वःपक्षः ।

(ओङ्कारस्य सूत्रावयवत्वोपपादकसुधाशयोपवर्णनम्)

अत्र टीकाकाराः - "**स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते** " इत्यर्थवादबलेन प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योह्यः कर्तव्यः । न चोह्यमानं वाक्यात्[4] पृथगिति शक्यते वक्तुम्। [5]तथात्वे मन्त्रेष्वप्यूह्यमानस्य[6]मन्त्रानवयवत्वप्रसङ्गात् । ओङ्कारार्थस्योतत्वादेः[7] आद्यसूत्रार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहिततया निर्देशस्तु

1. अनुरूपतया. ग.
2. निर्णायकत्वाभावात्. क. ख.
3. गुणपूर्णार्थकत्वे. - ख.
4. पृथक् इत्येवास्ति. क.
5. तद्यथा. ख.
6. मान्त्रावयवत्व. ख.
7. आद्यासूत्रवयत्वादर्थे

सर्वसूत्रेष्वनुगतिसूचनार्थः" इति ओङ्कारस्याद्यसूत्रावयवत्वं सुधायामाहुः।

अत्रेदं शङ्क्यते - एवं सति "अग्नये[1] जुष्टं निर्वपामि" इत्यत्राग्नि-पदस्थाने सूर्यपदस्योहः सम्भवति, तत्र स्थानिनोऽग्निपदस्य सत्वात्। [2]नेह चोहः सम्भवति । स्थानिनोऽभावेन ऊहलक्षणाभावात् पूर्वमीमांसाविरोधः स्यात् । यथोक्तं - "[3]**प्राकृतस्थानपति-तपदार्थान्तरकार्यतः । ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः**" (न्या.प.) इति । न च सुधास्थोहशब्देनाध्याहारो लक्ष्यत इति वाच्यम् । साकाङ्क्षत्वाभावात् । किञ्च मन्त्रेष्वप्यूह्यमानस्य मन्त्रानवयवत्व-मिष्टमेव मीमांसकानाम् । तैरूहप्रवरनामधेयानाममन्त्रत्वस्य द्वितीये सिद्धान्तितत्वात् ।

[4]किञ्च ओङ्कारार्थस्योतत्वादेः न वाक्यार्थे समन्वयः । ब्रह्मणः शब्दत उपसर्जनत्वेन पदान्तरोपात्तोतत्वादेरन्वयानुपपत्तेः । अपि च यथाकथाञ्चिदन्वयसम्भवेऽपि आदावेव प्रयोगेण चरितार्थत्वादन्ते प्रयोगवैयर्थ्यम् ।

किञ्च[5] 'ङ्याप् प्रातिपदिकात्' इत्यधिकारसूत्रे विद्यमानस्य "ङ्यन्तादाबन्ताच्च प्रातिपदिकात् परे स्वादिप्रत्ययाः स्युः" इति अनुष-क्तस्यापि ङ्यन्त[6] अन्वयदर्शनात् प्रकृतेप्योङ्कारार्थस्यापि जन्मादि-सूत्रेष्वन्वयो वाच्यः । स चाशक्यः । किञ्च "ओङ्कारः पृथगुच्चरितो

---

1. जोषं - क.
2. न चोहः - ख.
3. प्रकृत. ख.
4. किञ्चेति क कोशे नास्ति ।
5. ङ्याप् प्रतिपदिकात् इत्यधिकृत्याधिकारसूत्रे विद्यमानस्य नञः ङ्यन्तादावन्तात् प्रतिपदिकाच्च इति - ख.
6. अन्वयोऽप्यदर्शनात्. क.

वेदितव्यः नाथशब्दवत् सूत्रोपनिबद्ध इति सन्न्यायरत्नावलीविरोधः सुधाया इति ।

(*तात्पर्यचन्द्रिकोक्तसमाधानविवरणम्*)

अत्र व्यासतीर्थश्रीमच्चरणा आहुः -

"नात्रोहशब्दो[1] मीमांसकाभिमतोहपरः" । किन्तु "अध्याहारस्तर्क ऊह" इति प्रसिद्ध अध्याहारो ऊहशब्देन विवक्षितः ।

न च साकाङ्क्षत्वाभावः । दृष्टार्थाभावेऽपि श्रवणविशरणाभावरूपादृष्टार्थसद्भावात् । अत एव च नान्ते प्रयोगवैयर्थ्यम् । नाप्युत्तरसूत्रे अनन्वयदोषः। अदृष्टार्थत्वस्य सत्वात् ।

यच्चोक्तं - मन्त्रेषूह्यमानस्य मन्त्रानवयवत्वमिष्टमिति । तदपि न । मन्त्रानवयवत्वपदेन मन्त्रेण सहैककार्यकारित्वाभावस्य विवक्षितत्वेनेष्टापत्तेर्वक्तुमशक्यत्वात् ।

यदपि - ओङ्कारार्थस्य ओतत्वादेर्ब्रह्मणि समन्वयो न सम्भवतीति। तदप्यसत् । "सप्तदशारत्निर्वाजपेयस्य यूपो भवति" इत्यत्र सप्तदशारत्नित्वस्य प्रधानभूतवाजपेयस्यागेनानन्वयेऽपि

---

1. "अग्नये जुष्टं" इत्यादौ "सूर्याय जुष्टं" इत्यादिः मन्त्रोहः । "यद्योन्यां तदुत्तरयोर्गायति" इति कवतीषु रथन्तरं गायति "इत्यादिषु प्रकृतिग्रन्थे योनावाम्नातानां साम्नामुत्तरादिषु तत्तदानुगुण्येनान्यथागानं सामोहः । व्रीहिषु श्रुतानामवहननादीनां वैकृते नीवारादिषु औचित्येनानुष्ठानं संस्कारोहः, इत्येतेषां निर्देशके "मन्त्रसामसंस्कारोहः" इत्यादौ मीमांसकव्यवहारे ऊह्यत इति व्युत्पत्या यथा प्रयोगविकारपर ऊहशब्दः न तथा प्रकृते, "ऊह वितर्के" इत्यस्मात् धातोर्भावे घञि लघूपधत्वाभावेन गुणाभावे चोह इति सिद्धेरध्याहारपर इत्यर्थः । व्यक्तमेतत् चन्द्रिकाप्रकाशे ।

2. यागेन सहान्वयाभावेपि. क. घ.

[1]अप्रधानभूतयूपान्वयवत् अङ्गावतारन्यायेन ओतत्वस्य प्रधानभूत-जिज्ञासानन्वितत्वेऽपि उपसर्जनीभूतब्रह्मण्यन्वये बाधकाभावात् । [2]अर्थवादार्थस्य प्राशस्त्यस्य "यजेत" इत्यत्रोपसर्जनीभूतयागविशेषण-त्वदर्शनाच्च । "दण्डिनं पश्य" इत्यादौ दण्डस्योपसर्जनस्य [3]विध्यन्वयदर्शनाच्च ।

न च ब्रह्मशब्देन विषयसूचनादोङ्कारवैयर्थ्यम् । न केवलं जिज्ञास्ये ब्रह्मणि **"तद् विजिज्ञासस्व"** इत्यादौ ब्रह्मशब्दश्रवणात् जीवभिन्नत्वेन जिज्ञास्यता अपि तु **"ओमित्येतदक्षरमुद्गीथमुपासीत"** इत्यादौ जीवेष्वसम्भावितगुणपूर्त्यभिधायकोङ्कारश्रवणाच्चेति युक्त्यन्तरसूचकत्वेन सार्थक्यात् । अदृष्टार्थमवश्यं[4] प्रयोक्तव्यत्वाच्च न वैयर्थ्यम् ।

न च[5] पौनरुक्त्यम् । ओङ्कारार्थस्योतत्वादेर्गुणस्य ब्रह्मशब्देन साक्षादप्रतिपादनात् आर्थिकपौनरुक्तेरदोषत्वात् । नापि सन्न्याय-रत्नावलीविरोधः शङ्क्यः ।[6] मास्तु "स्रवत्यनोङ्कृतं" इत्यनेन श्रौतार्थ-वादेनोक्तसाधारणोङ्कारस्याद्यसूत्रावयवता । तथापि **"ओङ्कारश्चाथ-शब्दश्च तस्मात् प्राथमिकौ क्रमात्"** तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः । **"अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः"** (ब्र.सू. भा.1.1.1.) इति भाष्योदाहृतस्मृत्या अथातश्शब्दतुल्यतया [7]उक्तासाधारणोङ्कारस्य आद्यसूत्रावयवत्वे बाधकाभावात् । "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" इत्यनुव्याख्यानेऽपि

1. प्रधान. ख.
2. अर्थवादस्य. क.
3. विध्यनन्वयदर्शनाच्च. ख.
4. प्रयुज्यत्व. ग.
5. पुनरुक्तयम्. क.
6. अत एवैतच्छङ्कापरिहाराय पक्षान्तरमुक्तं चन्द्रिकायां यद्वेत्यनेनेति. क.
7. उक्तं साधारण. ग.

अथशब्दतुल्यतयोङ्कारस्योक्तत्वाच्च ।

एवं च सन्न्यायरत्नावली "स्रवति" इत्यादि श्रौतार्थवादलब्ध-साधारणोङ्कारपरा इति[1] न तद्विरोधः । सुधा तु "ओङ्कारश्चा-थशब्दश्च" इत्यादिस्मृतिप्रापिताऽसाधारणोङ्काराविषयेति बोध्यम् इति।

न च "**स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते**" इति श्रौतार्थ-वादबलेन प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योहः कार्य इत्यध्याहारापरपर्यायत्वोक्तिस्तस्य न स्यादिति वाच्यम् । तस्याः श्रौतार्थवादबललब्धसाधारणोङ्कारविषयत्वात् । अत एव प्राचीनकोशेषु "ओम् ओम् अथातो ब्रह्मजिज्ञासा" इति पाठः दृश्यते ।

एवं च "विमत ओङ्कारः आद्यसूत्रावयवः माङ्गलिकत्वे सति [2]अदृष्टार्थत्वे सति सूत्रार्थान्वितत्वात् सौत्राथशब्दवत् । आद्यसूत्रा-नुसंहितत्वाच्चेत्यनुमानात्[3] ओङ्कारस्य सूत्रावयवत्वसिद्धिः । न चाप्रयोजको हेतुः । भाष्योदाहृतस्मृतिविरोधस्यैव विपक्षे बाध-कत्वात्। प्रथमसूत्रवाक्यार्थे ओतत्वादेरन्वयेन अवयवत्वनिश्चयाच्चेति सुधाविरोधाच्च नाप्रयोजकता ।" अत एव नोपाधिः । समव्या-स्यभावाच्च ।

न चोङ्कारस्य संहिततया निर्देशे, "असंहिततया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थः" इति सुधाविरोध इति वाच्यम् । तस्यापि

---

1. न तद्विरोध इति ग कोशे नास्ति
2. दृष्टत्वे सति. ख.
3. ओङ्कारस्येत्यारभ्य विपक्षे बाधकत्वात् इत्यन्तो भागः घ कोशे एवोपलभ्यते ।

साधारणोङ्कारविषयत्वात् ।

न च विमत ओङ्कारः न आद्यसूत्रावयवः लक्षणान्तराभावे सत्यसंहिततया सम्पाठे अखिलैः पठ्यमानत्वात् वेदोपक्रमोच्चार्यमाणोङ्कारवदिति सत्प्रतिपक्ष इति वाच्यम् । असंहिततया निर्दिष्टत्वस्योपाधित्वात् । आद्यसूत्रानन्वितत्वस्योपाधित्वाच्च । उक्तरीत्या ओङ्कारस्य संहिततया निर्देशेन विशेषणासिद्धेश्च । माङ्गलिकत्वावच्छिन्नसाध्यव्यापकत्वस्य द्वितीयोपाधौ विवक्षिततया न कर्तव्येति पदे साध्याव्यापकता शङ्क्या । कर्तव्येतिपदेऽध्याहृते व्यभिचारपरिहाराय माङ्गलिकत्वे सतीति। अदृष्टार्थत्वे सतीति । तु स्वरूपकथनार्थमिति द्रष्टव्यम् । तस्मादोङ्कारः सूत्रावयव इति स्थितम्।

इति श्रीविद्याधीशतीर्थविरचितः ओङ्कारवादः

समाप्तः

श्रीमध्वेशार्पणमस्तु । शुभम् ।

विघ्नेश्वरान्तर्गतश्रीभारतीरमणमुख्यप्राणान्तर्गत
श्रीरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ।

ता र स्व रू प प्र का शः

हुलगी श्रीनाथाचार्यविरचितः

(*मङ्गलाशंसनम्*)

श्रीमद्व्यासाङ्घ्रियुगलं रमाद्यैः शिरसा धृतम् ।
ज्ञानानन्दप्रदं वन्दे सर्वविघ्नोपशान्तये ।।१।।

श्रीमदानन्दतीर्थार्यान् भक्त्या नौमि निरन्तरम् ।
शिवाद्या अपि यद्भाष्यप्राप्तज्ञानाश्चकाशिरे ।।२।।

जयराजार्यतरणिर्मद्हृस्थध्वान्तनाशकः ।
भूयात् स्ववचसामर्थबोधं दिशतु सर्वदा ।।३।।

श्रीव्यासराजप्रमुखान् मुनीन् वन्दे सदोद्यतः ।
रघुनाथाभिधानांश्च नौमि मे परमान् गुरून् ।।४।।

मद्गुरूंश्च पितृंश्चापि वासुदेवाभिधान् वयम् ।
नत्वोङ्कार[1] स्याद्यसूत्रावयवत्वं विवृण्महे ।।५।।

अथोङ्कारस्याद्यसूत्रे अन्वयप्रतियोग्युपस्थापकत्वमदृष्टार्थत्वं चेत्युभय[2]विधमवयवत्वं, द्वितीयादिसूत्रेष्वदृष्टार्थत्वमात्रं, न तु

1. स्याथ - ख.
2. विधत्वं - ग.

(*ओङ्कारस्य सूत्रावयत्वं नास्तीति पूर्वपक्षः*)

श्रीसुधा- नन्वत्र सूत्रादावोङ्कार एव न विद्यते । तत्कथमुच्यते ताराथमूलत्वमिति। यद्यपि शिष्टैरध्येतृभिरुच्चार्यमाणोऽ -

---

तारस्वरूपप्रकाशः

वक्ष्यमाणव्याख्यानोपयोग्यन्वयप्रतियोग्युपस्थापकत्वं, शास्त्राध्येतृणां श्रुतितो मङ्गलसम्पादकत्वेन समस्तशास्त्राङ्गत्वमित्युक्तं सुधायाम् ।

(ओङ्कारस्य सूत्रावयवत्वप्रतिपादकसुधावाक्यार्थनिरूपणम्)

अत्र केनचिद् रामानुजीयेन सुधाशयाद्यज्ञानेन दूषणान्युत्प्रेक्षितानि। तन्निरासाय सौधफक्किकाशयस्तावन्निरूप्यते-**नन्वत्र सूत्रादाविति** । आदिसूत्रस्यादिभाग इत्यर्थः । प्रथमसूत्रत्वावच्छिन्नविषयकेच्छाधीना या आद्यसूत्रानुकूला कृतिस्तद्विषयताविशिष्टो यः स नेत्यर्थः । ओङ्कारपूर्वकं सूत्र[1]स्यापाठादिति हेतुः स्फुटः । **तदिति**। प्रथमसूत्रघटकतयोङ्कारस्य सूत्रकृता अनुक्तत्वादित्यर्थः।

ननु कैश्चित्तस्यापठितत्वं सूत्राघटकत्वे हेतुरुत सर्वैः । नाद्यः। कैश्चिदथशब्दाघटिततया भ्रान्त्या उच्चारणसम्भवेन तत्रोक्तहेतोर्व्यभिचारापत्तेः । न द्वितीयोऽसिद्धेरित्यभिप्रेत्य शङ्कते - **यद्यपीति**।

नन्वेवं तर्हि इदं पदमेतद्वाक्यघटकमिदं नेति व्यवस्था न[2] स्यात्। सर्ववाक्यानामपि कैश्चित्तदघटकपद[3]साहित्येन पाठसम्भवादित्यत उक्तं - **शिष्टैरिति** । अभ्रान्तैरित्यर्थः । तथा च प्रथमसूत्रोच्चारणेच्छावदभ्रान्तपुरुषसम्बन्ध्युच्चारणविषयत्वहेतु*र

---

1. स्य पाठादिति - ग.
2. न इति. क. कोशे नास्ति. 3. सामर्थ्येन. ग.
* र्नाऽसिद्ध इति पाठेन भाव्यमिति भाति ।

श्रीसुधा - ध्यक्षसिद्धः । तथापि नासौ सूत्रावयवः । लक्षणान्तराभावे सत्यसंहिततया सम्पाठेऽखिलैः पठ्यमानत्वात् । वेदाध्ययनोपक्रमेऽध्येतृभिरुच्चार्यमाणोङ्कारवत् ।

तारस्वरूपप्रकाशः

सिध्दः, इदानीन्तनोच्चारणेन पूर्वपूर्वतनशिष्टोच्चारण-रूपपरम्परामूलत्वेन सूत्रकारीयोच्चारणविषयत्वस्यैव सिद्ध्या तेनैवाथशब्दादिवत्सूत्रावयवत्वं सिद्ध्यतीति भावः । तादृशोच्चारण विषयत्वमङ्गीकृत्येदानीमभिमतस्यावयवत्वस्याभावं साधयति-तथापीति ।

'नायं सूत्रावयवः' इति क्वचित्पाठः । अत्र साध्यमानमनवयवत्वं तदघटकत्वं "वक्ष्यमाणन्यायेन" इत्युत्तरग्रन्थासङ्गतेः । तेन प्रथमसूत्रार्थे ओङ्कारार्थस्य [1]समन्वयकथनेनोक्तानुमानस्य बाधकथनात् । समन्वयेऽपि तद्विषयताव्यापकस्व[2]विषयताकत्वरूपतद्घटकत्वा-सिध्या बाधाप्रसक्तेः । अन्यथा 'तत्तु' इत्यस्य 'ईक्षतेः' इत्यादिसूत्रा-र्थसमन्वितार्थकत्वेन [3]तत्सूत्रघटकत्वापत्तेः । एवम् अथवा दृष्टान्तदूषणं इत्युत्तरग्रन्थासङ्गतिश्च ।[4]ओङ्कारार्थस्य वेदवाक्यार्थेऽनुसन्धानेऽपि वेदवाक्यघटकत्वाभावेन दृष्टान्ते साध्यवैकल्याप्रसक्तेः । किन्तु प्रथमसूत्रघटकपदार्थान्वितस्वार्थबोधजनकत्वेन[5]तत्पाठकेच्छारूप-तात्पर्यविषयत्वाभावरूपमेव । न चाद्यसूत्रानुकूलकृतिविषयत्वा-भावस्यैव पूर्वं प्रसक्तत्वात्तस्यैव साध्यतया तद्विहाय साध्यान्तरा-दरणेऽनाकाङ्क्षिताभिधानापत्तिरिति वाच्यम् । मङ्गलप्रयोज-

---

1. अत्र समन्वय शब्दः अन्वय इत्यर्थे प्रयुक्त इति भाति ।
2. स्वविषयत्व. ग.
3. तत्सूत्राघटक - क.
4. ओङ्कारस्य. ग.
5. तत्पाठेच्छा - ख.

श्रीसुधा - अन्यथा अथशब्दवत्संहिततया निर्दिश्येत ।

तारस्वरूपप्रकाशः

कत्वसहिते प्रथमसूत्रतात्पर्यविषयीभूतबोधोपयोग्यर्थतात्पर्यकत्वरूपे मूलत्व एवेदानीं मुख्यतो विवादस्य प्रसक्तत्वेनोक्तसाध्यस्यैवाकाङ्क्षि- P'^kkP~< ¢P . ^kkIkIRYkkk ^kdZklP [1]'एवं चायमोङ्कार' इत्यादिना।

"सूत्रादौ न विद्यत" इत्यादिना सूत्रानुकूलकृतिविषयत्वाभावस्तु पौरुषेयतत्तद्वाक्यार्थोपयेगिपदानां तत्तद्वाक्यानुकूलकृतिविषयत्व-स्यैवोत्सर्गतो दृष्टतया तादृशौत्सर्गिक[2]व्यापकाभावस्तादृशपद-त्वरूपौत्सर्गिकव्याप्याभावसाधनाय शङ्कितः । इदानीं पुनरध्येतृ-परम्परसिद्धसूत्राकारीयोङ्कारोच्चारणबला[3] त्सूत्रानुकूलकृतिविषयत्वं वा तत्कृत्यतिरिक्तकृतिविषयत्वं वाऽस्तु । तावतैव प्रथमसूत्रार्थेऽन्वये बाधकाभाव इत्याशङ्कायां, तथात्वेऽपि प्रथम[4]सूत्रार्थान्वितार्थानु-भावकत्वमोङ्कारस्य न घटत एवेति ओङ्कारस्योक्तमूलत्वं न युज्यत इति वक्तुमुक्तविधावयवत्वाभावस्यैव साध्यत्वौचित्यम् । अत एव **सुधापरिमळे** अत्रत्यावयवपदं धृत्वा अन्वयप्रतियोग्युपस्थापक इति व्याख्यातम् ।

लक्षणान्तरेति । 'असंहिततया' इत्येतत् 'पठ्यमानत्वात्' इत्यने-नान्वेति । 'संपाठे' संहिताकार्यपूर्वकपाठ इत्यर्थः । '**लक्षणान्तर**' इति 'असंहितया' इत्येतत् 'पठ्यमानत्वात्' इत्यनेनान्वेति। 'सम्पाठे'

---

1. एवं चायमित्यादिवाक्यं. ग. कोशे नास्ति ।
2. व्याप्याशास. ख.
3. सूत्रानुकूलकृतिविषयत्वं वा इति. ग. कोशे नास्ति ।
4. त्रान्वितार्थ. ख.

श्रीसुधा - न च दृष्टान्तः साध्यविकलः । अध्ययनोपक्रमविरति-वैचित्र्येण तत्तत्स्थानपरित्यागेनान्यान्यस्थानेऽखिलैः पठ्यमानस्य वेदवाक्यानवयवतायाः सुप्रसिद्धत्वात् । अन्यथा अध्ययनो-पक्रमविरतिवैचित्र्येऽपि 'ओमितिब्रह्मे' त्यादिवत् नियतस्थानतया पाठप्रसङ्गात् । पक्षसपक्षयोरादावुच्चारणं तु प्राङ्मुखत्वादिवदध्य-यननियमान्तर्गतमध्येतृभिरनुष्ठीयत इत्यस्तु । एवं चायमोङ्कारः सूत्रकृता मङ्गलार्थतया सूत्रादावुपनिबद्ध इत्यनुपपन्नमित्यताह - सर्वत्रेति ।

तारस्वरूपप्रकाशः

संहिताकार्यपूर्वकपाठ इत्यर्थः। 'रामकृष्णावमू आसाते' 'इन्द्रवायू इमे सुताः' 'चक्षोः सूर्यो अजायत' इत्यादौ 'अमू वायू' इति पदे सूर्यादिपदे च व्यभिचारवारणाय लक्षणन्तर इति। संहिततयोच्चारणविषयत्वाभावग्राहक [1] प्रमाणाविषयत्वे सतीत्यर्थः। 'असंहिततया' इत्यस्य प्रकृतिभूतानुपूर्वीविजातीयानुपूर्वि[2]कत्वाभावव त्तयेत्यर्थः । तेनोक्तस्थलेष्वपि उच्चार्यमाणानुपूर्व्या अपि [3]संहिताधिकारीयसूत्रप्राप्तत्वेन संहितारूपत्वेन व्यभिचाराप्रसक्तेः 'लक्षणान्तर' इत्यस्य वैयर्थ्यमिति शङ्कानवकाशः । पदकाल असंहि-ततया[4] पठ्यमानाग्न्यादिपदेषु व्यभिचारवारणाय 'सम्पाठे' इति। ब्रह्मसूत्रपाठकाले जिज्ञासान्वितकर्तव्यताबोधककर्तव्यादिपदे कदाचिदसंहिततया पठ्यमाने व्यभिचारवारणाय 'अखिलैः' इति ।

ननु यथाकथञ्चिदखिलैः पठ्यमानत्वं कर्तव्यादिपदेष्वप्यस्तीति

---

1. प्रामाण्यविषयत्वे. क. ग.
2. कत्वाभाव इति. ग कोशे अस्ति । क कोशे तु नास्ति ।
3. संहिताकरणसूत्र - ग.
4. पठ्यमानपदेषु. क.

तारस्वरूपप्रकाशः

व्यभिचारवारणमक्षमम् । [1] निरुपचरिताखिलपठ्यमानत्वं तु ओङ्कारेऽपि नास्तीत्यसिद्धिरिति चेन्न । सूत्रार्थानुसन्धानपूर्वकं संहिता-कार्ययुक्तसूत्रपारायणकाले अभ्रान्तपुरुषैर्नियमेन असंहिततया पठ्य-मानत्वादिति हेतोर्विवक्षितत्वेन कर्तव्यादिपदेषु व्यभिचाराभावात्।

हेतोरप्रयोजकतां परिहरति - **अन्यथेति** । प्रथमसूत्रार्थान्वित-स्वार्थबोधकत्व[2]स्योंङ्कारेऽङ्गीकारे तद्घटकाथादिपदानां संहिततया निर्देशकाले अस्यैवासंहिततया निर्देशे किञ्चिद्वीजं वक्तव्यम् । निर्वीजकार्यायोगात् । वीजं च लक्षणान्तराणि वा, संहिता न भवतीति भ्रान्तिर्वा, प्रकृतसूत्रतात्पर्यविषयीभूतबोधोपयोग्याकाङ्क्षा-शून्यत्वं वा वक्तव्यम् । तत्रोक्तहेतुसत्वे आद्यद्वयं न घटते । अतस्तृतीयमेव नियामकं वक्तव्यमित्युक्तसाध्यं विनोक्तहेतोरनु-पपत्तेर्नाप्रयोजकत्वमिति भावः । **वेदवाक्यानवयवतायाः** ।[3] वेदवाक्य तात्पर्यविषयीभूतबोधविषयपदार्थान्वितस्वार्थबोधकतायाः। **नियतस्थानतयेति** । अन्यथा तद्वाक्यस्य स्वतात्पर्यविषयीभूत-बोधानुकूलो[4]ङ्काराघटितत्वेन न्यूनतापत्तेः । पूर्वपक्षमुपसंहरति - **एवं चेति** ।

अयं पूर्वपक्षी आद्यसूत्रपूर्वभागे असंहिततयोङ्कारोच्चारणं नियमेनाङ्गीकृत्यैव प्रवृत्तः । अन्यथा तस्योक्तहेतोरसिद्धिप्रसङ्गात्।[5] सूत्राद्यभागे ओङ्कारसत्वे बहुशिष्टपाठाधीनमस्मदादीनामबाधित-मोङ्कारप्रत्यक्षं साधकम् ।[6] अनभिज्ञानामोङ्कारपाठा -

1. निरूपचित. ग.
2. स्याकरे. क.
3. वेदतात्पर्य. ख.
4. ङ्कारघटि. क.
5. सूत्राद्यभागे इति ग. कोशे नास्ति.
6. अभिज्ञा. ख.

तारस्वरूपप्रकाशः

भावस्याज्ञानमूलकत्वोपपत्या उक्तप्रेक्षावत्पाठाधीनप्रत्यक्षबाधकत्वा–योगात् । इदानीन्तनाभ्रान्तपुरुषीयास्वतन्त्रपाठस्य पूर्वपूर्व–पाठमूलत्वानुमानेनाद्यसूत्रपूर्वभागे असंहिततया पठ्यमानोङ्कारसिद्धिः पूर्वपक्षिणः । परं तु[1] तादृशोङ्कारार्थस्य प्रथमसूत्रार्थे प्रवेशो सूत्रकृतस्तात्पर्याभावमात्रमुक्तहेतुना साधयति । सिध्दान्तग्रन्थेऽपि असंहितत्वेन ओङ्कारघटित एव पाठः । सन्न्यायरत्नावल्यां "ओम् अथातो ब्रह्मजिज्ञासा" इति पाठस्य लिखितत्वात् । असंहिततया निर्देशे पूर्वोक्तबीजत्रयातिरिक्तमन्यदेव बीजं निरूप्य हेतुराभासी–करिष्यते । न तु पूर्वभागेऽप्योङ्कारः साध्यते । तस्य पूर्वपक्षिणोऽपि सिद्धत्वादन्यथा उक्तपूर्वपक्षोत्थानानुपत्तेः ।

(प्रणवदर्पणानुवादः)

अत्र केनचिद् रामानुजीयेन प्रलपितम् - 'इह केचिदोङ्कारस्य सूत्रावयवतां कल्पयन्ति । तन्न ।

'अप्रमाणतयाऽ[2]त्र यस्योच्चारममेव न ।
तस्यावयवता तत्र शशशृङ्गार्जवोपमा।।

ब्रह्मसूत्राद्यन्तयोरोङ्कारोच्चारणे यदि किञ्चित् प्रमाणमुपलभेमहि तदा तस्यावयवत्वं कथञ्चित्कल्पयेमहि । यदा तदुच्चारणमेवाप्रामाणिकं तदा तस्यावयवत्वकल्पनं शशशृङ्गार्जववदपहासास्पदमेव । तथाहि –

'प्रत्यक्षं वा अनुमानं वा नादृष्टार्थे प्रवर्तते
श्रुतिस्त्वनन्यथासिद्धा न दृश्यत - - - - - - - - ।।'
इत्यादि ।

1. तादशोङ्कारस्य. ग.
2. यस्य यत्रोच्चारणमेव. क.

तारस्वरूपप्रकाशः

(प्रणवदर्पणाशयनिराकरणम्)

तन्मूर्खप्रलापत्वादुपेक्षणीयम् । सुधायामेव 'यद्यपि' इत्यादिना साम्प्रदायिकपाठानुरोधेन [1] आद्यसूत्रपूर्वभागे ओङ्कारस्य सत्वे प्रत्यक्षानुमानयोर्दर्शिततत्वस्योक्तत्वात् । भवदभिमतोङ्कारसहित-सूत्रपाठो नास्मत्सम्मतो भ्रान्तिमूल इति चेन्न । तादृशापाठ[2]स्या-भ्रान्तिमूलत्वं सम्प्रदायपरम्परागतत्वमभ्युपेत्य असंहिततया निर्देशमात्रमवलम्ब्य[3] प्रथमसूत्रावयवत्वे विवदमानं शिष्यं बोधयितु-मेतद् ग्रन्थस्य प्रवृत्तत्वेन त्वदसम्मतेरकिञ्चित्करत्वेनोक्तग्रन्थस्या-दुष्टत्वात् । अन्यथा वहुषु स्थलेषु आवयोः पाठभेदस्य सत्वात्तथा अस्मन्मते अद्वैतिमतेऽप्यसम्मतयोरेव "प्रतिज्ञाविरोधाच्च" "अत एव खं ब्रह्म" इति सूत्रयो[4]रीक्षत्यन्तराधिकरणयोः क्रमात्पठित्वा भवद्भाष्ये व्याख्यानाद् भवद्भाष्यकारादीनामप्रेक्षावत्वप्रसङ्गात् ।

तथापि[5] त्वत्सम्प्रदायमुल्लङ्घ्यादौ ओङ्कारसत्वे किं मानमिति मया पृष्टे तव किमुत्तरमिति चेत्, [6]त्वत्सम्प्रदायमुल्लङ्घ्य त्व-दीयसूत्रपाठविषये किं मानमिति मया पृष्टे[7] यथा यथा भवतोच्यते, तथा तथैव मयाप्युच्यत इति न किञ्चिदेतत् ।

ननु स्वपाठमात्रे निर्भरेण सुधाप्रवृत्तौ "स्रवति" इत्यादिग्रन्थे-नोङ्कारस्यादौ सत्वसाधनमनुपयुक्तं स्यात् । अन्यथा अथादिपदानामपि

1. आद्यसूत्रपूर्वभागे. इति. ग. कोशे नास्ति ।
2. स्थ भ्रान्तिमूलत्वं. ग.
3. प्रथमसूत्रानवयवत्वे. क.
4. रीक्षत्यराधि. क.
5. मत्सम्प्रदायेति पाठेन भाव्यमिति भाति
6. मत्सम्प्रदायेति पाठेन भाव्यमिति भाति
7. 'यथा' 'तथा' इत्येकवारमेवास्मिन् वाक्ये ग. कोशे लिखितम्

तारस्वरूपप्रकाशः

सूत्रे [1] सत्वसाधनस्य कर्तव्यतापात इति चेन्न । ओङ्कारस्य सूत्रादिभागे स्थितिमङ्गीकृत्यैवा[2]संहिततया निर्देशगतिमात्रप्रदर्शनपरतयाऽनु – पदमेव तद्ग्रन्थस्य व्याख्यास्यमानत्वेन तद्ग्रन्थस्य भवदुक्ताभिप्राय – कत्वाप्रतीतेः ।

(प्रणवदर्पणोक्ताशयनिराकरणम्)

यत्त्वत्राशङ्क्योक्तं - वेदोच्चारणपूर्वकाले ओङ्कारोच्चारणं दृश्यत इति चेत्, किञ्चातः, **"यो वेदादौ स्वरः प्रोक्तः"** इति श्रुत्या वेदोच्चारणस्यैवोङ्कारोच्चारणव्याप्यत्वावगमात्" इति ।

तत्तुच्छम् । **"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।।"** इति पठ्यमानतैत्तिरीयपूर्वापरवाक्येषु ओङ्कारस्याप्रसक्तत्वेन स्वरपदस्याकारदिस्वरवाचकस्याक्षरत्रय [3] समाहारात्मकोङ्का – रवाचकत्वाभावेनोङ्कारोच्चारणविधायकलिङ्गाद्यभावेन चोक्तवाक्येन भवदभिमतासिद्धेः । एतदन्यस्य कस्यचिद्वाक्यस्य सत्वे प्रकृतोपयोगिनं तद्वाक्यघटकभागं[4] विहायानुपयुक्तैतद्वाक्यघटकभागस्यैव बहुशः त्वयोदाहृतत्वेन त्वन्मौर्ख्यस्य स्फुटत्वात् । वाक्यान्तरेण वेदादौ नियमेन प्रणवोच्चारणसिद्धावपि अस्मदभिमतस्य वक्ष्यमाणन्यायेनासिद्धेश्च । यथा कथञ्चित्त्वया तैत्तिरीयवाक्यस्य त्वदभिमतार्थपरतया योजनायां मयाऽपि -

1. सद्यस्साधन. क.
2. व संहिततया. ग.
3. समाहोरति ग. कोशे नास्ति.
4. भागे रांविहाय. ख.

तारस्वरूपप्रकाशः

"सर्वस्य प्रणवो ह्यादिर्मध्यमऽन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।।" (मां. 4.5.)

इति[1]माण्डूकश्रुत्या ओङ्कारस्य सूत्राद्यन्तयोरवान्तरसूत्ररूपमध्यभागे चोच्चारणानुसन्धानादेरुपपा[2]दयितुं शक्यत्वाच्च ।

अत्र 'ज्ञात्वा' इत्यनेनैवोत्तरकाललाभेन 'तदनन्तरं' इत्यस्य वैयर्थ्य-परिहाराय तथानुष्ठायेत्यर्थत्वात् । सर्वपदस्य 'व्यश्नुते' इति फल-वाक्यसन्निधानबला[3] ददृष्टादिफलजनकत्वयोग्यसर्वार्थकत्वस्यैव [4]योग्यताबलेन निश्चयसम्भवात् 'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा', 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादिवाक्यस्थसर्वपदवत् ।

न चेदं वाक्यं परमात्मनः जगदुदयादि[5]कारणत्वपरं पूर्वापर-वाक्यसन्दर्भावगतं कथमुक्तार्थपरं स्यादिति वाच्यम् । पूर्वग्रन्थस्य[6] प्रणवघटकाकारादिवर्णप्रतिपाद्यरूपमाहात्म्यपरस्य तादृशाष्टाक्षर-माहात्म्यप्रतिपादनेऽपि तात्पर्यावगमेन **"ओमित्येतदक्षरमिदं सर्वं"** इति तस्यैवोपक्रमाच्च विशिष्टप्रणवप्रतिपाद्यमाहात्म्यकथनपूर्वकं तादृशप्रणवस्योक्तमाहात्म्येऽपि तात्पर्यस्योक्तवाक्ये युक्तत्वात्।

न चैकवाक्यस्यार्थद्वयमसम्भावितमिति वाच्यम् । ऐतरेयो-पनिषद्यन्यसूक्तगतत्वे[7]नान्यपरत्वेनाभिमतानामपि मन्त्राणामत्र स्वोक्तार्थे सम्मतित्वेन 'तदुक्तमृषिणा' इत्यादिना बहुस्थलेषूदा-

1. माण्डूवृत्या. क.
2. दयितुमशक्य. क.
3. ददृष्ट. क.
4. योग्यताबलेन इति ग कोशे नोपलभ्यते
5. निमित्तकारणत्व. क.
6. प्रणवघटिताका. ग.
7. त्वपरत्वेना. ख.

श्रीसुधा - अखिलैः सूत्रपाठकैः यत् पृथगसंहिततयोङ्क्रियते, तत् सर्वसूत्रेष्वनुगतत्वेनाभिलषितेन निमित्तेनोपपद्यते ।

(*प्रतिसूत्रमोङ्कारोऽध्याहार्यः*)

एतदुक्तं भवति - सर्वाणि हि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरब्रह्मविद्याः ।

तारस्वरूपप्रकाशः

हृतत्वात्। **"चत्वारि शृङ्गा"** इति [1] मन्त्रस्याग्निध्यानादौ याज्ञिकै[2]र्विनियुक्तस्याग्निपरत्वेऽपि व्याकरणशास्त्रमाहात्म्यपरतया महाभाष्यकृता योजितत्वाच्च । तस्मादुक्तवैषम्यकल्पनमयुक्तमेव ।

ननु सूत्रार्थानन्वितत्वे ओङ्कारस्यासंहिततयाऽपि नियमेन निर्देशो निरर्थकः । कुत इत्यत आह - **पक्षसपक्षयोरिति।** सपक्षग्रहणं दृष्टान्तार्थम्। **अध्ययननियमान्तर्गतमिति ।** अध्ययननिष्ठस्तत्कर्मसाध्यफलोपयोगी योऽतिशयस्तन्निर्वाहकमित्यर्थः । **अध्येतृभिरिति** । ब्रह्मसूत्रपाठकैरखिलैरित्यर्थः । **अभिलषितेन निमित्तेनेति** । **'अध्ययनेन वसति'** इतिवत् फलरूपहेतावियं तृतीयेति भावः ।

ननु प्रथमसूत्र एव तस्यावयवत्वाभावे सर्वसूत्रेष्वनुगतिः कथं सिद्ध्यति, अत्यन्तव्यवहितत्वात् अनुगतत्वाभि[3]लाषस्यापि [4]निरर्थकत्वमेव ।

किञ्चोक्तानुमाने जागरूके सत्येतादृशोक्तिसहस्रैरपि कथमोङ्कारस्यावयवता सिद्ध्यतीत्यत आह - **एतदुक्तं भवतीति** ।

---

1. मन्त्रस्थाग्नि. क. 2. युक्तविनियुक्त. ख.
3. लापस्यापि. ख. 4. निरर्थकमेव. ख.

तारस्वरूपप्रकाशः

सर्वसूत्रेष्वोङ्कारोहस्यावश्यकत्वे खलु तज्ज्ञापकतयोक्तहेतोरन्यथा-सिद्धिर्वक्ष्यमाणा घटेताऽपि । स एव कुत इत्यतः पीठमारचयति - **सर्वाणि हीति** । प्रत्येकमवान्तरा ब्रह्मविद्या इत्यर्थः । समस्त-शास्त्ररूपमहाब्रह्मविद्यान्तर्गतप्रकरणविशेषा इति यावत् ।

ननु "औपनिषदः पुरुषः" "नावेदविन्मनुते" इत्यादिवचनबलेन ब्रह्मणो[1] वेदैकवेद्यत्वात् कथमेतेषां ब्रह्मवेदनकरणत्वरूपं ब्रह्मविद्या-त्वमित्यताह - **अनेकवेदविचारपरत्वादिति** । एकस्मिन्नेव वाक्ये उपक्रमादिलिङ्गसमुदायानुसन्धानश्रमायोगेन सूत्रारम्भस्य निष्प्रयोजनतापरिहाराय **अनेकेति** । अनेकाशाखार्थनिर्णयस्तु न सूत्रोक्तन्यायानुसन्धानं विना[2] घटत इति तत्तन्निर्णायकतयाऽवान्तर-प्रकरणात्मकत्वमधिकरणानां तदन्तर्गततया तद्गुणसूत्राणामपि ब्रह्मविद्यात्वमिति भावः । हि शब्देन "सारवद् विश्वतोमुखं" इत्यादिप्रमाणप्रसिद्धिं' द्योतयति ।

अस्तु ततः किमित्यत्राह - **स्रवतीति** । गीतातात्पर्ये सप्तदशाध्याय इयं श्रुतिरुदाहृता । श्रौतः' श्रुत्युक्त निन्दारूपो योऽर्थवादस्तत्सिद्धविधिरूपप्रमाणादित्यर्थः । 'ब्रह्म' मन्त्रादिरूपो वेदः । 'अनोङ्कृतं' आदौ ओङ्कारोच्चारणा[3]नुसन्धानपूर्वकत्वरहितम् । योग्यतया पाठजपादिकाले प्रयुक्तमिति लभ्यते । 'परस्तात्' इत्यनुक्तसमुच्चायकचशब्देन[4] वा चशब्दस्य विशेषरूपार्थकत्वे चरमभागेऽनुच्चारणे विशेषस्य प्रथमभागानुच्चारणावधिकस्य [5]प्रथमं

1. वेदैकत्वात्. क.
2. यत इति. ख.
3. रणरूपानु. क.
4. वाचकशब्दस्य. ख.
5. प्रथमसंबुद्धया - ख.

तारस्वरूपप्रकाशः

बुध्यारूढस्य निरपवादस्य परित्यागानर्हतया वा आदाविति लभ्यते । 'स्रवति' आमघटनिक्षिप्तजलवत्स्रवति अपूर्वजनकं न भवति । 'परस्तात्' अन्त्यभागे । 'अनोङ्कृतं' ओङ्कारानुसंन्धानरहितम् । 'विशीर्यते'[1] हिंस्यते । उत्पन्नापूर्वविघातादिना फलनिष्पादकं न भवतीत्यर्थः ।

यद्यपि "ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" इति शिक्षावचनं विधिरूपमपि भवति । इत्थं च सामर्थ्याद्विधिकल्पनोक्तिरयुक्तेति भाति । तथापि शिक्षावचनमपि न मूलप्रमाणं विनाऽर्थसाधकं भवतीति तस्यापि मूलभूतोक्तश्रुतिरेवादरणीया । तस्यां विधिर्नास्ति । शिक्षाकृताऽपि तादृशार्थवादसामर्थ्यादिवार्थवादसहितस्फुटविधिवाक्यं कल्पितमि-त्याशयेन [2]श्रौतार्थवादसामर्थ्यात् इत्युक्तम् ।

यद्वा शिक्षावाक्ये तन्मूलश्रुतिवाक्ये च ब्रह्म इत्युक्त्वा ब्रह्म-शब्दस्य "ब्रह्म तत्वं तपो वेदः" इत्यभिधानेन वेदपरत्वाद् वेदस्याद्यन्तयोरोङ्कारोच्चारणसिद्धावपि सूत्रस्य किमायातमित्याशङ्क्य 'श्रौतार्थवादसामर्थ्यात्" इत्युक्तम् । 'श्रौतः' श्रुतिविषयकत्वरूपश्रुतिसम्बन्धी योऽर्थवादस्तत्सामर्थ्यात् [3]तद्बलायत्तार्थापत्त्या श्रुतेः पूर्वं परतश्चोङ्कारस्यावश्यकतयोच्चारणसिद्ध्यैव सूत्राद्यन्तयोरोङ्कारोहसिद्धिरिति यावत्। कथमेतत् ? व्यधिकरणत्वादिव्याशङ्कापरिहारार्थं

1. हिंस्यत इति ख.ग. कोशेषु नास्ति ।
2. श्रौतवाद. क.
3. तद्बलायथार्थपत्य. ख.

तारस्वरूपप्रकाशः

तदुपपादनार्थं पूर्वं 'सर्वाणि[1] सूत्राणि इत्यारभ्य 'ब्रह्मविद्याः' इत्यन्तमुक्त्व
अत्र ब्रह्मविद्यास्वाद्यन्तयोरूहः कर्तव्य इत्युक्तं, न तु सूत्रेष्विति
[2]तेनायमाशय उन्नीयते -

तथा हि - 'स्रवति' इति श्रुतिप्राप्तशिक्षारूपविधिवाक्ये "ब्रह्मण
प्रणवं कुर्यादादावन्ते च सर्वदा" इत्युक्तम् । तत्र मुख्यसर्वकालविवक्षण
कैरपि सर्वदोङ्कारो[3]च्चारणकरणस्य कर्तुमशक्यत्वेनाशक्यार्थे विधेरसम्भव
इति, अमुख्यार्थे वक्तव्ये पारायणकालमात्रग्रहणे तस्य "स्रवत्यनोङ्कृतं
इत्यनेनैव लाभादेकमात्रबोधकसर्वपदादर्शनादमुख्यसर्वपरत्वं वक्तव्यम्
तत्र सर्वस्मिन्नपि पारायणकाल इति नार्थः, [4]कस्मिंश्चित्पारायणकाल
ओङ्कारोच्चारणं न कर्तव्यं कस्मिंश्चित्कर्तव्यमिति निर्बीजशङ्काय
अनुत्थानात् तद्वारणाय सर्वपारायणकालार्थकत्वायोगात् । किन्
पारायणकालमात्रस्य वारणाय मननप्रवचनादिकालार्थकम् । तथा च
पारायणकाले तदर्थमननकाले तत्प्रवचनकाले चोङ्कारोच्चारणं कर्तव्यमिति
लभ्यते।

तथा च प्रत्यधिकरणमनेकवेदोच्चारणपूर्वकमनुसन्धानपूर्वक
वाऽनेकवेदार्थस्य विचारपूर्वकमनेकवेदार्थज्ञानहेतुत्वात् तत्प्रवचन
वेदार्थप्रवचनरूपम् । तच्च स्वयमेव सूत्रार्थानुसन्धाने स्वात्मानं प्रति
[5]प्रवचनरूपं च, युक्त्यनुसन्धानेन तदर्थस्थिरीकरणात् ।अन्यं प्रति
प्रवचनमप्येवमेव तदुक्तं -

---

1. सूत्राणि, इति क.ग. कोशेषु नास्ति ।
2. केनायमाशयमाशय. ख.
3. च्चारणाकारणास्य. ख.
4. कस्यचित्पा. क.
5. प्रवचनरूपं चेति क. कोशे नास्ति ।

तारस्वरूपप्रकाशः

"मन्त्रो मन्त्रार्थवचनमन्यस्य स्वात्मनोऽपिवा । सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ[1] हि तौ" (तै.भा. 1.21.) इति स्वात्मानं प्रति प्रवचनमेव पारायणमित्युच्यते । निरर्थकपाठस्य [2]प्रत्यवायहेतुत्वेन तदर्थानुसन्धानपूर्वमेव कर्तव्यत्वात् । निरर्थकपाठादेः प्रत्यवायहेतुत्वं च **"वेदवादरताः पार्थ"** इति गीताव्याख्यावसरे उदाहृतेन-

"वादो विवादः सम्प्रोक्तो वादो वचनमेव च ।
वेदोक्तविष्णुमाहात्म्यविवादात् पठनादपि ।
अथवा निरर्थकात् पाठाद्वेदवादी स उच्यते ।
वेदवादरतो न स्यात् न पाखण्डी न हैतुकी" ।(गी.ता.२.४४)

इत्यादिप्रमाणेन सिद्धम् ।

एवं च सूत्रपारायणं तद्भाष्यादिप्रवचनं च वेदप्रवचनरूप-मेवेति शान्तिपाठादेरावश्यकत्ववत् ओङ्कारोच्चारणस्यानुसन्धानस्या-व[3]श्यकत्वमेव । अन्यथा त्वद्भाष्यादिप्रवचनकाले शान्तिपाठादे-र्निर्मूलत्वमेव स्यात् । त्वद्भाष्यादिप्रवचनकाले [4]शान्तिपठने विशिष्य प्रमाणस्य वक्तव्यतापातात् ।

(ओङ्कारस्य शान्तिपाठवत् सूत्रबहिर्भूतत्वशङ्कापरिहारौ)

न चैवमोङ्कारः [5]शान्तिवद् बहिर्भूतः स्यादिति शङ्क्यम् । 'स्रवत्यनोङ्कृतं' इत्यर्थवादवाक्ये[6]न ओङ्कारसाहित्यासाहित्याभ्यां ब्रह्मण

---

1. यतः इति. ग.
2. प्रत्यवायाहतत्वे. क.
3. स्यावाचकत्व ख.
4. शान्तिपाठने. क.
5. शान्तिवदवहिर्भूत. ग.
6. प्राशस्त्येन. क.

तारस्वरूपप्रकाशः

एव फलजनकत्वफलाजनकत्वरूपातिशयलाभेन तद्वाक्यसम- भिव्याहृत त्वेन तद्वाक्यसाध्यफलोपकारकत्वरूपतदवयवत्वस्यैव सिद्धेः । 'अनोङ्कृतमासुरं कर्म' (गी.ता.१७.२३) इति वाक्यशेषे ब्रह्मण एव फलाजनकत्वादिरूपासुरत्वोक्तेश्च । अत एव **'ओमिति ब्रह्मणः प्रवक्ष्यन्नाह' 'ओमिति शस्त्राणि शंसन्ति'** (तै.उ. १) इत्यादिका श्रुतिः

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।
तस्मादोमित्युदाहृत्य यज्ञदानादिकाः क्रियाः ।
प्रवर्तन्ते विधानोक्तास्सततं ब्रह्मवादिनाम्' (भ.गी.17.23)

इत्यादिका स्मृतिः । प्रकृतोङ्कारस्य सूत्रादावुच्चारणसाधिकायां श्रुतौ **"ब्रह्मणः प्रवक्ष्यन्नाह"** इत्यादिपुराकल्परूपार्थवादकल्प्यविधिना वेदप्रवचनपूर्वकाले ओङ्कारोच्चारणसिद्ध्या उक्तरीत्या सूत्रपारायणतत्प्रवचनकालेऽप्योङ्कारोच्चारणस्यावश्यकत्वसिद्धेः । स्मृतौ च **"यज्ञदानादिकाः क्रियाः"** इत्यत्रादिपदेन [2]यज्ञपदेन वा वाग्यज्ञरूपसूत्रपारायणादेर्ग्राह्यताया अवर्जनीयत्वात् ।

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च" (भ.गी. 4.28)

इत्यत्र स्वाध्यायज्ञान[3]यज्ञशब्देन प्रवचनस्यापि यज्ञत्वोक्तेः। एवं पूर्वं [4]**कांश्चिद्यज्ञानुक्त्वा "एवं बहुविधा यज्ञा वितता ब्रह्मणो** [5]**मुखे** "इत्युक्तत्वेन भगवत्प्रीतिसाधनव्यापारत्वेन बहूनां यज्ञत्वोक्तेः।

1. व्याहृतेन ग.
2. यज्ञपदेन वा इति ग. कोशे नास्ति.
3. ज्ञानशब्देन. क.
4. कांश्चिद्ययाज्ञा. क.
5. युगे. ग.

तारस्वरूपप्रकाशः

स्वाध्यायप्रवचनयोश्च **"ऋतं च स्वाध्यायप्रवचने च"** (तै.उ.१.) इत्यादिबहुप्रशंसया तस्यातिशयेन भगवत्प्रीतिहेतुत्वावगमात् । प्रवचनस्यापि यज्ञत्वात्। गीतोक्तयज्ञपदस्यादिपदस्य वा संकोचे बीजाभावेन **"विधानोक्ता"** इत्युत्तरवाक्येन विध्युक्तत्वेन, समस्त[1] सत्कर्मग्रहणेन च तद्बलेनाप्युक्तरीत्या सूत्रादावुच्चारणसिद्धेः । तदनुदाहरणं किमर्थमिति तु न शङ्क्यम् । उक्तरीत्या सूत्रादाववान्तरब्रह्मविद्यात्वेन प्रत्यधिकरणादिपूर्वं च तदुच्चारणसिद्धावपि तस्याध्ययननिय[2]मान्तर्गततयाऽपि संभवेन पूर्वोक्तावय[3] वतया तत्सिद्ध्यभावात् ।

नन्वमध्ययननियमान्तर्गतस्यापि तत्पारायणादिप्राप्यपुण्यो-पयोगित्वं वक्तव्यमेव, अन्यथाऽध्ययननियमे तन्निवेशानर्थक्यापत्तेः। अतस्तद्वाक्य[4]साध्यफलोपकारकत्वं प्राप्तमेवेति रिक्तमेवेदं वचनमिति चेन्न ; यतोऽस्त्यत्र विशेषः फलप्रयोजकीभूतः पारायणादिकर्तृ-निष्ठोऽतिशयः पठ्यमानवाक्यनिष्ठस्तद्भिन्नोऽतिशयश्च पृथगेव। द्वे परस्परं [5]सहितावेव फलोपयोगिनौ । स्नानतिलकप्राङ्मुख-त्वादिरहितेन साङ्गमन्त्रपारायणेऽपि फलासिद्धेः कर्तृवृत्त्यतिशयस्य प्रयोजकत्वम् । एवं कालदेशवृत्यतिशयावप्यनुसन्धेयौ । कविना केनचित्प्रणीतस्य मन्त्रसमानार्थकवाक्यस्य प्राङ्मुखत्वादिनियमपूर्वकं पठनेऽपि फलासिद्ध्या वाक्यनिष्ठातिशयोऽप्यपेक्षितः । अत उक्तवैषम्योक्ति[6]र्युक्तैव ।

---

1. ततकर्म. ख.
2. मानन्तर्ग. क.
3. वताया. क. ग.
4. साधनफलो - ख.
5. सहितावेव इति क कोशे नास्ति
6. क्तिरयु. क.

तारस्वरूपप्रकाशः

ननु यथाकथञ्चित्सूत्रादावोङ्कारोच्चारणसिद्ध्या चरितार्थत्वात्किमर्थं [1]सूत्रावयवतया तदुच्चारणमपेक्षितमिति चेन्न, अध्ययननिय[2]मान्तर्गततया तदुच्चारणे एकवारं तदुच्चारणमात्रेण तिलकादिवद्-वक्तृनिष्ठातिशयजननोपपत्त्या प्रतिवेदवाक्यं प्रतिसूत्रं चोहस्या[3]-नावश्यकत्वेन तज्ज्ञापकतया प्रथमसूत्रेऽसंहिततया निर्देश इति समाधानस्यानुत्थानापत्तेः । ऊहशब्दस्याध्याहारार्थकत्वं चन्द्रिकायामेव व्यक्तम् ।

('स्रवति ' इत्यादिप्रमाणेन प्रथमसूत्र एवोङ्काराध्याहारोऽस्तु न सर्वसूत्रेष्विति शङ्कापरिहारौ)

ननु 'स्रवति' इति वाक्येन [4]वेदाद्यन्तवाक्ययोरेव ओङ्कारा-वयवत्वप्राप्त्या तदर्थप्रवचनात्मकादिसूत्रादावेवोङ्कारोच्चारणं स्यान्न त्ववान्तरब्रह्मविद्यारूप[5]सकलसूत्रेष्विति चेन्न । मन्त्रब्राह्मणोपनि-षद्रूपवेदानामनन्तत्वेन तस्याद्यन्तयोरभावेन प्रत्येकमितरानपेक्षयैक[6]वि-शिष्टार्थपरमन्त्रा[7]वान्तरप्रकरणरूपब्राह्मणोपनिषदादिकमेवोपादायेदं वाक्यं प्रवृत्तमिति सर्वत्र तदावश्यकत्वप्राप्तेः ।

राघवेन्द्रश्रीमच्चरणैः 'ब्रह्म' इति पदमुपादाय मन्त्र इति सुधाटिप्पण्यां व्याख्यातम् । [8]तत्तु प्रायो मन्त्राणामेव लौकिकैः फलार्थं जप्यत्वात्तत्प्राधान्याभिप्रायेण । अन्यथा मन्त्रमात्रे ब्रह्मपदस्य निर्निमित्तं लक्षणाऽऽपत्तेः। तथा व्याख्यानस्योपनिषदादिसाधारण्याभावेन प्रकृतानुपयोगप्रसङ्गाच्च ।

1. सूत्रावयतया. ग.
2. मानन्तर्ग. क.
3. स्यावश्यकत्वेन. क.
4. वेदवाक्य. ग.
5. सकलेति ग. कोशे नास्ति
6. विशिष्यार्थ. क. वि.
7. न्त्रान्तर. क.
8. न तु. ख.

तारस्वरूपप्रकाशः

ननु स्वाध्यायविधेरर्थज्ञानपर्यन्तत्व[1]स्य स्थितत्वादोङ्कारपूर्वकत्वाभावे यज्ञस्य शाब्दबोधादिरूपफलश्रवणाभावात्कथमेतदिति चेन्न ।

"अध्येष्यते च य इमं [2]धर्म्यं संवादमावयोः ।

ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ।"

(भ.गी 18,20) इत्यादि वाक्यैरुपलक्षणया [3]सर्वव्याख्यानेन पुण्यप्राप्त्यादिरूपावान्तरफलस्याप्युक्तत्वात् । उक्तार्थवादसामर्थ्यादिव तत्सिद्धेश्च । वराहपुराणादौ संहितापाठमारभ्य ब्रह्मसूत्रपाठादेः फलस्योत्तरोत्तरमाधिक्येनोक्तत्वाच्च ।

यद्वा 'अर्थवादसामर्थ्यात्' इत्यस्यायमर्थः - अर्थवादेन हि वेदस्य ओङ्कारसाहित्येन या फलजननशक्तिरभिहिता सा [4]न स्वत ओङ्कारस्वरूपसामर्थ्यप्रयुक्ता । इतरशब्दवत्तस्यापि जडत्वेन प्रागुदाहृतगीतावचनानुसारेण प्रतिवाक्यं वक्ष्यमाणानुसारेण तत्तद्वेदवाक्यार्थबोधे [5]भासमानदेवतादिष्वन्तर्यामिभूततया भासमानभगवति गुणपूर्णत्वग्रहसम्पादकत्वेन, कर्मादिस्थलेऽपि [6]तदुद्देश्यदेवाद्यन्तर्यामिणि ओङ्कारार्थगुणपूर्णतानुसन्धानसम्पादकत्वेन ।

अन्यथा गीतायां - **"ओं तत्सदिति निर्देशः"** इत्यनेन ओङ्कारस्य ब्रह्मनामत्वमभिधाय **"तस्मादोमित्युदाहृत्य"** इत्यनेन तदेव निमित्तीकृत्योङ्कारोच्चारणोक्तेः, स्वरूपमात्रसम्बन्धितया तत्कथने हेतुकथनवैयर्थ्यात् । 'अन्नं ह्यनेन क्रियते' इतिवत् स्तावकत्वे बीजाभावात् ।

---

1. स्यास्थि ख.
2. धर्मसंवाद ख.
3. सर्वव्याख्यानेन इति क. कोशे नास्ति.
4. न स्वत इति क कोशे नास्ति.
5. मान. ग.
6. तत्तदुद्देश्य. क.

तारस्वरूपप्रकाशः

"अनोङ्कृतं ह्यासुरं स्या[1]द् यत् तस्मादोङ्कृतं त्वपि।
[2]ओङ्कारार्थहरेस्सम्यगज्ञानादासुरं भवेत्" इति (गी.ता.१७.७)

"अनर्थज्ञोदितो मन्त्रो निरर्थस्त्राति मानतः ।
यन्मन्त्रस्तेन कथितो मन्त्रार्थो ज्ञेय एव तत् ।"

इत्यादिरूपया गीतातात्पर्योदाहृतस्मृत्या, (गी.ता.१७.२३) **"यो ह वा अविदितार्ष[3]च्छन्दोदैवतब्राह्मणेन"** इत्यादिश्रुत्या च अर्थज्ञानरहितस्य निन्दितत्वेन [4]तस्य हेतुतया कथनस्यैवोचितत्वाच्च। तथा चार्थवादवाक्ये वेदस्य ब्रह्माधिगतिहेतुत्वरूपब्रह्मविद्यात्वेनैव विशिष्टफलनिर्वाहकत्वस्याभिप्रेतत्वात्तात्पर्यवशात् श्रुतिस्थब्रह्मपदं वेदवाचकमपि फलजनकत्वेन श्रूयमाणब्रह्मज्ञान[5]संपादकवाक्यसामान्यस्य ब्रह्मविद्यात्वेनोपलक्षण- मवश्यं वाच्यम् । उक्तरीत्या न्यायसिद्धत्वाद् बाधकाभावाच्च । [6]मुख्यार्थान्वयानुपपत्तेरेव लक्षणाबीजत्वे काकच्छ्यत्र्यादिपदाना मजहल्लक्षणोच्छेदापत्तेः । "व्रीहीनवहन्ति" इत्यत्र नीवारेष्ववघातस्य चोदकप्राप्तत्वसिद्धये व्रीहिपदस्य पुरोडाशीयद्रव्यत्वावच्छिन्नलक्षकताया मीमांसकसिद्धाया अभावापाताच्च । न हि तत्र व्रीहिरूपमुख्यार्थान्वये किञ्चिद् बाधकमस्ति । **'यो यस्य सुतस्स तदीयं[7]धनमाददीत' "येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ।"** इत्यादौ [8]सुतादिशब्दानां तच्छब्दमुख्यार्थभूतौरसपुत्राद्यन्वये बाधकाभावेन मुख्यामुख्यसुतसाधारणरूपावच्छिन्नपरताया असिद्ध्या

1. यस्तस्मा. ख.
2. ओङ्कारार्थे. क.
3. र्षः च्छन्दो क.
4. कस्य. ग.
5. संग्राहक. क.
6. मुख्यार्थानुपपत्तेरेव. क.
7. धनमाददीयं ख.
8. सूतादि

तारस्वरूपप्रकाशः

पालितामुख्यसुतानां तत्तद्वाक्योक्त[1] धनकर्माद्यसिद्ध्यापत्तेः ।

एवं परमते "अहं ब्रह्मास्मि" "तत्वमसि" इत्यादिषु 'त्वं' 'अहम्' इत्यादिपदानां सम्बोध्यत्वोच्चारयितृत्वादिना मुख्यार्थभूत-श्वेतकेतुवामदेवादिमात्रपरत्वेनेतरोपलक्षकत्वाप्रसक्त्या समस्त-जीवाभेदे प्रमाणतयोपन्यासायोगापत्तेः । तव तत्रार्थान्तरकथनार्थं प्रवृत्त्यभावापाताच्च ।

न च "व्रीहीनवहन्ति" इत्यादिषु पूर्वतनशिष्टाचारमीमांस-कोक्तन्यायानुसारेण लक्षणा, "तत्वमसि" इत्यादौ न्यायसाम्य[2]मेवेति वाच्यम् । अत्रापि न्यायसाम्यस्यानुपदमुपपादितत्वात् । शिष्टाचारस्य "सततं ब्रह्मवादिनाम्" इत्युदाहृतगीतोक्तस्य सत्वाच्च । ओङ्कारोच्चारणपूर्वकतया पाठकानां' शिष्टत्वं नास्माकं सम्मतमिति चेत्, नीवारादिष्ववघातादिकर्तृणां शिष्टत्वं नास्माकं सम्मतमिति पूर्ववाक्यस्थलेष्वनुपपत्तिर्दुर्वारा ।

ननु [3]प्रबलबाधकप्रमाणं विना तादृशाचारादेर्भ्रममूलकत्व-कल्पनमयुक्तमिति चेन्न, प्रकृतेऽपि पूर्वोपपादितरीत्या न्यायप्राप्तत्वेन ब्रह्मसूत्रे पूर्वकाले ओङ्कारोच्चारणं न कार्यमिति प्रमाणाभावेन [4]चोक्त विशिष्टोच्चारणस्यापि भ्रान्तिमूलकत्वकल्पनस्य प्रद्वेषमात्रमूलत्वात् ।

किञ्च "स्त्रवति" इति वाक्यस्थब्रह्मपदं वेदमात्रपरं यद्दि स्यात्पदक्रमपारायणकाले भवदभिमतशिष्टानामेव ओङ्कारोच्चारणकाले

1. धनिक. ख.

2. साम्येनैति. ग.

3. प्रवलप्रमाणं. ग.

4. चोक्तविशिष्योच्चा. ग.

भवदभिमतशिष्टानामेव ओङ्कारोच्चारणाभावप्रसङ्गः। तयोर्वेदविकृतित्वेन शाकल्याद्यृषिप्रणीतत्वात् । [1]वेदघटकपद- घटितत्वादिमात्रेण वेदत्वाङ्गीकारे सर्वेषामपि शब्दानामनन्तवेदघट- कतया लौकिकवाक्येष्वपि तत्त्वापत्तेः । अतस्साक्षाद्वा किञ्चित्परम्परया वा मुख्यतो वेदार्थभूत[2]परब्रह्माधिगमे परिकरभूताङ्गसाहित्यविशिष्टस्य तस्य ग्राहकत्वमावश्यकमेवेत्युक्त-रूपावच्छिन्नोपलक्षकमवश्यं वाच्यम् । क्रमस्यापि पौनःपुन्येन वेदार्थभूतब्रह्मज्ञानहेतुत्वादिनाऽतिशयेन ब्रह्मविद्यात्वम् । अत एव वराहपुराणे **"संहितापाठतः प्रोक्तं द्विगुणं पदपाठतः"** इत्यारभ्य संहितापाठात् पदपाठस्य ततः क्रमपाठस्य द्विगुणितफलहेतुत्वमुक्त्वा **"प्रत्यक्षरं तु लभते गायत्रीशतजं फलम्"** इत्यनेन अत्यन्तं ब्रह्मज्ञानहेतुभूतब्रह्मसूत्राणामतिशयितफलमुक्तमिति।

न च भारतादेरपि ब्रह्माधिगतिहेतुत्वेन ब्रह्मविद्यात्वात् तदा-दावप्योङ्कारोच्चारणप्रसङ्गस्तत्रापि प्रतिवाक्यमूहप्रसङ्ग इति वाच्यम्। भवदीयतर्कस्य अनिष्टप्रसञ्जना[3]त्मकतानिर्वाहाय भारतादावप्यु-क्तरीत्या सामान्यतस्सिद्धिं प्रति अपवादभूतस्य भारतादि पारायणकाले ओङ्कारोच्चारणं तदर्थानुसन्धानं च न कार्यमित्या-दिप्रमाणस्य त्वयैव वक्तव्यत्वात् ।

भारताद्युच्चारणकाले ओङ्कारोच्चारणं जना न कुर्वन्तीत्येतदे-वाचारमूलभूतप्रमाणसाधकमिति चेन्न । महदाचा[4]राभावस्य

---

1. वेदपद क.
2. परब्रह्म. ख.
3. नात्मता. ख.
4. चारस्यासिद्धत्वात्. ख. ग.

तारस्वरूपप्रकाशः

(ओङ्कारोच्चारणाभावपूर्वकपारायणादेः) असिद्धत्वात् ।"यज्ञदानादिकाः क्रियाः । प्रवर्तन्ते विधानोक्ता सततं ब्रह्मवादिनाम्" इत्यनेन ब्रह्मज्ञानिनां तथैवाचारस्य गीतासिद्धत्वाच्च । पामराणामाचाराभावेन्न शास्त्रप्रामाकरणे पामरैरशक्तैर्जगतीतले धर्मशास्त्रो-क्तसाङ्ग[1]कर्माकरणात् कैश्चिन्महद्भिः क्रियमाणस्याप्यना-चारताप्रसङ्गः ।

तर्हि भारतादौ ब्रह्मसूत्रोक्तन्यायेन प्रतिश्लोकमोङ्कारो-च्चारणप्रसङ्ग इति चेदिष्टापत्तिरेव । शक्तत्वे तेनाधिकफलस्यैव जननात् । नो चेदादावुच्चारणमात्रेणावान्तरप्रकरणप्रतिपाद्यपर-मात्मनि तदर्थानुसन्धान[2]रूपोहेन तत्तदधिकारिभेदसिद्धविशिष्ट-फलनिर्वाहात् ।

"वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुस्सर्वत्र गीयते ।।"

इत्यादिना भारतादेरपि सर्वत्र ब्रह्मपरत्वात् ।

सूत्रेष्वप्यूहो नामैष एव, यत्प्रतिसूत्रादावनुसन्धानमुच्चारणं वा, शक्ताशक्तादिभेदात् । अत एव यत्र भारतादिप्रवचनस्यैतद्दिवसे [3]विरतिः, तत्र द्वितीयदिवसे तदारम्भकाले मङ्गलाचरणादिश्लाक-पाठेवदोङ्कारोच्चारणमपि कार्यमुत्तरत्र [4]तदर्थानुसन्धानबुध्या पठ्य-मान ओङ्कारो [5]वाक्यनिष्ठ[6]वीर्याधायक इत्युक्तम् ।

---

1. साङ्गकर्भकरणात्. क. सहाह्यकरग. ग.
2. रूपोतेन. ख.
3. विरतो. ख.
4. तदर्थानुसन्धा - -द्धया इति क. ग. कोशेषु नास्ति ।
5. वाच्यनिष्ठ. क. ग.
6. वीर्याद्यधायक. ख.

केचित्तु ब्रह्मशब्दस्य कोशे वेदवाचकत्वेनोक्तावपि तत्र तस्य निरूढ[1] लक्षणैव । मुख्यतोऽनन्य[2]शेषतया परब्रह्मण एव [3]प्रतिपादकत्वेन मुख्यतस्तत्सम्बन्धित्वरूपबीजसत्वात् । तच्छब्दबोध्यतावच्छेदकं च ब्रह्मविद्यात्वमेव । अत एव मुण्डके "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्" इत्यादौ वेदे ब्रह्मविद्यापदप्रयोगः, ब्रह्मविद्यापदयोः, भीमभीमसेनपदयोः विधिविध्युद्देशपदयोः सत्यासत्यभामापदयोरिव चैकार्थकतौचित्यात्। सति गौरवादिबाधके व्याकरणोक्तस्यापि कर्तृत्वविशिष्टे कर्मत्वविशिष्टे च लकार[4] वाचकत्वस्य नैय्यायिकैस्त्यक्तत्वात् ।

एवं नीलादिपदानां "गुणे शुक्लादयः" इति कोशेन बोधिताया अपि नीलविशिष्टादौ शक्तेर्गौरवेणैव परित्यागेन निरूढलक्षणाया एव स्वीकृतत्वाच्च, एवं पीलवादिपदानामपि वृक्षत्वावच्छिन्न एव शक्तेः तज्जन्यत्वं निमित्तीकृत्य फले निरूढलक्षणाया एव स्वीकृतत्वाच्च।

[5]न चार्थादिनानार्थकपदानां द्रव्यत्वावच्छिन्ते लाघ [6]वाच्छक्तिः, प्रयोजनत्वावच्छिन्ने लक्षणाप्रसङ्ग इति वाच्यम् । यत्र लघुधर्मा-वच्छिन्ने शक्तिः क्लृप्ता, तदीयसाधारणसम्बन्धेन यत्र व्यवहारस्यो-पपत्तिः, तत्रोक्तरीत्या[7]श्रयणात् ।

यथा रघुयद्वादिपदानां तद्वंश्येषु निरूढलक्षणया "रघूणामन्वयं वक्ष्ये" (र. वं 1/4), "यदवः प्रयातुमीषुः" इत्यादयः काव्येषु भूरिप्रयोगाः।

---

1 लक्षणस्यैव. ख.
2. न्याशेष. ख.
3. प्रतिपाद्यत्वेनेति पाठः साधुरिति भाति
4. वाच्यत्वस्येति पाठः साधुरिति भाति
5. नन्वार्थादि. ख.
6. वशक्तिः ख.
7. श्रवणात्. क.

तारस्वरूपप्रकाशः

न च राघवादिशब्दनामेवेदं रूपं, [1] तद्राजसंज्ञाभावेनाणो लोपाभावात्। प्रकृते वेदत्वस्य शक्यतावच्छेदकत्वे कथं गौरवमिति चेत् ; स्वतन्त्रवक्तृरहितवाक्यत्वरूपापौरुषेयवाक्यत्वात्मकवेदत्वस्य स्वातन्त्र्यघटिततया बहुपदार्थ[2]घटितत्वेन गुरुत्वात् । पदक्रमाद्य–संग्राहकत्वाच्च । न चेष्टापत्तिः । ब्रह्मपदघटितोक्तश्रुत्या तदाद्यन्त–योरोङ्कारोच्चारणाऽसिद्धिप्रसङ्गात् ।

किञ्च ब्रह्मविद्यापदब्रह्मपदाभ्यां ईश्वरावगतिहेतुभूतवाक्यत्वेनैव [3]वेदबोधोऽनुभूयते । अन्यथा नैय्यायिकादीनामपौरुषेयवाक्यान–भ्युपगंतृणामबोधकत्वापत्तेः' । प्रत्यक्षादिप्रमाणमूलकत्वविशिष्ट विप्रलम्भाद्यमूलकवाक्यत्वेन [4]तद्बोधे तत्र विप्रलम्भादिमूलकत्व–सन्देहाहितप्रामाण्य[5]संशयाभावप्रसङ्गात् । तादृशरूपेण वेदादिपदजन्यबोधस्यानुभवविरुद्धत्वाच्च । आनुपूर्वीविशेषाणामनन्तत्वेन दुर्ज्ञेयतया तावद्घटितसमुदायत्वरूपशक्यतावच्छेदकोपस्थित्य –भावाद्वेदब्रह्मादिपदैरभ्रान्तानां मुख्यया वृत्या[6] वेदबोधाभावापत्तेः। अतः "वेदा ह्येवैनं वेदयन्ति" इति वाक्यानुसारेण (त. उ. पै. श्रु.) वेदपदेन विशिष्टवस्तुवेदकत्वेन, ब्रह्मब्रह्मविद्यापदाभ्यां च ब्रह्मावगतिसाधनत्वेन बोधो जायत इत्यवश्यमभ्युपेयम् ।

तादृशवाक्यत्वं च वेदे यथा वर्तते [7]तथा तेन ब्रह्मप्रतिपत्तौ जननीयायां अन्तरङ्गतया अनुकूलतया प्रवृत्तेषु ग्रन्थेष्वपि वर्तते इतीतरेषामपि तच्छब्दार्थत्वमेव । "[8]यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् " (त. उ. ब्र. पु.) इति वचनात् ।

---

1. तदासंज्ञाभे. क
2. घटिकत्वेन. ख.
3. विद्याबोधो. क.
4. तद्बाधे. क.
5. संशयप्रसङ्गात्. ग.
6. वेदबाधापत्तेः. क.
7. तथा इति ख. ग. कोशे नास्ति
8. यच्चाविरूद्धमेतस्य. ग.

तारस्वरूपप्रकाशः

परं तु [1]तच्छब्दप्रवृत्तिनिमित्तभूतब्रह्मावगतिहेतुता यथा यथा [2]यत्रोत्कृष्टा वर्तते, प्रवृत्तिनिमित्तसाम्येऽपि स तच्छब्दमुख्यार्थ इत्युच्यते, अन्योऽमुख्य इति । यथा 'धनी' 'सुखी' [3]इत्यादीनां महाधनादिमत्स्वेव मुख्यत्वमन्यत्रामुख्यत्वं, लौकिकबुद्धौ पूर्वं प्रतिभासाप्रतिभासाभ्यां वैलक्षण्यात् । तथा 'अस्मिन् ग्रामे धनिन आनेयाः' इति वाक्येन [4]मुख्यामुख्यधनिनां तात्पर्यवशा[5]ज्ज्ञानं, न लक्षणया [6]अल्पधनिनस्तु तात्पर्याभावादेव न भानम् । एवं चात्यन्तवेदोपकारकतया ब्रह्मप्रमितिहेतुभूतस्य पौरुषेयत्वेन किञ्चिदमुख्यब्रह्म[7] विद्यारूपसूत्रस्य, पूर्वोक्तसामान्यन्यायसिद्धतात्पर्यवशाद्वेदस्यार्थ - वादवाक्यस्थब्रह्मशब्देन यथा बोधस्तथैव वृत्या बोधे न किञ्चिद् बाधकम् ।

सुधास्थावान्तरपदं किञ्चिदमुख्येत्यर्थकम् । ब्रह्मशब्दस्य परब्रह्मप्रतिपादकत्वेन वेदे वृत्तिस्तैत्तिरीयभाष्योदाहृतया "- - - **बृहत्वाद् ब्रह्म वेदानां समुदायेऽखिले स्थितः । तत्सम्बन्धाद् वेदराशिर्ब्रह्मशब्देन कथ्यते**"। (तै.भा. १.१४) इत्यादिस्मृत्याऽपि सिध्यति । 'तत्सम्बन्धात्' इत्यस्य तत्प्रतिपादकत्वरूपसम्बन्धस्य स्थितत्वरूपसम्बन्धस्येव [8]तात्पर्य- विषयत्वे बाधकाभावात् । [9] सूत्रभाष्योदाहृतायां "अशब्दमस्पर्शम्" (कठ. ३. २) इति श्रुतौ अशब्दपदस्यास्पर्शादिपदसाहचर्या[10]च्छब्द रूपगुणनिषेधकत्वेऽपि

---

1. तच्छब्देति ख. कोशे. नास्ति
2. यत्रोत्कृष्टतया. ख.
3. ज्ञानि इति खकोशेऽधिकं पठयते ।
4. महाधनादिधनिनां. ख.
5. दृगानं. ग.
6. अत्यल्प. ख.
7. ब्रह्मविद्यात्वव्य. ग.
8. तात्पर्थविषये. ख.
9. यथा - क.
10. शब्दनिषेध. ख.

वाच्यतासम्बन्धेन शब्दनिषेधकत्वेन प्रकृतोपयोगस्याङ्गीकारस्तद्वदेव प्रकृतम् इत्याहुः ।

इत्थं च पूर्वोक्तरीत्या सुधावाक्य[1] स्वारस्येनैवोहस्य कर्तव्यतायामुपपादकलाभात् । 'अत एव प्रतिसूत्रं ब्रह्मविद्या [2]त्वादोङ्कारस्योहः कर्तव्य इति **जयतीर्थशपथोऽपि निरस्तः**' इत्युक्तिरत्यन्तोन्मा[3]दमूलैव । हेतोरप्युक्तत्वेन शपथरूपत्वाभावात् ।

यदपि - "ब्रह्मशब्दस्य वेदे [4] रूढत्वेन बृंहणादिरूपयोगेन सूत्रपरत्वस्य रथकाराधिकरणन्यायेन विरुद्धत्वात्तथात्वे वा तादृशयोगलभ्येतिहासपुराणादिषु ओङ्कारोच्चारणप्रसङ्गात् । "**यो वेदादौ स्वरः प्रोक्तः** "इति श्रुत्यन्तरेण[5] वेदत्वस्यैव प्रणवोच्चारणव्याप्यतावच्छेदकत्वावगमेन सामान्यतो ब्रह्मशब्दघटित श्रुत्यादयो न सूत्रे प्रणवोच्चारणसाधका"-इति । तदपि सुधाविवरणेनैव निरस्तम् ।

ब्रह्मशब्दस्य वेदमात्रपरत्वेऽपि सूत्रादौ तदुच्चारण[6]स्य व्यवस्थापितत्वात् । ब्रह्मशब्दस्य सूत्रसाधारणरूपावच्छिन्न[7]परताया अपि व्यवस्थापितत्वात् । तत्पक्षे भारतादिप्रतिबन्दीपरिहास्येष्टापत्त्या निपुणं व्यवस्थापितत्वात् । "यो वेदादौ" इति त्वदुक्तेरत्यन्तं [8]निरभिप्रायकत्वस्योक्तत्वेन तद्वाक्येन वेदोच्चारणस्य प्रणवोच्चारण-

---

1. स्वरेसेनैव. ख.
2. त्वदाद्यन्तयोरोङ्कार. ख.
3. मूलिकैव. क.
4. रूढत्वे. ग.
5. वेदत्वस्यैव इति पदं क कोशे नोपलभ्यते
6. स्याव्यव. ग.
7. परतया. क.
8. निर्विपयकत्वस्यो. ग.

व्याप्यतासिद्धेः सुदूरपराहतत्वात् ।

यदपि "ओमिति ब्रह्मणः प्रवक्ष्यन्नाह" (तै.उ. १.१६) इति वाक्यं सूत्रादावोङ्कारोच्चारणे मानमित्याशङ्क्य ब्रह्मब्राह्मणशब्दयोर्वेदतद- ध्येतृ[1] वाचित्वेन ब्रह्मपदस्य सूत्रपरत्वाभावान्नेयं श्रुतिस्तत्र मानमिति। तदपि [2]न । वेदानुसन्धानोच्चारणान्यतरपूर्वकं ब्रह्मसूत्रार्थानुसन्धान-पूर्वकतत्पाठस्य वेदप्रवचनात्मकत्वादेव तदादावोङ्कारोच्चारणसिध्दे-रुक्तत्वेन तत्र लक्षणाप्रसक्त्यभावात् ।

किञ्च रथकाराधिकरणनिर्भरवतस्तव [3]ब्राह्मणशब्दो [4]रूढ्या ब्राह्मणत्वजात्यवच्छिन्नवाच्यमेव । एवं 'प्रवक्ष्यन्' इत्यत्र धातुः प्रवचन-सामान्यपर एव । "ऋतं च स्वाध्यायप्रवचने च" (तै.उ.१.२०) इत्यादौ प्रवचन- सामान्यस्यैव बहुशो गृहीतत्वाच्च । दुश्शास्त्रप्रवचनस्य तदाभासत्वेन तद्रूपत्वाभावात् । "ब्रह्मैवोपाप्नुवानि" इत्युत्तरवाक्यानुसारेण प्रशब्देन ब्रह्मप्राप्तिहेतुत्वरूपप्रकर्षाभिधायकेन [5]विशिष्टप्रवचनत्वरूपसामान्यधर्मपुरस्कारेण समग्र[6]वेदावान्तरवेद - प्रवचनयोरिव समग्रसूत्रावान्तरसूत्रप्रवचनयोरपि लाभात्तदादा - वोङ्कारोच्चारणमकामेनाप्यङ्गीकार्यम्। अन्यथा[7]वेदप्रवचनमात्रपरत्वे लक्षकत्वापत्तेः। ब्राह्मणपदस्य वेदाध्येतृवाचकत्वेप्युक्तार्थाऽहानिरेव। तस्यानधिकारिव्यावृत्त्यर्थमुपात्तत्वेन तत्समभिव्याहाराद्वेदप्रवचनस्यैव लाभ [8]इत्यर्थस्यासिद्धेः । इत्थं चैतद्वाक्यस्यान्यैरप्येवमनुष्ठेयमिति

1. वाचिब्रह्मपदस्य. ग.
2. नेति क कोशे नास्ति ।
3. ब्रह्मण. ख.
4. रूढयेति क कोशे नास्ति.
5. विशेष्य. ग.
6. वेदान्तर. क.
7. वेदेति गकोशे नास्ति.
8. इत्यस्यार्थस्य. ख.

तारस्वरूपप्रकाशः

बोधनाय पूर्वाचारानुवादकतया तस्यापि निर्मूलत्वायोगेन तन्मूलतया 'स्रवत्यनोङ्कृतं" इति श्रुतिरेव[1] वक्तव्या । अन्यथा दृष्टहान्यदृष्टकल्पनाप्रसङ्गात् । इत्थं च [2]तव वेद-तदनुबन्धिग्रन्थसम्बन्धि[3]पारायणप्रवचनादिकं ग्राह्यमेवेत्यभिम-तार्थसिद्धिर्निर्ष्प्रत्यूहैव । आचारबोधकवाक्य उत्तरत्रोङ्कारोच्चारण-स्यानुक्तावपि न क्षतिः । सर्वं वक्तव्यमिति नियमाभावात् । यदपि वेदशब्दस्य सेतिकर्तव्य[4]ताकत्वविशिष्टवेदवाचकत्वाशङ्कनं, मीमांसायाः पूर्वमेव तत्र वेदशब्दस्य बहुशः [5]प्रयोगदर्शनेन तन्निराकरणं च, तदस्मदनुक्तोपालम्भनरूपमेव ।

यदपि - "उच्चैः [6]प्रावर्ग्येण चरन्ति अवभृतेन चरन्ति" इत्यादिस्थले उच्चैस्त्वादेरङ्गाङ्ग्युभयान्वयस्य तान्त्रिकैर्व्यवस्थापितत्वेन [7]तद्वदिहाप्योङ्कारस्येतिकर्तव्यतात्मकमीमांसाशास्त्ररूपाङ्गवेदरूपा-ङ्ग्युभयानुबन्धित्वमाशङ्क्य "वैषम्यात्" इत्यादिग्रन्थेन 'युक्तं तत्रोच्चैस्त्वादेरुभयाङ्गत्वं, 'प्रावर्ग्येण' इत्यादितृतीयाश्रुत्या प्रावर्ग्यादिकरणकत्वविशिष्टस्याङ्गिनो विधानात् । न चेह तथा "यया तदक्षरमधिगम्यते" इत्यक्षराधिगमभाव्यकपरविद्याकरणकभावना न्वयितयोङ्कारो विधीयते । किन्तु "काम्या इष्टयस्ता उपांशु कर्तव्याः"

---

1. मूलभूता इति क. ख. कोशेषु पाठ्यते
2. तवेति ख. कोशे नास्ति
3. करणाय ख.
4. ताकवि. क.
5. प्रत्ययदर्शनेन. ग. प्रयोगादर्शने. क.
6. प्रवर्ग्यैण. क.
7. तदिहा.ग.

इत्यत्रो[1]पांशुत्ववन्नाङ्गान्वयं लभत इत्याद्यभिहितं, तदस्माभिः "यया तदक्षरमधिगम्यते" (आथ.1.4.) इति वाक्यस्य विधाय[2]कत्वेनानङ्गीकारात्तत्र विधिप्रत्ययाश्रवणेन विधायकत्वाप्रसक्त्या चात्यन्तासम्वध्दम् । 'स्रवति' इति वाक्यस्यैवोङ्कारोच्चारणप्रापकत्वाङ्गीकारात् । न च तद्वाक्यं ओङ्कारं वेद[3] स्वरूपमात्रसम्बन्धितया प्रतिपादयतीति वाच्यम् । उक्तोत्तरत्वात् ।

किञ्च 'ब्रह्म वेदस्तपस्तत्वं' इति कोशमवलम्ब्य हि त्वया ब्रह्मशब्दो वेदपरो न सूत्रपर इत्युच्यते । तत्रैव कोशे ब्रह्मशब्दस्य [4]तपस्यपि शक्तेरुक्तत्वेन "स्रवति" इत्यादिवाक्यं तपःपरं किं न स्यात् ।

न च "ब्रह्मणः प्रणवं कुर्यादादावन्ते च" इत्ये[5] तच्छिक्षावाक्यं वेदप्रकरण एव पठितमिति प्रकरणवशाद्वेद एव ग्राह्यमिति वाच्यम्। मनुस्मृतौ ब्राह्मणसम्बन्ध्याचारकथनप्रस्ताव एवैतद्वचनस्य सत्वेन तपसोऽपि ग्रहणस्य युक्तत्वात् । तावतापि किमायातमिति चेन्न। "**स्वाध्यायप्रवचन एवेति नाको मौद्गल्यः, तद्धि तपस्तद्धि तपः**" (तै.उ.प्र.व.1.4.) इति द्विरुक्त्याऽऽदरपूर्वकं [6]वेदाध्ययनपाठादिरूपस्वाध्यायस्य तदर्थकथनरूपप्रवचनस्य च तपस्त्वोक्तेः, द्विवचनेन प्रक्रान्तयोरपि स्वाध्यायप्रवचनयोः स्वाध्यायप्रवचनात्मक[7] कर्मत्वरूपेण बुद्धिस्थेन सामान्यरूपेण [8]एकीकृत्य परामर्शात् 'तत्' इत्येकवचनोपपत्तिः। उक्तं च

1. उपांशुवन्ना. क.
2. कत्वे. ग.
3. वेदमात्र. ग.
4. तमस्यपि. क.
5 तच्छिखा. क.
6. वेदाध्ययनपाठादिरूपस्वाध्यायस्येति ग कोशे नास्ति.
7. कर्मस्वरूपेः क.
8. एकत्र

तारस्वरूपप्रकाशः

तैत्तिरीयभाष्योदाहृतस्मृतौ -

"स्वाध्याये च प्रवचने ह्यन्तर्भावो विशिष्यते ।
सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ हि तौ" इति ।(तै.भा. १.२२)

इत्थं च 'स्रवति' इति वाक्ये वेदमात्रग्रहणे विनिगमनाविरहात्तपसोऽपि ग्रहणे प्राप्ते, ब्रह्मशब्दस्य वेदत्वावच्छिन्नपरत्वे तपसो [1]लाभाभावप्रसङ्गः ।

किञ्च 'अनोङ्कृतम्' इत्यस्यो[2]ङ्कारकरणरहितमित्यर्थः । तथा चोङ्काररराहित्यस्य [3]वेदे सर्वदा विद्यमानत्वात् सर्वदा वेदस्य स्रवणविशरणादिना निर्वीर्यत्वापत्तिः । वेदानामेकत्वेनैकपुरुषोच्चारणा-भावकालेऽपि पुरुषान्तरसम्बध्युच्चार[4]णसत्वेनानोङ्कृतत्वं नास्तीत्यङ्गीकारे ओङ्कारोच्चारणमकृत्वाऽपि वेदपाठादिनाऽपूर्वोत्पत्तिप्रसङ्गः, पुरुषान्त-रोच्चारणस्य सत्वात् । अतो ब्रह्मशब्दस्य पठ्यमानत्वविशिष्ट-वेदत्वावच्छिन्ने लक्षणा; अनोङ्कृतत्वं सामर्थ्याद्विशेषणीभूतपाठेऽन्वेति । अनोङ्कृतपदस्य ओङ्कारोच्चारण- पूर्वक[5]पाठाविषयत्वावच्छिन्ने लक्षणा वेति वक्तव्यम् । अतोऽर्थवाद- स्थशिक्षा[6]वाक्यस्थं ब्रह्मपदं तपस्त्वावच्छिन्नपरमेव । अत एव श्रुतिशेषे 'अनोङ्कृतमासुरं कर्म' इति कर्मसामान्यग्रहणं पूर्वोक्त, ब्रह्मपदार्थस्य विवरणरूपतया श्लिष्टम् ।

'यज्ञदानादिकाः क्रियाः । प्रवर्तन्त' (भ.गी.17.25.) इति गीताप्युक्तार्थे संवादिनी भवति । तथा च तपस्त्वेन

---

1. लाभाप्रसङ्गः क.
2. ङ्कारकारण. ख. उ तथा क. ख. ग.
3. वेदपाठेन
4. णासत्वे क.
5. पाठविषय. क.
6. वाक्यस्य. ग.

तारस्वरूपप्रकाशः

स्वाध्यायपदोक्त[1]वेदपाठस्य प्रवचनपदेनोक्तरीत्या सूत्रप्रवचनादेश्च लाभादभिमतार्थसिद्धिः । श्रुतौ[2]स्वाध्यायपदं तत्पठनपरमेव । न तु वेदपरम् । तथात्वेऽन्तेवासिनं प्रति [3]कर्तव्यत्वेन तदुपदेशानुपपत्तेः। इत्थं च 'अनोङ्कृतं ब्रह्म' इति श्लिष्टमेव भवति। न तु ब्रह्मपदस्य [4]वेदवाचकत्वपक्षे । पूर्वोक्तान्यतरपदलक्षणादोषश्च।

न चैवं जैमिन्यादिसूत्रव्याकरणसूत्रादिप्रवचनस्यापि लाभेन तत्राप्योङ्कारोच्चारणप्रसङ्ग इति वाच्यम् । तेषामपि परम्परया ब्रह्मप्रतीत्युद्देश्येनैव ऋषिभिः प्रणीतत्वेन तेषामप्यमुख्यविद्यात्वस्य भारतादाविवोक्तरीत्या इष्टत्वात् । अत एव सुधायामेतल्लाभायै-वावान्तरब्रह्मविद्यात्वमुक्त्वा ओङ्कारस्योहः कर्तव्य इत्युक्तम् । तथा च त्वदभिमत[5]कोशप्राप्तशक्तिबलेनाप्याद्यन्तयोरोङ्कारो-च्चारणसिद्धेस्त्वदा[6]ग्रहो अयुक्त एव ।

नन्वेवं तर्हि वेदपरत्वं ब्रह्मशब्दस्य स्वीकृत्य भवदुक्तपूर्वव्या-ख्यानमसङ्गतम् । अन्यतर[7]पदलक्षणारूपदोषस्य भवदुक्तस्यैव, सत्वादिति चेन्न । वेदतपसोर्ब्रह्मशब्दवाच्यत्वसाम्येऽपि तपोऽपेक्षया वेदे प्रयोगबाहु[8]ल्यस्वारस्यं "अनोङ्कृतमासुरं कर्म" इति श्रुतौ कर्मशब्दस्य पूर्वोक्तब्रह्मशब्दार्थविवरणत्वापेक्षया भिन्नार्थकत्वे स्वारस्यं चाभिप्रेत्योक्तलक्षणाया निरूढत्वमभिप्रेत्य पूर्वं व्याख्यातम् । तथात्वेऽपि गीताद्युक्तस्य सर्वस्यानुकूलनात् । इदानीं तु गीताद्युक्त [9]सर्वसङ्ग्रहा-भावदोषसाहित्येनान्यतरलक्षणारूपदोष प्रावल्यमभिप्रेत्याग्रहस्त्याजित

1. वेदपाठस्येति ग कोशे नास्ति
2. साधुप. क.
3. कर्तव्यत्वेन इति ग. कोशे नास्ति
4 वेदावाच्य. ग.
5. कोशप्राप्तेति क कोशे नास्ति
6. स्रहेऽयुक्तेव. क.
7. वादलक्षणा. क.
8. त्यात्स्कार. ग.
9. सङ्ग्रहदोषरा. क.

तारस्वरूपप्रकाशः

इत्यदोषात् ।

न चैवमपि ब्रह्मसूत्राणामाद्यन्तयोरोङ्कारोच्चारणं कार्यमिति स्फुटप्रमाणाभावात् पूर्वोक्त[1]सामर्थ्यरूपार्थापत्त्या नैषोऽर्थः सिध्यतीति वाच्यम् । अर्थापत्या सेत्स्यमानोऽर्थः स्पष्टप्रमाणं विना न सिध्यतीत्यङ्गीकारे तेनैवास्या गतार्थतापत्या तस्याः स्वतन्त्र-प्रमाणत्वाभावेन तदुपन्यासानर्थक्यापत्तेः । किन्तु सकल[2]प्रमाणविरोधाभावमात्रमपेक्षितम् । स च प्रकृतेऽस्तीत्युक्तप्रमेय-सिद्धेरावश्यकत्वात् । अन्यथा भवन्मतेऽपि सर्वे [3]मुक्ता समानानन्दा इति स्पष्टप्रमाणाभावेन **"परमं साम्यमुपैति"** (आथ.१.३.३) इत्यस्पष्टप्रमाणमवलम्ब्य लोकसिद्धं परस्परेर्ष्याद्याभावरूपं न्यायमनुसृत्य तत्साधनस्य, एवं ब्रह्मणि भिन्नोऽभिन्नश्च द्वौ आनन्दौ वर्तेते इति स्पष्टप्रमाणाभावेऽपि **"आनन्दं ब्रह्म" "ब्रह्मण आनन्दः"** (तै. ब्र. व.) [4]इत्युभयव्यवहारान्यथानुपपत्या तादृशानन्दद्वयसाधनस्य चासांगत्या-पत्तिः । परं तु भवत्साधनस्य बहुतरप्रबलप्रमाणविरोधो नास्मदीयस्येत्येव[5] वैषम्यम् ।

यद्यपि **"अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरुदहत्"** इति वेद[6]त्रयोपादानकोच्चारणविषयत्वेन **"ओङ्कारप्रभवाः वेदाः"** इत्यादावोङ्कारस्य वेदमूलत्वेनावगतस्य तदा-द्यन्तोच्चारणमेव युक्तं, न तु सूत्राद्यन्तोच्चारणम्" इति । तन्न । वेदानामोङ्कारादुत्पन्नत्वं नाम न जन्यत्वं, द्वयोरप्यनादित्वात् । किन्तु

---

1. क्तार्थापत्त्या. क.
2. प्रवलमान. क.
3. मुक्ता. ग.
4. इत्युभयार्थाव्य. ख.
5. विषमम्. ग.
6. त्रयापादा. क.

तद्व्याख्यानात्मकत्वमेव । तच्च वेदव्याख्यानात्मकसूत्राणामप्यस्तीति तत्रापि तदुच्चारणस्यावश्यकत्वात् ।

(*ब्रह्ममीमांसाशास्त्रस्य परविद्यात्वाभावशङ्कानिरासः*)

यदपि "स ब्रह्मविद्यां" इत्यत्र ब्रह्मसूत्राणामपि ब्रह्मविद्याशब्द-बोध्यत्वादिकं प्रसक्ता[1] नुप्रसक्त्याऽऽशङ्क्य ब्रह्ममीमांसाया वेदेतिकर्तव्यतारूपाया न ब्रह्मज्ञानकरणत्वरूपं ब्रह्मविद्यात्वं करणत्वे-तिकर्तव्यतात्वयोर्भावनाया अंशत्रयवत्वव्याघातेनैकस्मिन् [2] समा-वेशाऽयोगात् । करणेतिकर्तव्यतयोः समप्रधान[3] भावापाताच्च । प्रयाजादीनामपि करणत्वापत्तेश्च । तथा च वेदेतिकर्तव्यतारूपाया मीमांसायाः वेद[4] भाव्यज्ञानं प्रति करणत्वाभावात्कथं ब्रह्ममी-मांसाशास्त्रस्य ब्रह्मविद्यात्वमित्युक्तम् ।

तत्रेदं वक्तव्यम् - करणत्वं द्विविधमुक्तं प्राचीनैः व्यापारवत्कारणत्वमेकं, अपरं फलायो[5]गव्यवच्छिन्नत्वम् । द्वितीयलक्षणस्येत्थं निष्कर्षः कर्तव्यः । स्ववृत्तियादृशरूपावच्छिन्न-क्षणाव्यवहितोत्तरक्षणत्वं कार्योत्पत्त्यधिकरणत्वव्याप्यं तादृशरूपावच्छिन्नत्वमिति । अन्यथा [6] आलोकाद्यसमवधानकाले केवलचक्षुषा घटसंयुक्तचक्षुषा वा कार्याजननात्तत्राव्याप्तेः ।

अव्यावर्तकपदार्थघटितसमुदायत्वस्यापि तथात्वे तत्तदाश्रयेषु करणत्ववारणाय, यद्यद्रूपावच्छिन्नघटितसमुदायत्वं प्रकृतकार्योत्प-त्तिप्रयोजकतावच्छेदकतावच्छेदकं तत्तद्रूपावच्छिन्नसमुदाय-

---

1. क्तान प्रयुक्ता. ग.
2. रामावेशयोगात्.क.
3. भावः च. क.
4. भाष्याज्ञानं. ग.
5. योगाव्य. ग.
6. लोकासमवायि. क.

तारस्वरूपप्रकाशः

त्वघटकतावच्छेकरूपावच्छिन्नं करणमिति निष्कर्षः कार्यः । कालादृष्टादीनां सामान्यकारणानामव्यावर्तकानां तादृशसमुदाय-कोट्यप्रविष्टत्वान्न तेषां करणत्वम् । तेषामपि करणत्वानङ्गीकारश्च प्राचां "करणं [1]साधकतमं" इति कोशमवलम्ब्य । तत्र तमपा साधारणकारणव्यावर्तनात् । इत्थं [2]चालोकादेरपि करणत्वं दुर्वार मेव। तेषामपि तादृशसमुदायान्तःपातित्वात् ।

व्यापार[3]वत्कारणं करणमिति पक्षे आलोकस्यापि स्वसंयोग-रूपव्यापारवत्वात् । न चैवं "चक्षुषा घटं पश्यति" इति प्रयोगवत्, "आलोकेन घटं [4]पश्यतीति प्रयोगप्रसङ्गः । हेतुतृतीयाघटिततादृशप्रयोगस्य सर्वैरप्यङ्गीकर्तव्यतया इयं तृतीया हेतावेव न करण इत्यत्र नियामकाभावेनेष्टापत्तेः । अत आलोकस्यापि करणत्वापत्तिरिति त्वदुक्तिरसमञ्जसैव । अत एव सुधायां पिपीलिकालिपेरपि [5]मनसाक्षरस्मृतौ जननीयायां संस्कारस्य व्यापा-रतया [6]तदुद्बोधहेतुत्वेन स्मृतिरूपप्रमासामग्रीघटकत्वात्प्रामा-ण्यमित्युक्तं, "पिपीलिकालिपिश्चापि प्रमाणमविरोधतः" इत्यनुव्याख्यानव्याख्यावसरे । इदमुपपादितं च तट्टिप्पणीषु [7]श्रीमद्यादवाचार्यप्रभृतिभिस्तत्रैवानुसन्धेयम् ।

किञ्च चैत्रेण तुषैर्मैत्रेण काष्ठैः क्रियमाणे एकस्मिन् पाके सति तत्पाकतात्पर्येण, 'मैत्रस्तुषैः पचति' इति प्रयोगवारणाय समभिव्या-

---

1. साधकमिति. ख.
2. लोकादे. ख.
3. त्करणं कारणं. क.
4. पश्येति. क.
5. मानसस्मृतौ. ग.
6. तद्वोध. क.
7. यदि वाचा. ख.

हृतकर्तृव्यापाराधीनत्वं तृतीयार्थ[1]करणघटकव्यापारे प्रतीयत इत्य भ्युपेयम् । एवं च चक्षुर्व्यापारे पुरुषाधीनत्वमिव नालोकव्यापा इति तत्समकक्ष्यतया न मुख्यः प्रयोगः । न ह्येतावता आलोकस्य करणत्वं केनापि वारयितुं शक्यते । [2]यत्कार्यनिर्वाहाय यत्प्रथ ममपेक्ष्यते तत्प्रधानं, तत्सहकारितयाऽनन्तरमपेक्षमाणम् अप्रधानम्। तथाप्यप्रधा करणं भवत्येव । यथा घटादिकं प्रति मृदादिकमेव[3] प्रधानसाधनं उत्सर्गतः प्रथमतोऽपेक्षितत्वात् । [4]तत्सिध्यनन्तरमेव घटोत्पत्य दण्डादयोप्यपेक्षिता अप्यप्रधानकरणानि भवन्त्येव । नत्वकारणानि दण्डादयो मृद इतिकर्तव्यतारूपा भवन्ति । कपालसंयोगादि रूपव्यापारद्वारा कारणतया करणभूतमृ तादृशसंयोगादिरूपातिशयाधायकत्वात्। प्रधाननिष्ठप्रकृत कार्योपधायकतानिर्वाहकतातिशयाधायकस्यैवेतिकर्तव्यतात्वात्' एवं चालोकस्य चक्षुषि स्वसंयोगावच्छेदकदेशाव- च्छिन्नसंयोगसम्पादकतयेति कर्तव्यतारूपत्वमपि । एवमन्यत्रापि यथायथं द्रष्टव्यम् । एतदेवाभिप्रेत्य, 'न हि बीजादेरङ्कुरादिक जनयस्सह[7]कारिभूतस्य क्षितिसलिलादेरङ्कुरादिकं कार्यं न इत्यादिनेतिकर्तव्यताया अपि (करणकोटौ) निवेशः सुधायां समर्थितः

एवं वेदेन ब्रह्मज्ञाने जननीये वेदनिष्ठं यच्छक्ति[8] तात्पर्य- ज्ञानविषयत्वरूपातिशायनं ; तन्निर्वाहिका मीमांसाऽपि तात्पर्यज्ञानरूपव्यापारजननद्वारा ब्रह्मावबोधे करणं भवत्येव । प तु वेदापेक्षया साऽप्रधानसाधनम् । अत एव, 'असम्भावना-

---

1. करणक. क.
2. तत्कार्य. क. ग.
3. प्रमासाधनं. क. ग.
4. तच्छुद्ध्यनन्तर. ख.
5. रूपाव्यापार. ख.
6. कार्येऽपिधा. ख.
7. कारिणः. ग.
8. तात्पर्यविषयत्व. क.

Oriental Research Institute Series No. 191

University of Mysore

प्राच्यविद्यासंशोधनालयग्रन्थमाला - १९१

मैसूरु विश्वविद्यानिलयः

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

Critically edited by

Vidwan A. V. Nagasampige M.A.

Oriental Research Institute, Mysore

2000

Price: 38=00

First Edition - 2000

Sponsored by
**Sri 1008 Sri Satyatmatirtha Swamiji
Uttaradimatha, Bangalore**

Copies: 1000

Published by
**The Director,
Oriental Research Institute
University of Mysore
Mysore-570 005**

Printed by
**Bhavana Printers
Kuvempunagar, Mysore-570 004**

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

प्रधानसम्पादकः

डा. के. वि. रमेशः

गौरवनिर्देशकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः, मैसूरु

२०००

Oṃkāravāda

of

Śrī Vidyādhīśatīrtha

and

Tārasvarūpaprakāśa

of

Śrīnāthācārya

General Editor

Dr. K. V. Ramesh

Honorary Director

Oriental Research Institute, Mysore

2000

श्रीविद्याधीशतीर्थविरचितः

ओङ्कारवादः

श्रीनाथाचार्यविरचितः

तारस्वरूपप्रकाशश्च

सम्पादकः

विद्वान् ए. वि. नागसम्पिगे एम्.ए.

न्याय-वेदान्तविद्वान्

संशोधकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः, मैसूरु

२०००

Oṃkāravāda
of
Śrī Vidyādhīśatīrtha
and
Tārasvarūpaprakāśa
of
Śrīnāthācārya

Critically edited by
Vidwan A. V. Nagasampige M.A.
Nyaya-Vedanta Vidwan
Research Assistant
Oriental Research Institute, Mysore

Oriental Research Institute, Mysore
2000

PREFACE

It gives me great pleasure to present two hitherto unpublished works viz., The Oṃkāravāda of Śrī Vidyādhīśatīrtha Swamiji of Uttaradimatha and the Tārasvarūpaprakāśa of Śrī Hulagi Śrīnāthācārya. Both these works are very valuable for scholars interested in understanding the nuances of the Dvaita system of philosophy.

These two works prove with elaborate quotations and arguments that the sacred syllable 'Om' is a part of the first Brahmasūtra, just as the word 'Atha'. The two venerated authors have discussed many theories and views regarding the meaning and significance of 'Om'. There is no doubt that these two works occupy a high place among the works of the Madhva Vedanta system.

Vidwan Sri. Nagasampige, a Senior Research Assistant of our Institute, is an out-standing scholar in the field of Dvaita philosophy. He has many works to his credit in addition to numerous translations of Dvaita Works. He has edited the two works mentioned above with the help of four manuscripts. I trust these two works will be received by interested scholars with warmth.

Sri Śri Satyatma Tirtha Swamiji, the present pontiff of Śri Uttaradi Matha, is a scholar of very high standard in many branches of learning. He has very generously extended financial support for the publication of these two works. The Oriental Research Institute records its sincere gratitude to the holy feet of Śri Śri Satyatma Tirtha Swamiji.

I acknowledge the help extended by our Vice-Chancellor Prof. S.N. Hegde for the publication of Sanskrit classics. My thanks are due to the Registrar Prof. V.G.Talwar and Finance Officer Sri Mahadevaswamy for their co-operation. Our gratitude is due to M/s Bhavana Printers for their neat work.

Dr. K. V. Ramesh
Hon. Director
O.R.I. Mysore

प्राङ्निवेदनम्

महदिदं प्रमोदस्थानं यत् प्राच्यविद्यासंशोधनालयग्रन्थमालायाः एकनवत्युत्तरशततमं (191) पुष्पं विकसतीदानीमिति ।

ग्रन्थप्रकाशनमेवास्याः संस्थायाः प्रधानं कर्म इति निश्चप्रचम् । भारते वर्षे तत्र तत्र सञ्चार्य ग्रन्थाः सङ्गृह्यन्ते । सङ्गृहीताश्च संशोध्यन्ते, प्रकाश्यन्ते विक्रीयन्ते च ।

सन्ति चात्र एकादशसंख्याकाः संशोधकाः नानाशास्त्रविशारदाः संशोधनकर्मणि निरताः । तेषु अन्यतमः श्री आनन्दतीर्थनागसम्पिगे महोदयः ग्रन्थस्यास्य सम्पादकः ।

अत्र ग्रन्थद्वयं सम्पादितं वर्तते । एकः ओङ्कारवादः, स च श्रीविद्याधीशतीर्थविरचितः । अन्यः तारस्वरूपप्रकाशः, स च श्री श्रीनाथाचार्यविरचितः ।

वेदान्तोदयः "द्वापरे सर्वत्र ज्ञान आकुलीभूते ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान्नारायणः व्यासत्वेन अवततार"। अवतीर्य च वेदविभागमकरोत् ।

ऋग्वेदादिवेदविभागकरणेन तस्य वेदव्यास इति नाम अन्वर्थमासीत् । ततः वेदार्थनिर्णयाय ब्रह्मसूत्राणि चकार ।

वेदव्यासकृतब्रह्मसूत्राणि अधिकृत्य कालक्रमेण एकविंशतिभाष्याकाराः स्वस्वमतानुसारेण भाष्याणि अलिखन् । द्वाविंशो भाष्यकारः श्रीमदानन्दतीर्थभगवत्पादाचार्यः । तेन कृतं यत् ब्रह्मसूत्रभाष्यं तदधिकृत्य टीकाटिप्पणीकाराः बहवः वर्तन्ते । एवं वेदव्यासादारभ्य अद्यावधि वेदान्तप्रवाहः सुष्ठु प्रवहन् विराजते ।

ओङ्कारवादः - वेदव्यासेन रचितेषु ब्रह्मसूत्रेषु आदिमं सूत्रम् "अथातो ब्रह्मजिज्ञासा" इति । द्वैतवेदान्तानुसारेण "ओम् अथातो ब्रह्मजिज्ञासा" इति आदिमं सूत्रम् । अत्र आदौ विद्यमानः ओङ्कारः सूत्रावयवो वा न वेति महान् वाक्यार्थः शास्त्रकारैः कृतो वर्तते । अपि च "स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यत" इति प्रमाणानुसारेण आद्यन्तयोः ओङ्कारोच्चारणे सति "ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्" इति आदिमं सूत्रं सम्पन्नं भवति ।

"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" । "तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्" "सर्वस्य प्रणवो ह्यादिः मध्यमन्तस्तथैव च" ॥ "सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः" इत्यादि श्रुतिस्मृतिरूपप्रमाणानुरोधेन सर्वेषां सूत्राणाम् आद्यन्तयोः ओङ्कारोच्चारणं प्रसज्यते । तथा च प्रथमसूत्रे ओङ्कारत्रयम् इति एकः पक्षः । एकस्यैवोङ्कारस्य दृष्टादृष्टोभयफलकत्वेन द्वावोङ्कारावित्यपरः पक्षः । अयमेव विषयः सप्रमाणं सविमर्शं ग्रन्थेऽत्र महानुभावैः श्री श्री विद्याधीशतीर्थभट्टारकैः न्यायव्याकरणमीमांसावेदान्तचतुरैः सम्यक् प्रतिपादितो वर्तते ।

तारस्वरूपप्रकाशः - "ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्" "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" । इति प्रमाणानुरोधेन "ओम् अथ" इति सूत्रारम्भे विद्यमानः एकः ओङ्कारः सूत्रावयवः । स्रवत्यनोङ्कृतम् इति प्रमाणानुरोधेन आद्यन्तयोः ओङ्कारद्वयं, तथा च "ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्" इति आद्यसूत्रे ओङ्कारत्रयम्। द्वितीयादिसूत्रेषु तु स्रवणविशरणाभावसम्पादकतया आद्यन्तयोः ओङ्कारद्वयम् इति अयं

विषयः सुविस्तृततया सप्रमाणतया सविमर्शं पाण्डित्यपूर्णया शैल्याऽस्मिन् ग्रन्थे सुस्पष्टं निरूपितः । ग्रन्थस्यास्य कर्ता श्री श्रीनाथाचार्यः । स च न्यायव्याकरणवेदान्त- मीमांसादिशास्त्रेषु प्राप्तप्रावीण्यः । द्वैतद्युमणिकार इत्येव प्रसिद्धश्च ।

ओङ्कारविषये अयं वाक्यार्थप्रवाहः विद्वज्जनेषु तत्र तत्र प्रचलति। तादृशवाक्यार्थविषये मार्गदर्शकौ एतौ ग्रन्थौ, प्राच्यविद्यासंशोधनालयस्य संशोधकेन विदुषा आनन्दतीर्थनागसम्पिगे महोदयेन सुष्ठु संशोधितौ अध्येतृजनेभ्यः अर्पितौ च । स च सम्पादकः सम्पिगे महोदयः न्यायशास्त्रे वेदान्तशास्त्रे च कृतपरिश्रमः । सविमर्शं संशोधनकर्मणि निमग्नश्च । प्राच्यविद्यासंशोधनालये तथान्यत्र ग्रन्थालयेषु विद्यामानमातृकासाहाय्येन ग्रन्थाविमौ संशोधितवान् । महत्त्या श्रद्धया प्रतिभया च शुद्धः पाठः प्रदत्तः। तथा अध्येतॄणाम् आनुकूल्यार्थं अनुव्याख्यान-श्रीमन्न्यायसुधा-वाक्यार्थचन्द्रिका-परिमळ-यादुपत्य-तात्पर्यचन्द्रिका-प्रकाशादिग्रन्थमूलपाठोऽपि प्रदत्त इत्ययं महान् विशेषः।

ग्रन्थद्वयप्रकाशनार्थं श्रीमदुत्तरादिमठाधीशाः, श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः सकलतन्त्रविचक्षणाः विपश्चिद्वरेण्याराधितकमनीयचरणाः विश्रुतौदार्यादिगुणिनः अपेक्षितमूल्यप्रदानेनानुगृहीतवन्तः । प्रतिक्षणमपि श्रीमन्न्यायसुधादिपाठप्रवचनैकदीक्षाः राजा भोज इव श्रीमत्सत्यध्यानतीर्थगुरुराज इव च विद्वन्निर्माण-पोषण-सम्मान-ग्रन्थप्रकाशन-परवादिनिग्रह-सज्जनानुकम्पादिगुणैः विश्वविख्याताः। तेभ्यः प्रणतिततयः समर्प्यन्ते । ग्रन्थस्यास्य सम्पादनसमये संशोधनालयस्यास्य भूतपूर्वनिर्देशिका श्रीमती डा. एच्. पि. देवकी महाभागा, सम्पादनकर्मणि प्रोत्साहदायिनी, योग्या मार्गदर्शिका,

विद्वत्पक्षपातिनी, गुणग्राहिणी, स्वयं संस्कृतज्ञा च । इदानीं अस्याः संस्थायां निर्देशकमहाभागः श्रीमान् डा. के. वि. रमेश महाभागः संस्कृतप्रियः, संस्कृतज्ञः, विद्यापक्षपाती, कार्यचतुरः सौजन्यशीलश्च।

अनयोः शुभाशीवदिन ग्रन्थोऽयं प्राकाश्यं नीयत इति सन्तोषस्य स्थानम्। ग्रन्थस्यास्याध्ययनेन विद्वज्जनाः तुष्टा भवेयुरित्याशासेऽहम्।।

इति
सुधीविधेयः
'पाण्डितरत्नं' 'विद्यावाचस्पतिः'
'वेदान्तभूषणम्' 'प्रवचनचतुरः'
'न्यायवेदान्तविद्वान्'
आर. जि. माळगी, एम्.ए.
उपनिर्देशकः
प्राच्यविद्यासंशोधनालयः

मैसूरु
14-12-1999

कृतिद्वयसमर्पणम्

ग्रन्थरत्नयोरनयोः प्रकाशनार्थं समग्रमूल्यप्रदानेनानुगृहीतवतां श्रीमदुत्तरादिमठाधीशानां श्री १००८ श्रीमत्सत्यात्मतीर्थश्रीमच्चरणानां करकमलयोः कार्तज्ञ्याविष्करणपूर्वकं कृतिद्वयं समर्प्यते ।

श्रीमदुत्तरादिमठपरम्परा

स्वज्येष्ठकुमारं चतुर्मुखं निमित्तीकृत्य सज्जनानुजिघृक्षया भगवान् नारायणः हंसरूपी तत्त्वधर्मस्वरूपाद्युपदिदेशेति श्रीमद्भागवते श्रूयते[1] । ब्रह्मणा च तन्मानसपुत्राः दिग्वाससः उपदेशं लेभिरे । ततः परं भगवान् शङ्करो दुर्वासोरूपी ज्ञानपरम्परां प्रावर्तयत् । ततो ज्ञाननिधितीर्थाः तेभ्यः गरुडवाहनतीर्थाः ततः परं कैवल्यतीर्थाः सिद्धान्तं प्रवर्तयामासुः । एवं परम्पराक्रमेण ज्ञानेशतीर्थाः परतीर्थाः सत्यप्रज्ञतीर्थाः प्राज्ञतीर्थाश्च सनातनविज्ञानपरम्पराप्रवर्धकाः सन्तः जगतीतले विरेजुः । सर्वेऽमी दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः भूरिभक्तिभराः अणिमाद्यष्टसिद्धि - समेधितज्ञानविज्ञानविभवाः परम्परां प्रवर्तयामासुः[2] ।

ततः प्राग्जन्मनि कृष्णाकरसिद्धशुद्धान्नभोजनसमेधितशुद्धान्तःकरणाः विज्ञानवैराग्यभूमयः अच्युतप्रज्ञाः (अच्युतप्रेक्ष्यतीर्थाः) विज्ञानपीठमलङ्कृत्य सज्जनानुद्धृतवन्तः । ततोऽस्मिन्नेव पीठे मुख्यप्राणावतारभूताः मूलावताररूपेष्वस्पृष्टाज्ञानमिथ्याज्ञानादिदोषाः विलीनप्रकृतयः सन्ततभगवत्साक्षात्कारेणापूरितनित्यविज्ञानविभवाः श्रीमदानन्दतीर्थ भगवत्पादाचार्याः तत्त्वज्ञानपरम्पराप्रवर्तकविज्ञानपीठमलङ्कुर्वाणाः परश्शतनिबन्धप्रणयनेन उपदेशादिना सनातनवैष्णवसिद्धान्तसमुद्धरणेन च सज्जनाननुगृहीतवन्तः । हिरण्यगर्भपित्रा हंसेन, मुख्यप्राणेन

१. भागवतम् - ११.१३. १६-४२ ।

२. गुरुवंशकथाकल्पतरुः - अ. १ श्लो. ७-१५.

चाधिष्ठितपीठमेव 'सर्वज्ञपीठम्' इति तदीयपरम्परागप्रवर्तकस्यैव मठस्य 'उत्तरादिमठ' इति च नाम प्रथितम् विद्वज्जनानुमोदितं च।

ततस्तार्किकशिखामणयः सकलदुर्मतप्रभञ्जनाः प्रभञ्जनसंसेवनलब्धशुद्धविद्यासुधाम्भोनिधयः वेदप्रवचनाचार्यशिष्या इति असाधारण्येन व्यपदेशभाजः श्रीमत्पद्मनाभभट्टारकाः पीठमिदमलञ्चक्रुः। ततोऽविहायैव यतिधर्मं द्वादशवर्षपर्यन्तं कलिङ्गराज्यपरिपालनेन तत्त्वोपदेशादिना च तत्रत्यसज्जनानुग्रहपरायणाः श्रीमदानन्दतीर्थ भगवत्पादाचार्यकृपाविशेषादानीतश्रीमन्मूलरामार्चाविभवाः श्रीमन्नरहरितीर्थाः पीठमिदमलञ्चक्रुः। या चेयं सीतासमेता मूलरामार्चा भुक्तिमुक्तिकरी सदा परम्परायामस्यां श्रीमदानन्दतीर्थभगवत्पादाचार्यादारभ्य सर्वज्ञपीठेऽधुना विराजमानैः श्रीमत् सत्यात्मतीर्थश्रीमच्चरणैरपि समर्च्यमाना चतुर्विधपुमर्थप्रापिका राराज्यते।

ततोऽस्यां परम्परायां चतुर्वेदव्याख्यातार इति सुप्रसिद्धाः श्रीमन्माधवतीर्थाः, विद्यापक्षपातेन परश्शतनिबन्धप्रणयनेन च भुवि प्रथितकीर्तिभिर्निगमान्तमहादेशिकैर्वेदान्ताचार्यैः विशिष्टाद्वैतमतदिवाकरैः,

असिना तत्त्वमसिना परजीवप्रभेदिना।
विद्यारण्यमहारण्यम् अक्षोभ्यमुनिरच्छिनत्॥

इति निर्णयप्रदानेन समभिनन्दिताः[1] श्रीमदक्षोभ्यतीर्थाः पीठमिदमलञ्चक्रुः।

एतेषामन्तेवासिनः, भगवत्पादाचार्यकृतप्रबन्धाशयविशेषाविष्करणेन अश्रुतपूर्वप्रतिभया श्रुतिस्मृत्यविरोधिन्याऽनितरसाधारण्या शैल्या श्रीमन्न्यायसुधाप्रणयनेन 'टीकाचार्या' इति प्रथितकीर्तयः श्रीमज्जयतीर्थपूज्यचरणाः सर्वज्ञपीठमिदमलङ्कृत्य दिवाकर इव

---

१. अ. वेदान्तवैभवप्रकाशिका - पु. ७१
आ. आचार्यचम्पू - पु.५५ श्रीनिकेतनमुद्रणालयः, चेन्नपट्टणम्।
इ. गुरुपम्पराप्रभावम् - पु.१२४ सरस्वतीमुद्रणालयः, चेन्नपट्टणम्।

विज्ञानमरीचिमालिभी रेजुः ।

ततः परम्पराक्रमेण, उत्तरभारते वैष्णवसिद्धान्तप्रचारका
विद्याधिराजतीर्थाः, येषां भक्त्यामलया परितुष्टो रामस्सीतासहायः विभि
भुवं करनलिनैस्सुपूजितस्तादृशाऽनवद्यविद्यातपोभूमयः विद्यानिधय
इदमेव पीठमलञ्चक्रुः । ततः रघुनाथतीर्थाः - रघुवर्यतीर्थाः - रघूत्तमतीर्था
वेदव्यासतीर्थाः - सत्यव्रततीर्थाः - सत्यनिधितीर्थाः - सत्यनाथतीर्थाः
सत्याभिनवतीर्थाः - सत्यपूर्णतीर्थाः - सत्यविजयतीर्थाः - सत्यप्रियतीर्थाः
सत्यसन्धतीर्थाः - सत्यधर्मतीर्थाः - सत्यध्यानतीर्थपर्यन्ताः सर्वेऽमी
कर्मन्दिवृन्दाराधितकमनीयचरणाः विश्रुतौदार्याः परश्शतप्रबन्ध
प्रणयनदुर्वादविद्रावण - वैष्णवसिद्धान्तप्रतिष्ठापनादिना आसेतुहिमाचल
विश्रुतकीर्तयः व्यराजन्तेति विज्ञातमेव विदुषामिति नेह विस्तीर्यते ।

या चेयं, माध्ववेदान्तिष्विदानीन्तनेषु सर्वत्र प्रथिता प्रसार्यमाणा च
तत्त्वविद्या चकास्ति, सा सर्वाऽपि 'अभिनवानन्दतीर्थभगवत्पादाचार्या
इति प्रथितानां श्रीमत्सत्यध्यानतीर्थानामनुग्रहविशेषसमेधितैवेत्यत्र न
काऽपि संशीतिर्महताम् ।

प्रातः स्मरणीयानाममीषां सत्पथ एव पञ्चाशद्वर्षपर्यन्त
श्रीरामपूजनरताः परवादिनिग्रह - अपूर्वग्रन्थप्रणयनादिना विपश्चिदाराध्या
अद्वैतवेदान्तविद्वन्मूर्धन्यैः श्रीमदनन्तकृष्णशास्त्रिभिः तथान्यैर्विद्वत्प्रवरै
सङ्कीर्तितविद्याविभवाः अनेकवारमनुष्ठित योगिजनैकविधेयव्रतविधयः, प्रात
स्मरणीयाः श्रीमत्सत्यप्रमोदतीर्था अस्मिन्नेव सर्वज्ञपीठे व्यराजन्त ।

वेदान्तविद्यानिजराज्यपालने श्रीमत्सत्यात्मतीर्थश्रीमच्चरणायोजनमेव यश
शरीराणां तेषां कृपाविशेषं भक्तजनेषु विद्योतयति । अस्योपकारस्य
'भवाम ऋणिनो वयम्' इति तदनुग्रहविशेषस्मरणं करकञ्जै
तत्पदपङ्कजपूजनं चाश्रितानामधमर्णताद्योतकं नान्यदिति मन्यामहे ।

श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः

एतेषां महाभागानां पूर्वाश्रमनामधेयं सर्वज्ञाचार्य इति । सर्वमूल-श्रीमन्न्यायसुधाप्रवचनसमेधितविद्याविभवाः सदाचारविनयादिगुणविभूषिताः श्रीमज्जयतीर्थविद्यापीठस्य उपकुलपतिस्थानमलङ्कुर्वाणाः श्रीगुत्तलरङ्गाचार्याः एतेषां पितृपादाः । माता च सकलसुजनमान्या उभयकुलयशोगाथाप्रवर्धिका पतिव्रता नैकव्रतपरायणा सौ. वैजयन्तीनाम्नी ।

एतेषां विद्यागुरवः चत्वारिंश एव वयसि अशीति वर्षीयैर्विद्यावृद्धै - र्जेगीय्यमानकीर्तयः न्याय - वेदान्त - मीमांसा - व्याकरणादि शास्त्रेषु सम्पादितामलज्ञानाः नैकवारं श्रीमन्न्यायसुधापाठप्रवचनादिना विद्वन्मान्याः द्विशताधिकच्छात्राणाम् अन्नदान-विद्यादानादिना सत्सम्प्रदाय - परम्पराप्रवर्तनेन च विश्रुतौदार्याः श्रीमत्सत्यध्यानविद्यापीठस्य कुलपतयः महाव्याघ्रोपपदाः विद्यासिंहाचार्याः ।

सर्वज्ञाचार्याः गर्भाष्टम एवोपनीताः, श्रीविद्यासिंहाचार्याणां सविध एवाधिगतसकलशास्त्राः विद्वद्गोष्ठीषु नैकमठीयेषु, सर्वकारीयासु संस्थासु च वाक्यार्थाहवे स्वीकृतभागाः अल्पीयस्येव वयसि सर्वैरपि विद्वन्मूर्धन्यैस्सानन्दं **'चुलुकीकृताम्भोधिरिव विद्यार्णवोऽयं वटुः सर्वानतिशेत'** इति समभिनन्दिता इति नूनमिदं महदभिमानास्पदम् ।

श्रीमत्सत्यप्रमोदतीर्थस्वामिपादानुग्रहविशेषेण स्वीकृततुर्याश्रमाः 'सत्यात्मतीर्था' इत्यन्वर्थाभिधाः श्रीमच्चरणा अधुना सर्वज्ञपीठमलङ्कृत्य श्रीमन्न्यायसुधा - व्यासत्रय - भारत - भागवतादिसच्छास्त्रप्रवचनेन निजजनाननुगृह्णन्ति इति विदुषां विदितचरमेवैतत् ।

वाक्यार्थवारिधिविहारिणः

श्रीमत्सत्यात्मतीर्थश्रीमच्चरणानां वाक्यार्थपाटवमनुवर्णयितुं न वयं प्रभवामः । विश्वसंस्कृतसम्मेलनमहोत्सवे प्रबन्धमण्डनादिना सम्मानितेभ्यः नैकदेशीयाद्वैतवेदान्तविद्वन्मूर्धन्येभ्यः साकं 'तत्त्वमसि' श्रुत्यर्थविषये वाक्यार्थः प्रावर्तत । तदा स्वामिचरणैरद्वैतव्याख्यापरम्परानुवादपुरस्सरं तत्रापरिहार्या दोषा उट्टङ्किताः । तदा तन्निरासाय प्रयतमाना अपि विपश्चितः

न शेकुः । प्रौढिमानं च श्रीमच्चरणानामसाधारणीं प्रशंसन्तः श्रीचरणकटाक्षवीक्षणेनैव प्रमुदितस्वान्ताः धन्यंमन्या रेजुः।

काशीदिग्विजयः

१९९९ तमे वर्षे सरस्वतीसन्निधानविशेषपात्रीभूते वाराणसीक्षेत्रे श्रीमच्चरणा वाक्यार्थगोष्ठीमेकामायोज्य तत्रत्यान् अद्वैतन्यायशास्त्रदिग्दन्तिनः ईक्षत्यधिकरणादिशास्त्रवाक्यार्थे निरुत्तरान् निश्चोद्यांश्च चक्रिर इत्यतिरोहितं विदुषाम् । काशीस्थाश्च विद्वांसः, श्रीमच्चरणानां नैकशास्त्रपाण्डित्यं, धर्मतत्त्वज्ञाननिष्ठां च समीक्ष्य सप्रश्रयं सादरं तान् समभिनन्द्य कृतज्ञतापत्रशतपत्रसमर्पणेन स्वात्मानं कृतार्थांश्चक्रुः ।

श्रीमन्न्यायसुधाब्धिक्रीडनविशारदाः

१९९९ तमे वर्षे फेब्रवरीमासे मान्यखेटग्रामे श्रीमट्टीकाकृत्पादाचार्य-मूलवृन्दावनस्थले प्रवृत्ते श्रीमन्न्यायसुधामङ्गलमहोत्सवे पञ्चघण्टापर्यन्तं श्रीपादैर्न्यायसुधाशयविशेषाविष्करणार्थमद्वितीयोऽसाधारणश्चानुवादः कृतः । अस्खलितानवरतसौधव्याख्यानश्रवणसमुत्खातदुःखसङ्घातः अध्यात्मविद्याप्रवणो पण्डितवर्गः अमृतपायीव नितान्तममन्द-मानन्दमन्वभवदिति सुविदितमेतत् समेषां विदुषामिति सानन्दं सबहुमानमुल्लिख्यते । एवं शास्त्रपाठप्रवचनाश्रमधर्मपालन विद्वत्पोषणापूर्वग्रन्थप्रकाशनादिना विश्वमान्या श्रीमत्सत्यात्मतीर्थश्रीमच्चरणाः ग्रन्थद्वयप्रकाशनार्थं समग्रमूल्यप्रदानेनास्मान् अन्वगृह्णन् इति साष्टाङ्गप्रणतिततिसमर्पणपूर्वकं ग्रन्थाविमौ तेषां करनलिनयोरुपायनीक्रियेते।

विक्रमसंवत्सरस्य चैत्रकृष्णसप्तमी
२६ ०४-२०००

इति श्रीमच्चरणानुग्रहाकाङ्क्षी
विद्वज्जनविधेयः
आ. वै. नागसम्पिगे एम्. ए.
न्याय-वेदान्तविद्वान्
संशोधकः
प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः, मैसूरु-५

प्रस्तावना

भारतस्य वैशिष्ट्यम्

भारतभूमिरियं स्वकर्मभिः भुवनं पुनानानां विरक्तशिखामणीनां अध्यात्मामृतपानतृप्तानां सतां, वीराग्रगण्यानां, दयौदार्यमूर्तीनां, विविधकलाविचक्षणानां विदुषां च जन्मभूमिरित्यतिरोहितं विदुषाम्। अत्र हि सकलधर्मीया परदेशीया अपि स्वप्रतिभया स्वीयविचारततीराविष्कुर्वन्तः परान् बोधयन्तश्च राराजन्ते । विभिन्नेष्वपि दर्शनेषु, सम्प्रदायेषु जाग्रत्स्वपि विचारप्रेम चास्मिन् देशे दरीदृश्यते। अत एव हि क्रैस्ता महम्मदीयाः नास्तिकाः बौद्धाः वेदान्तिनोपि चान्ये मिलित्वात्र मतविभेदेऽपि मत्यविभेदेन परस्परोपकारेण भ्रातृभावेन च जीवन्तीत्येतन्महदभिमानास्पदम् आनन्दप्रदञ्च।

अध्यात्मविद्या विद्यानाम्

तत्र सङ्ख्या-विज्ञान-राजनीति-शृङ्गारादि-सकलकलाविद्यासु सतीष्वपि "अध्यात्मविद्या विद्यानाम्" इति भगवतः श्रीकृष्णस्योक्तिमनुरुध्याध्यात्मविदः ब्रह्मज्ञानेनैव परां मुदमनुभवन्तः परान् मोदयन्तश्च विराजन्ते । 'न हि सर्वाधिकारिकं किमपि शास्त्रं विद्यते' इति अभियुक्तवचनानुरोधेन स्वासक्तविद्याकलादिनैपुण्यं सम्पाद्य अन्येषामुपदेशादिना अनुग्राहकाश्च बहवो विद्वांसः अत्र समुल्लसन्ति । समयाः किलानादिकालतः प्रवाहरूपेण वृत्ताः समेषामात्यन्तिकशान्तिसाधनान्युपदेष्टुम् । तत्रापि शङ्कर-रामानुज--मध्वनामानस्त्रय आचार्यपुरुषा अस्मिन् देशे वेदान्तमवलम्ब्य स्वस्वसिद्धान्तं प्रतिपाद्य सज्जनाननुगृहीतवन्त इत्यतिरोहितमाबालगोपालानाम् ।

तत्रेदानीं पद-वाक्य-प्रमाणपारावारपारीणानां श्रीमदानन्द-तीर्थशुभसम्प्रदायप्रवर्तकानां श्रीमदुत्तरादिमठाधीशानां श्रीमद्विद्याधीश तीर्थस्वामिपादानाम् 'ओङ्कारवाद' नामकग्रन्थरत्नं तथा द्वैतद्युमण्यादि-प्रौढप्रबन्धनिर्मातॄणां श्रीहुलगी श्रीनाथाचार्याणां 'प्रणवदर्पण' विमर्शनात्मकं तारस्वरूपप्रकाशनामकं चापूर्वकृतिरत्नं विद्वत्करक-मलयोस्समर्पयितुमानन्दतुन्दिला वयम् । अपूर्वप्रमेयपरिप्लुताविमौ ग्रन्थौ विदुषाम् ओङ्कारस्वरूपविषये निष्कृष्टज्ञानं जनयत इत्यत्र न विशयलेशोऽपि । कृतिस्वरूपपरिचयात्पूर्वं कृतिकाराणां चरितं 'मनोविशुद्ध्यै चरितानुवादः' इति न्यायेन किञ्चदिव निरूप्यते ।

श्रीविद्याधीशतीर्थस्वामिपादाः

श्रीमद्विद्याधीशयतीनां पूर्वाश्रमनाम श्रीनृसिंहप्रसादजन्यत्वात् 'नृसिंहाचार्य' इति प्रथितम् । एतेषां तातपादाः आनन्द-तीर्थाचार्याभिधाः, न्याय-वेदान्तादिशास्त्रेष्वसाधारणपाटवं सम्पाद्य भुवि प्रथितकीर्तयो राराज्यन्त। 'यच्छिष्यशिष्यशिष्याद्याः टिप्पण्याचार्यसंज्ञिताः' इति विद्वत्प्रसिद्धिमनुरुध्य व्याख्यातृकर्मन्दिवृन्दनिर्मातारः नैकवारं श्रीमन्न्यायसुधा - पाठप्रवचनादिना दिगन्तविश्रान्तकीर्तयः तत्त्वप्रकाशिकाभावबोध-बृहदारण्यकभावबोध -न्यायविवरणटीकाप्रणयनादिना विद्वप्रपञ्चमनुगृहीतवन्तः, पदवाक्य-प्रमाणपारावारविहारिणो ज्ञान-वैराग्यसागराः श्रीरघूत्तमस्वामिपादा एवानन्दभट्टारकाणां विद्यागुरवः।

महावाक्यार्थविजयिनाम् आनन्दतीर्थाचार्याणां श्रीहरिगुरु-भक्तिं सद्विनयादिगुणगणं चावलोक्य, श्रीकृष्णसाक्षात्कार-संसाधितामलज्ञानाः कर्मन्दिवृन्दारकाराधितकमनीयचरणाः रमात्रि-

विक्रम-हयग्रीवाद्युपासका शताधिकदिव्यप्रबन्धनिर्मातारः श्रीमद्वादिराजपूज्यचरणाः, 'आनन्दभट्टारक' इति सकलशास्त्रवैदुष्यानुमोदकोपाधिप्रदानेन सम्मान्य सर्वज्ञपीठमलङ्कुर्वाणः "सद्‌गुणमण्डितः कुलपावनः पुत्रः भवतां जायताम्" इत्याशीर्भिरनुगृहीतवन्तः । अत्र महान्तः प्रमाणम् ।

ततः गुरुसन्ततिपरमानुग्रहेण नृसिंहोपासनया च जातस्य पुत्रस्यानन्दभट्टारकाः 'श्रीनृसिंहाचार्यः' इति नाम चक्रुः । अयं च बालकः पितृसविधे काव्य-कोश-व्याकरणादिकमधीत्य श्रीमद्वेदव्यासपूज्यचरणसन्निधौ कृतसमस्तशास्त्राध्ययनः हरिगुरुचरणोपासनलब्धसमस्तभाग्योदयः श्रीवेदव्यासतीर्थ श्रीमच्चरणानुग्रहेण प्राप्ततुर्याश्रमः श्रीविद्याधीशतीर्थनामा प्रतिवादिभयङ्करः साधु जनाभयङ्करश्च रेजे ।

गयागदाधरसाक्षात्कार - वाक्यार्थविजय - विष्णुपादार्चकानुग्रहादिमहिमविशेषाः विद्याधीशविजयादिग्रन्थेषु सम्यङ् निरूपिताः विस्तरभिया नेह तन्यन्ते ।

द्वैतवेदान्ते 'टीकाचार्या' इत्येव प्रथितानां श्रीमन्न्यायसुधाप्रणयनेन न केवलं द्वैतिनामपि तु सकलसमयगतसूक्ष्मातिसूक्ष्म प्रमेयनिरूपणेन समेषां समयिनामध्येतॄणां चोपकारकाणां श्रीमज्जयतीर्थवर्याणां श्रीमन्न्यायसुधाग्रन्थस्य वाक्यार्थचन्द्रिकानामकापूर्वप्रमेयपरिष्कारोपबृंहितव्याख्याप्रणेतॄणां श्रीमद्विद्याधीशयतिवराणां को वा तत्त्वजिज्ञासुर्नाधमर्णः ।

न केवलमियं व्याख्या सौधवाक्यार्थविवरणात्मिकाऽपि तु श्रीकर्णाटकविद्यासिंहासनाधीश्वर श्रीमद्व्यासतीर्थश्रीमच्चरणकृतग्रन्थोपर्यापादितदोषाभासनिरासिका मन्दारमञ्जरीचन्द्रिकादिग्रन्थाशयविशेषमाविष्कुर्वन्त्यपि राराजत इत्यतिरोहितं

विदुषाम् । प्रौढा विद्वद्वर्यैकहृद्या अनवद्या च शैली वाक्यार्थचन्द्रिकादिषु परिदृश्यमाना नोङ्कारवादे दृश्यतेऽथापि तैर्बाल्य एव प्रणीतः सङ्गृहीतो वेत्यभ्यूह्यते ।

द्वैतद्युमणिकर्तारः श्रीनाथाचार्याः (1800 AD)

अमी किल महानुभावाः न्याय-वेदान्त-व्याकरण-मीमांसादि-शास्त्राब्धिविक्रीडनविशारदाः' स्वीयपितृपादेष्वेवाधिगतसकलविद्याः भेदोज्जीवन - तत्त्वोद्योत - सुधाव्याख्यानप्रणयनेन विद्वत्समाजे विख्याताः । पितृचरणानामनुग्रहं सोत्कण्ठं स्मरन्ति स्वग्रन्थेषु । यथा -

"श्रीमद्व्याघ्रपुरीवासिवासुदेवार्यसूनुना ।
शिष्येण तेषां रचिता भेदोज्जीवनटिप्पणी ।।" इति

भेदोज्जीवनटिप्पण्यां, तथैव तत्त्वोद्योतटीकाव्याख्यादावन्ते च -

"श्रीमद्वेदान्तशास्त्रप्रवचनमहिमत्रस्तषट्शत्रुमुख्य
स्तातः श्रीवासुदेवाभिधगुरुतिलकः सर्वविघ्नान्निरस्य ।
ग्रन्थस्यैतस्य पारं कलयतु कमलानाथपादावलम्बी
यस्मात् माध्वागमार्थानमलमपि मनुं प्राप्तवानस्मि हृष्टात् ।।"

"अद्वैतवादप्रतिभासमार्जितैः यशोभिरामोदितसन्मनस्ततिः।
श्रीवासुदेवार्यगुरूत्तमः पिता विद्याप्रदातास्तु मयि प्रसन्नः।।"

इति, तारस्वरूपप्रकाशे च -

मद्गुरूंश्च पितृंश्चापि वासुदेवाभिधान् वयम् ।
नत्वोङ्कारस्याद्य सूत्रावयवत्वं विवृण्महे ।। इति च

पितृभक्तिमाविष्कृतवन्तः ।

एवमेव पद - वाक्य - प्रमाणशास्त्रपारङ्गतानां श्रीसत्यधर्माब्धिसम्भूतानां श्रीसत्यसङ्कल्पतीर्थानां चरणनलिनयोरसाधारणी भक्तिराविष्कृता । तत्त्वोद्योतटीकाव्याख्यारम्भे समाप्तौ च तत्कृतां स्तुतिं पश्यन्तु कोविदाः -

"रघुपतिपदपाथोजातगन्धाभिनन्दी
निखिलनिगमचर्चास्तद्विलासैकशौण्डः ।
जयति यमिकुलेशः सत्यसङ्कल्पनामा
गुरुरखिलबुधानां भक्तिवैराग्यरागः ।।"
यन्मन्त्राक्षतमाहात्म्यात् ग्रन्थोऽयं पूर्णतां गतः ।
तान् वन्दे सत्यसङ्कल्पान् अन्वर्थाभिधया युतान् ।।इति ।

श्रीनाथाचार्याणां कृतयः

हुलगी श्रीनाथाचार्याणाम् असाधारणप्रतिभाविष्करणं द्वैतद्युमण्यामामूलाग्रतया दरीदृश्यते (विदुषाम्) । द्वैतद्युमणिरयं श्रीमदानन्दतीर्थभगवत्पादाचार्यकृततत्वोद्योतनामकप्रकरणग्रन्थस्य जयतीर्थार्यनिर्मितटीकाव्याख्यानरूपोऽपि अद्वैतसिद्धि - गुरुचन्द्रिकालघुचन्द्रिकाद्यद्वैतप्रौढप्रबन्धखण्डनदीक्षः श्रीमन्न्यायामृतव्याख्यारूपोऽपि विराजते ।

यदीयतर्कताण्डव - न्यायामृत - तात्पर्यचन्द्रिकादि कृतिजातमुपजीव्य वेदान्तिनो वाक्यार्थाहवपटवः शास्त्रविचक्षणाश्चाभवन् तेऽमी श्रीमद्व्यासतीर्थश्रीमच्चरणाः न्यायामृतप्रणयनेन विचारप्रणालीप्रवर्तकाः समभवन् । अत एव विद्वच्चक्रचूडामणिभिरनन्तकृष्णशास्त्रिभिः -

"द्वैताद्वैतवादप्रस्थानप्रसङ्गेन तत्र तत्र न्यायमकरन्द-चित्सुखी-प्रमाणमाला-अद्वैतदीपिकादिग्रन्थेषु विशकलिततया उपलभ्यमानानां

खण्डनमण्डनादिप्रसङ्गेनोट्टङ्कितानां प्रक्रियाविशेषाणां एकत्र सङ्कलनेन, विनैव कलङ्कं तत्तन्मतप्रक्रियाविशेषाणां अतिगम्भीरया प्रणाल्या सरलसरलतयोपपादनेन श्रीव्यासतीर्था एव न्यायामृतकारा मूलाचार्या इति नेयमतिशयोक्तिरिति वयं विश्वसिमः ।

यत् न केवलं द्वैतिनः किन्त्वद्वैतिनोऽपि विमर्शनकुतूहला अधमर्णा एव न्यायामृतकाराणां श्रीव्यासरायमठादिपुरुषाणां सर्वतन्त्रस्वतन्त्राणां परःशतनिबन्धनिर्मातृणाम् । विश्वसिमः यत् व्यासतीर्थाः अनितरसाधारणमहिमशालिनस्तेजस्विनः सर्वविद्याधिष्ठानदेवताः शान्तप्रकृतयश्च यतिवर्या इदानीमपि स्वतेजसा जीवन्ति श्रीव्यासरायमठास्थाने, यत्र तत्पीठाधिष्ठानमात्रेण बालोऽपि बृहस्पतिसमानो मूकोऽपि वाग्मिप्रवरो भवति, इति वयमद्वैतमतावलम्बिनोऽपि तच्चरणकमलाश्रयणमात्मनो भूषणमेव मन्महे । श्रीव्यासरायमठाधिष्ठानाः श्रीविजयीन्द्रतीर्थादयोऽपि विश्वसिमस्तत्पीठमहिम्नैव परश्शतनिबन्धनिर्माणेन लोकोपकारं व्यदधुः"[1] इति ।

अद्वैतवेदान्तनिष्णातानां मेधाविमूर्धन्यानां महामहोपाध्यायानन्तकृष्णशास्त्रिणां वचांसि गुणैकपक्षपातिनां सर्वविद्वज्जनानामानन्दोद्रेकं जनयन्तीत्यत्र न विप्रतिपत्तिलेशः ।

न्यायामृतस्य विद्यमाना असङ्ख्या व्याख्याग्रन्था अस्य महत्तां प्रौढतां चावगमयन्ति । शताधिकप्रबन्धनिर्मातृभिः कर्मन्दिवृन्दारकवृन्दवन्दितपदैः श्रीविजयीन्द्रपूज्यचरणैर्निबद्धानि लघ्वामोद-मध्यमामोद-गुर्वामोदनामकानि त्रीणि व्याख्यानानि सुप्रसिद्धानि ।

पद-वाक्य-प्रमाणविक्रीडनविशारदानां सर्वतन्त्रस्वतन्त्राणां तात्पर्यचन्द्रिकाप्रकाशाद्यसाधारणप्रबन्धप्रणयिनां श्रीमद्राघवेन्द्रतीर्थ-

---

1 श्रीमन्मन्त्रालयक्षेत्रस्थ श्रीगुरुसार्वभौमविद्यापीठ प्रकाशित न्यायामृतामोदपीठिकात उध्दृतमिदं वाक्यजातम् ।

श्रीमच्चरणानां पूर्वाश्रमपुत्रैः श्रीलक्ष्मीनारायणाचार्यैः प्रणीतं मधुरी-संज्ञकमपरं व्याख्यानं विद्यते।

तथैव श्रीमन्न्यायसुधा - भागवतादिदिव्यग्रन्थव्याख्यातॄणां श्रीमद्यादवाचार्यपूज्यचरणाराधकानां, श्रीमद्राघवेन्द्रस्वामिपादैरेव 'तीर्थ' इत्यन्वर्थोपाधिप्रदानेनानुगृहीतानां वंशपल्ली श्रीनिवास-तीर्थाचार्याणां न्यायामृतप्रकाशनामकमन्वर्थं सर्वजनमनोरञ्जनं व्याख्यानं समुल्लसति ।

तथैव लक्ष्मीनाथयति - यादवेन्द्रतीर्थ - सुमतीन्द्रतीर्थपूज्य - पादैरन्यैश्च महद्भिः प्रणीतानि व्याख्यानानि समुपलभ्यन्ते ।

वाक्यार्थविमर्शप्रवाहः

न्यायामृतोक्ताद्वैतवाददोषोद्धरणाय सकलशास्त्रविचक्षणाः मेधाविमूर्धन्याः मधुसूदनसरस्वतीमहाभागा, 'अद्वैतसिद्धि' नामकं ग्रन्थं रचयामासुः ।

अद्वैतसिद्धिखण्डनाय न्यायामृतस्याबाध्यतोपपादनाय च श्रीरघूत्तमस्वामिपादच्छात्रैः श्रीरामाचार्यैः 'न्यायामृततरङ्गिणी, एवम् आनन्दभट्टारकैः 'न्यायामृतकण्टकोद्धारश्च निरमायिषाताम् ।

ततस्तरङ्गिणीखण्डनार्थं गौडब्रह्मानन्दः, गुरुचन्द्रिका लघुचन्द्रिका-ख्यौ द्वौ प्रबन्धौ निर्ममे । अत्र चाद्वैतसूक्ष्मप्रक्रिया निपुणतरं प्रौढ्या शैल्या निरूपिता । ततः तरङ्गिणीसौरभ- न्यायामृतसौगन्ध्यप्रणयनेन च महान्तः श्रीवनमालिमिश्राः गुरुचन्द्रिका-लघुचन्द्रिकोक्तदोषा-भासनिराकरणेन न्यायामृताद्युक्तवाक्यार्थस्य परिपूर्णतामखण्ड्यतां च प्रत्यपादयन् । एवमेव मन्नारीकृष्णाचार्यविरचितं न्यायामृत-माधुर्यनामकं चापरं व्याख्यानं गौडब्रह्मानन्दीयखण्डनपरं राराजते ।

ततः परं सकलाद्वैतप्रबन्धनिरसनदीक्षः, ब्रह्मानन्दप्रणीताद्वैत-चन्द्रिकानिरसनदक्षश्च श्रीश्रीनाथसूरिप्रणीतः द्वैतद्युमणिरजायत। यस्याधुनाऽपि खण्डनार्थं नैकोऽपि प्रबन्धो निबद्ध इति सोऽयं ग्रन्थः अखण्ड्योऽपूर्वश्च विद्वत्प्रपञ्चे विराजते ।

येन च द्वैतप्रकाशः नितान्तं व्याप्तः, निराकृतश्च निखिलाज्ञानवादः सौऽयमनर्घ्यग्रन्थरत्नप्रणेतैव श्रीनाथाचार्यः 'तारस्वरूपप्रकाशं' निर्ममे। ग्रन्थश्चायमोङ्कारस्य शारीरकसूत्रावयवत्वनिरसनार्थं प्रवृत्तस्य तत्त्वमार्ताण्डादिप्रौढप्रबन्धनिर्मातुः विद्वच्चक्रचूडामणेः श्रीश्रीनिवासा-चार्यस्य ' प्रणवदर्पण' प्रबन्धस्य खण्डनात्मकः प्रौढः परमगम्भीरश्च विद्योतते ।

इतः परम् ओङ्कारवाद - तारस्वरूपप्रकाशादि ग्रन्थावलम्ब-नेनोङ्कारस्य ब्रह्ममीमांसासूत्रावयवत्वं प्रसाधयतां महात्मनामाशयलेशः यथामत्युपवर्ण्यते ।

श्रुत्यर्थनिर्णायकं ब्रह्ममीमांसाशास्त्रं सज्जनानुजिघृक्षया भगवान् बादरायणो व्यतनोत् । शरीरे विद्यमानानां जीवपरमात्मनां स्वरूप-परिचायकत्वात् ब्रह्ममीमांसासूत्राणां शारीरकमीमांसेत्यप्यस्ति प्रथितं नाम । तत्र आद्यसूत्रपाठविषये द्वैतिनां पन्थाः विशिष्टः विलक्षणश्च। आनन्दतीर्थीयसम्प्रदाये तु 'ओम् अथातो ब्रह्मजिज्ञासा',इति सूत्र-पाठः । शङ्कररामानुजाद्यशेषसूत्रव्याख्यातॄणां मते ओङ्काररहितः 'अथातो ब्रह्मजिज्ञासा' इत्येव सूत्रपाठः । एवं प्रतिसूत्रमप्यादावन्ते च ओङ्काराध्याहारः "स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यत" इत्यादि निन्दार्थवादप्राप्तः स्वीकृतः माध्वसम्प्रदायिभिः। अतोऽत्र पाठसम्प्र-दायविभेदाद् विप्रतिपत्तिः स्वाभाविकी । किमोङ्कारः आद्यसूत्रा-वयवः, एवं प्रतिसूत्रमादावन्ते चोङ्काराध्याहारः किमावश्यक उत

नेति ।

'मानाधीना मेयसिद्धि' रित्यादि न्यायानुसारेण उक्तार्थे प्रमाणानि निरूप्यन्ते -

(i) 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते' (भ.ता.उ. (श्रुतिः) (ii) 'तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' (भ. गी. १७-२४) (iii) 'अनोङ्कृतं ह्यासुरं स्याद् यत् तस्मादोङ्कृतं त्वपि । ओङ्कारार्थहरेः सम्यक् अज्ञानादासुरं भवेत्' (भ. ता. उ. श्रु.१७.७) (iv) 'सर्वस्य प्रणवो ह्यादिः मध्यमन्तस्तथैव च (माण्डूक्य. ४. ५)।' (v) 'सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् । तद्धेतुत्वं वदंश्चाऽपि तृतीयोऽत उदाहृतः (ब्र. सू. भा. १.१.१) ।" इत्यादि- श्रुतिस्मृतयः सकलसत्कर्मानुष्ठानारम्भे ओङ्कारोच्चारणतत्प्रति-पाद्यभगवत्स्वरूपानुसन्धानं प्रतिपादयन्त्यः वेदार्थनिर्णायकसूत्रादावन्ते च तदध्याहारं प्रतिपादयन्ति ।

उक्तप्रमाणानां, सावकाशोऽर्थः यथा न स्यात्तथोपरि वाक्यार्थः निरूप्यते। ततः प्राक् 'स्रवत्यनोङ्कृतं ब्रह्म' इति निन्दार्थवादबलेन मन्त्रस्य स्रवणविशरणाभावकाम आद्यन्तयोः ओङ्कुर्यात्' इति कल्पित-विधिवाक्यमेव मानं भवतीत्यपि वक्तुं शक्यते । कल्पितविधि वाक्यस्यार्थसाधकत्वं लिङ्गादीनामङ्गत्वे प्रामाण्यवादिनां मीमांसकानाम्, मङ्गलस्य समाप्तिकारणत्वे 'समाप्तिकामो मङ्गलमाचरेत' इति शिष्टा-चारानुमितश्रुतेः प्रामाण्यवादिनां नैय्यायिकानां च सम्मतमेव। तस्मात् निन्दार्थवादबलात् प्रतिसूत्रमाद्यन्तयोरोङ्कारोऽध्याहार्यः। ओङ्कारस्य सूत्रावयवत्वमनुव्याख्याने प्रतिपादितम्

'तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते ।
सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः ।(ब्र. सू. अ. १.१.१)
इति ।

व्याख्यातं च सुधायाम् -(ब्र. सू. अ. सुधा. १.१.१)

"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" इति श्रुतिबलात् प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योहः कार्यः । न चोह्यमानं पृथगिति शक्यते वक्तुम् । मन्त्रेष्वप्यूह्यमानस्य तदनवयवत्वप्रसङ्गात्। ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहिततया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थः" इति ।

ननु कथमध्याहृतस्य तदवयवत्वमुच्यते? 'सूर्याय' इत्यूहं प्रति 'अग्नये' इत्यादेरिव प्रकृते स्थानिनोऽभावात् । 'प्राकृतस्थानपतितपदार्थान्तरकार्यतः। ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः' इति प्रकृतियागीय व्रीह्यग्निलक्षणद्रव्यदेवतारूपस्थाने विकृतियागसम्बन्धि नीवारसूर्यलक्षणद्रव्यदेवतारूपं तस्य यत्कार्यं प्राकृतकार्यतुल्यं होमादि, तदर्थं 'सूर्याय' इत्यादिरूपः विकृतः प्रयोगः ऊहविषयत्वादूह इत्युच्यते । एवं च प्रकृते स्थानिनोऽभावादूहोऽसम्भवि।

किञ्च ऊहप्रवरनामधेयानाममन्त्रत्वस्य द्वितीये सिद्धान्तितत्वात् मन्त्रेष्वपि ऊह्यमानस्य तदनवयवत्वमिष्टमेव ।

अत्रोच्यते । नात्र ऊहशब्दो 'मन्त्रसामसंस्कारोहः' इत्यादाविव कर्मव्युत्पत्या विकारपरः, किन्तु 'अध्याहारस्तर्क ऊहः' इति प्रसिद्धेर्भावव्युत्पत्त्या अध्याहारवाचकः 'ऊहो नाम तर्कणा'। सा चैकरूपा मन्त्रसामसंस्कारेषु क्रियमाणा' इत्यादि टुप्टीकोक्तदिशा तर्क एव

मुख्य ऊहः । तद्विषयत्वात् मन्त्रादेरन्यथात्वमप्यूह इत्युक्तम्। तत्र च 'स्रवत्यनोङ्कृतं ब्रह्म' इति श्रुतिरेव मानम् । अध्याह्रियमाणस्यापादितममन्त्रत्वं च मन्त्रेण सहैककार्यकारित्वाभाव इति नेष्टापत्तिः । वाक्यार्थप्रतीतिरूपैककार्यकारित्वाभावस्य अदृष्टरूपैककार्यकारित्वाभावस्य वा वक्तुमशक्यत्वात् । अन्यथा 'संयज्ञपतिराशिषा' इत्यादावध्याहृतस्य 'गच्छताम्' इत्यस्य 'इषे त्वा' इत्यादौ 'छिनत्ति' इत्यध्याहृतस्य वाक्यार्थान्वयप्रतियोगिसमर्पकत्वरूपावयवत्वाभावप्रसङ्गात्' । किञ्च एवमेव 'व्यवायान्नानुषज्यत' इति जैमिनिसूत्रकृतः 'व्यतिहारो विशिंषन्ति' इति ब्रह्मसूत्रकृतश्च तत्र तत्राध्याहारोक्तिरयुक्ता स्यात् । अतस्तदन्यथानुपपत्त्या अध्याह्रियमाणस्यावयवत्वाङ्गीकार आवश्यक एव ।

अत्रेदं रहस्यमवधेयम् । ओङ्कारस्य प्रथमसूत्रावयवत्वं नाम तदुपयुक्तार्थप्रतिपादकत्वम् । ब्रह्मजिज्ञासा कर्तव्येत्यत्र निर्विषयत्वशङ्कापरिहाराय ब्रह्मपदेन वेदप्रतिपाद्यत्वरूपं विषयत्वमीश्वरस्योक्तम् । तत्कथमित्याकाङ्क्षायां वेदस्य परममुख्यवृत्त्यादिना ईश्वरप्रतिपादकतया तद्विषयकत्वसमर्थनार्थमोङ्कारः सूत्रकृता ब्रह्मणि प्रयुक्तः। तत्प्रकारश्च "स एव ब्रह्मशब्दार्थो नारायणपदोदितः । स एव भर्गशब्दार्थो व्याहृतीनां च भूमतः । भावनाच्चैव सुत्वाच्च सोऽयं पुरुष इत्यपि । स एव सर्ववेदार्थः जिज्ञास्योऽयं विधीयते।" इति व्याख्यानव्याख्येयभावप्रतिपादनादिनाऽनुव्याख्याने निरूपितः ।

द्वितीयादिसूत्रेषु ओङ्कारस्य तदवयवत्वं नाम तेन सहैककार्यकारित्वम्। स्रवणविशरणाभावसम्पादकतया सूत्रेण सह पुण्यरूपैककार्यकारित्वात् । आद्यन्तयोरोङ्कारोच्चारणपूर्वकं सूत्रोच्चारणे पुण्यं सम्पद्यत इति भावः । एतादृशादृष्टार्थत्वं प्रथमसूत्रेप्यक्षतमेव। एवं

च प्रथमसूत्रे चन्द्रिकोक्तदिशा ओङ्कारस्य स्विष्टकृदादिवत् दृष्टादृष्टोभयार्थत्वम् । द्वितीयादिसूत्रे तु केवलादृष्टार्थत्वमिति विज्ञेयम्। सर्वमेतद् विवृतं श्रीसुधाचन्द्रिकादिग्रन्थेषु ।

अत्रैके चोदयन्ति -

"इह केचित् ओङ्कारस्य सूत्रावयवतां कल्पयन्ति तन्न ।"

"अप्रमाणतया यस्य यत्रोच्चारणमेव न ।
तस्यावयवता तत्र शशशृङ्गार्जवोपमा ।।"

ब्रह्मसूत्रयोराद्यन्तोङ्कारोच्चारणे यदि किञ्चित्प्रमाणमुपलभेमहि तदा तस्यावयवत्वं कथञ्चित् कल्पयेमहि । यदा तदुच्चारणमेवाप्रामाणिकम् तदा तस्यावयवत्वकल्पनं शशश्रृङ्गार्जनवदपहासास्पदमेव। तथाहि -

'प्रत्यक्षम् अनुमानं वा नाऽदृष्टार्थे प्रवर्तते ।
श्रुतिस्त्वनन्यथासिद्धा न दृश्यत ...... ।।' (प्रणवदर्पणे)
'प्रणवोच्चारणस्योक्ता वेदाद्यन्तस्तथा श्रुतौ ।
उपक्रमोपसंहारमात्रे चैतद् व्यवस्थितम् ।
प्रतिवाक्यं प्रतिपदं न तद् दृष्टम् न सम्मतम् ।
प्रतिसूत्रं तदिष्टं चेत् प्रमाणमपि दुर्लभम् ।'

(तत्वमार्ताण्डे १.१.१. P५)

इत्यादि ।

अत्रेदमभिधीयते - ओङ्कारस्य सूत्रावयवत्वे सूत्रघटकत्वे च श्रीमद्ब्रह्मसूत्रभाष्य एव भगवत्पादैर्गारुडवचनमुदाहृतम् । तथोक्तवक्ष्यमाणप्रमाणानुसारेणोङ्कारस्य सूत्रावयवत्वमङ्गीकरणीयमेव । तथा हि -

"सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ ।
ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ।।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।
... अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः ।
अथातः शब्दयोरेवं वीर्यमाज्ञाय तत्वतः ।
सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुञ्जते ।" (ब्र. सू. भा. १.१.१)
इति

एवमेव माण्डूक्यश्रुतिरत्र मानं भवति -

"सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।।" इति
(माण्डूक्य ४.५.)

एवं च सूत्राद्यन्तयोः ओङ्कारोच्चारणानुसन्धानादेः प्रतिपादितत्वादोङ्कारस्य सूत्रावयवत्वमभ्युपेयम् ।

न चेदं मुण्डकवाक्यं परमात्मनः जगदुत्पत्यादिकारणत्वपरं कथमुक्तार्थपरं स्यादिति वाच्यम् । पूर्वग्रन्थस्य प्रणवघटकाकारादिवर्णप्रतिपाद्यरूपमाहात्म्यपरस्य तादृशाक्षरमाहात्म्यप्रतिपादनेऽपि तात्पर्यमस्तीत्यवगम्यते । 'ओमित्येतदक्षरमिदं सर्वम्' इत्युपक्रमात् प्रणवमाहात्म्यकथनपरतया तात्पर्योपवर्णनमपि नासङ्गम् ।

एवं 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते' इति श्रुतिरपि प्रत्येकमनेकवेदवाक्यविचारपराणां सूत्राणामाद्यन्तयोरोङ्कारोच्चारं प्रतिपादयति।

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः'(भ. गी. १७.२३.) 'गिरामस्म्ये-कमक्षरम्'(भ. गी. १०. २५.) 'प्रणवः सर्ववेदेषु' (भ.

गी. ७. ८.)इत्यादौ भगवता प्रणवस्य ब्रह्मवाचकत्वं माङ्गलिक
चोपपादितम्। **'ओमित्येकाक्षरं ब्रह्म व्याहरन्'** (भ. गी. ८. १३
**"तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्त
सततं ब्रह्मवादिनाम्"** (भ. गी. १७. २४.) इत्यादौ च यज्ञादिसत्कर्म
ओङ्कारोच्चारणतदर्थभगवदनुसन्धानपुरस्सरं कर्तव्यत्वमुक्तम् । यज्ञशब्दे
चात्र **'श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परंतप'** (भ. गी. ४.३३
इति गीतोक्तदिशा सर्वयज्ञप्रधानभूतः ज्ञानयज्ञ एवाभिहितः। स
ब्रह्ममीमांसाध्ययनादिरूप एव । अत एव 'स्वाध्यायज्ञानयज्ञाश्
इत्यत्र स्वाध्याययज्ञस्य वेदाध्ययनरूपस्य, ज्ञानयज्ञात् पृथक् गृहणम
सङ्गच्छते । उक्तोऽयमर्थः अद्वैतनिष्णातैर्व्याख्यातृभि
भाष्योत्कर्षदीपिकायाम् -'विधिवद् वेदाभ्यासो यज्ञो येषां
स्वाध्याययज्ञाः। ज्ञानं पूर्वोत्तरमीमांसाविचारेण शास्त्रार्थपरिज्ञानं यज्
येषां ते ज्ञान- यज्ञाः' इति । एवमेव सदानन्दमधुसूदनसरस्वत्यादयोऽ
व्याचक्षते।

एवं च गीतोपदेशकादनन्येन व्यासेन गीतायां ज्ञानयज्ञस
ओङ्कारोच्चारणपूर्वकत्वं समर्थ्य सूत्रप्रणयनकाले तदननुष्ठाने हेत्व
भावात्। सर्वशिष्टशिक्षार्थं प्रवृत्तेन भगवता ओङ्कारोच्चार
कृतमित्यङ्गीकरणं समुचितम्।

'यो वेदादौ स्वरः प्रोक्तः वेदान्ते च प्रतिष्ठितः' इति श्रुतिरपी
ममेवार्थमभिदधाति । 'एष उ स्वरः' इति छान्दोग्योपनिषदनुसारेणा
स्वरशब्द ओङ्कारपर एव । तथा च 'यः स्वरः' य ओङ्कारः, वेदा
प्रोक्तः 'वेदान्ते' ब्रह्मसूत्रे च प्रतिष्ठित इत्यर्थः । ओङ्कारस्य सूत्रा
वयवत्वं च 'प्रतिष्ठित' इति प्रत्युपसर्गपूर्वकष्ठाधातुना विशदीकृतः

न चैवमोङ्कारस्य सूत्रघटकत्वे तदवयवत्वे च ओमथातो ब्रह्म
जिज्ञासा इति संहिततया सूत्रपाठेन भाव्यमित्यसंहिततया निर्देश
कुत इति वाच्यम् । 'स्वरितेनाधिकारः' इति नियमानुसारेण यथ

व्याकरणशास्त्रे केषाञ्चित्पदानामुत्तरसूत्रेष्वनुवृत्तिज्ञापनाय स्वरितयुक्ततया निर्देशः क्रियते तद्वदिहापि प्रथमसूत्रावयव एवायमोङ्कार इति न ज्ञेयमपितूत्तरसूत्रेष्वप्यदृष्टसम्पादकतयोच्चारणीय इति प्रज्ञापयितुम् असंहिततया निर्दिष्ट इत्यवधेयम् ।

स्यादेतत् । यदि 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यत्र ब्रह्मपदं सूत्रपरं स्यात् । न चैवम् । तस्य 'ब्रह्म तत्वं तपो वेद' इत्यादिकोशानुसारेण वेदपरत्वादिति चेत्, उच्यते । तत्रैव कोशे ब्रह्मशब्दस्य तपस्यपि शक्तेरुक्तत्वेन 'स्रवतीत्यादिकं तपः परं किं न स्यात् । न च 'ब्रह्मणः प्रणवं कुर्यात् आदावन्ते च, इत्येतत् शिक्षावाक्यं वेदप्रकरण एव पठितमिति प्रकरणवशात् वेद एव ग्राह्य इति वाच्यम् । मनुस्मृतौ ब्राह्मणसम्बन्ध्याचारकथनप्रस्ताव एवैतद्वचनस्य सत्त्वेन तपसोऽपि ग्रहणस्य युक्तत्वात् । एवं च **"तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्"** (भ. गी. १७. २४.) इति गीतायां यज्ञादीनामपि ओङ्कारोच्चारण -पूर्वकत्वाभिधानेन तथैव शाङ्करभाष्येऽस्य गीतावाक्यस्य व्याख्यानाच्च ब्रह्मविद्यायाः ज्ञान-यज्ञरूपत्वेन 'स्वाध्यायप्रवचन एवेति नाको मौद्गल्यः। तद्धि तपः तद्धि तपः ।' इति तैत्तिरीयश्रुतौ श्रुतिव्याख्यानभूतस्य तपस्त्वोक्तेः, ब्रह्मसूत्राणां श्रुतिव्याख्यानरूपत्वेन तपस्त्वाच्च, विध्यर्थवादयोरेकवाक्यत्वानुरोधेन स्रवतीत्यर्थवादघटकब्रह्मशब्दस्य ब्रह्मविद्या- परत्वावश्यम्भावात् आद्यन्तयोरोङ्काराध्याहारसिद्धिः ।

न च निखिलसूत्राणां वेदार्थनिर्णायकत्वेनैकविद्यात्वात् शास्त्रस्यादावन्ते चोङ्कारोहः स्यात् । न तु प्रतिसूत्रमिति वाच्यम्। प्रत्येकमपि ब्रह्मसूत्राणां तत्तद्वेदार्थनिर्णायकत्वेन ब्रह्मविद्यात्वात् पृथगुच्चारणीय एवोङ्कार आद्यन्तयोरिति ।

ब्रह्मसूत्राणामेव परविद्यात्वम्

प्रसङ्गसङ्गत्या तारस्वरूपप्रकाशे वेदापेक्षया ब्रह्मसूत्राणां मुख्यपरविद्यात्वमुपपादितम् । तथाहि - तत्र आथर्वणोपनिषदि श्रूयते - **"द्वे वा व विद्ये वेदितव्ये परा चैवापरा च । तत्रापरा-ऋग्वेदो यजुर्वेदः सामवेदः अथर्ववेदः शीक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषमिति । अथ परा-यया तदक्षरमधिगम्यते"** (आथ. १. ४&५) इति । अत्र साङ्गान् वेदानपरविद्यात्वेनोक्त्वा अक्षराधिगतिकरणस्य परविद्या- त्वमुक्तम् । **"वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदाः"**(त. उ. पै.) इति वेदानामक्षरा-धिगतिकरणत्वस्याबाधितत्वेऽपि तेषामपरविद्यासु परिगणनं विवक्षाविशेषमनुरुध्येति भाति । स आशयविशेषः श्रीमध्वगुरुचरणैः प्रमाणोदाहरणपुरस्सरं निरूपितः । -

'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः ।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः ।।' इति

(आ. भा. १.)

अयमाशयः - वेदार्थनिर्णायकन्यायग्रथनात्मकब्रह्ममीमांसा - शास्त्रानुपकृताः' हि वेदादयः न परस्वरूपपरिचायकाः, अपि तु तदुपकृता एवेति वेदेन ईश्वरज्ञाने जननीये इतिकर्तव्यताभूतं मीमांसा-शास्त्रं, बीजनिष्ठाङ्कुरजननशक्त्युद्बोधकजलमिव अक्षराधिगतिकरणं भवति । यागीयहिंसाया इतिकर्तव्यताभूतायाः प्राबल्यमिव भगवद-परोक्षज्ञानसाधनेषु श्रवणादिषु गुरुप्रसादस्येतिकर्तव्यताभूतस्य प्राबल्यमिव च मीमांसाशास्त्रस्यापीतिकर्तव्यताभूतस्य प्राबल्यमव्याहतम् । श्रुति - युक्ति - आप्तिमूलकत्वाच्चास्य निरवधिकं प्रामाण्यम् ।

एतेन उपनिषदः परविद्येति व्याख्यातारो निरस्ताः । ऋगादि-ग्रहणेन तासामपि गृहीतत्वात् । उपनिषज्जन्यं ज्ञानं परविद्येत्यप्यचारु। अक्षराधिगतिकरणत्वाभावात् ।

अपौरुषेयत्वेन सकलप्रमाणोपजीव्यानां वेदानामपरत्वं तदधीनप्रामाण्यकस्य ब्रह्ममीमांसाशास्त्रस्य तु कथं परत्वमिति शङ्का निपुणतरं निराकृतात्र -

"परापरत्वयोर्धर्मिविशेषाधीनत्वेनापरिनिष्ठितत्वात् प्रामाण्य-स्थापकनिर्दोषतायाः स्वतःसिद्धत्वेन तेषामधिकं प्रामाण्यम्, सूत्राणामाप्तिमूलत्वेन निर्दोषत्वमिति तदमुख्यतया प्रामाण्यस्या-मुख्यत्वमिति स्थितावपि, विद्यापदार्थतावच्छेदककोटिप्रविष्टस्य सूत्रसाध्यस्य यथार्थज्ञानस्य निश्चितप्रामाण्यकत्वेन प्रवृत्तिद्वारा पुरुषार्थोपयोगितयाऽधिकेन विद्यात्वेनास्य परत्वात् परविद्या-शब्दमुख्यार्थत्वं, सूत्राननुगृहीतवेदसाध्यज्ञानस्यानिर्धारणात्मकस्य प्रवृत्त्यादिद्वारा पुरुषार्थानुपयोगितया तज्जनकानां केवलवेदानाम-परविद्यात्वं चोपपन्नमेव ।

यथा पित्रपेक्षया पुत्रस्य स्वभावतोऽवरत्वेन पितुः पुरः पूज्यत्वा-भावेऽपि तपोज्ञानादिभिराधिक्ये तद्गुणप्रयुक्तश्रैष्ठ्येन पितुरपेक्षया श्रेष्ठत्वादि तद्वत्" इति ।

अत एव 'संहितापाठतः प्रोक्तं द्विगुणं पदपाठतः । ' इत्यारभ्य संहितापाठात् पदपाठस्य, ततः क्रमपाठस्य द्विगुणितफलहेतुत्वमुक्त्वा 'प्रत्यक्षरं तु लभते गायत्रीशतजं फलम्' इत्तनेनात्यन्तं ब्रह्मज्ञानहेतु-भूतब्रह्मसूत्राणामतिशयितफलत्वोक्तिरपि वराहपुराणोक्ता सुष्ठूप-पद्यते।

एवमेव ब्रह्मसूत्राणामुत्तमत्वे पुराणान्तरवचनान्यप्यनुसन्धेयानि। यथा -

'व्यासोक्तब्रह्मसूत्राणां सकृदावर्तनात् नृप ।
गायत्र्याः सर्ववेदानां सहस्रावृत्तिपुण्यभाक् ।
अर्थतात्पर्यवचनं सूत्रपाठं पठन् द्विजः ।
दशसाहस्रगायत्रीजपपुण्यफलं लभेत् ।
स भवेत् सिद्धसङ्कल्पः परत्राप्यत्र किं पुनः ।

एवं च 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यादौ ब्रह्मशब्दस्य उक्तविधया ब्रह्ममीमांसाशास्त्रपरत्वेनाप्युपपत्त्या, समेषां सूत्राणां वेदार्थनिर्णायकत्वेन अवान्तरब्रह्मविद्यात्वेनाद्यन्तयोरोङ्कारोच्चारणं कार्यम् इति सिद्धम्।

स्यादेतत् । यदीदं प्रमेयं भाष्याद्यविरुद्धं स्यात् । न चैवम् । ओङ्कारस्य सूत्रघटकत्वे भाष्य-तत्त्वप्रकाशिका-न्यायविवरण-सन्न्यायरत्नावलीविरोधः । तथाहि - तत्र श्रीमद्भाष्ये, 'अथशब्दो मङ्गलार्थोऽधिकारानन्तर्यार्थश्च' इति, तत्त्वप्रकाशिकायां 'एवं प्राप्ते सिद्धान्तयत् सूत्रमुपन्यस्यति अथेति । ' इति, सन्न्यायरत्नावल्यां (१.१.१) तु 'तत्र ओङ्कारश्चाथशब्दश्च मङ्गलार्थत्वादादितः प्रयोक्तव्यौ। ओङ्कारस्तु 'स्रवत्यनोङ्कृतं ब्रह्म' इति वचनात् प्रत्यधिकरणमनुवर्तमानत्वात् पृथगुच्चरितो वेदितव्यः । नाथशब्दवत् सूत्रोपनिबद्धः' इति च भाष्या- दिषु ओङ्काराव्याख्यानं, सूत्रात् पृथगेवोङ्कार उच्चारितः नाथशब्दवत् सूत्रोपनिबद्ध इति सन्न्यायरत्नावलीवचनं चोक्तार्थे गमकम् ।

अत्रोच्यते -

आद्यसूत्रपाठविषये सम्प्रदायद्वैविध्यमनुसन्धेयम् । आद्यः तारस्वरूपप्रकाशे विस्तीर्णतयोपन्यस्तः । अपरस्तु चन्द्रिकादा-वुपदिष्टः। द्वितीयपक्ष एव सर्वसम्मतोऽथापि प्रथमोऽविरुद्धः । तत्र तावत् तारस्वरूपप्रकाशाभिमतः पक्षः विव्रियते । -

अस्मिन् पक्षे 'अथातो ब्रह्मजिज्ञासा' इत्येव सूत्रपाठः । ओङ्कारस्तु

"ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।" अतश्च पूर्वमुच्चार्याः सर्व एते सतां मता,' इति प्रमाणानुरोधेन 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यादिश्रुत्यनुसारेण चाध्याहृतः सूत्रकृता सूत्रप्रणयनात् प्रागेवोच्चारितः । एवञ्चायमोङ्कारः आद्यसूत्रं करिष्यामिति चिकीर्षाधीनाद्यसूत्रघटकपदानुकूलकृत्यविषय एवेति आद्यसूत्राघटकः। तथापि सूत्रावयव एव । एवमेव शिष्टैर्जैमिन्यादिप्रणीतसूत्रेष्वप्यवधेयम् । अथापि तद्भाष्यकारादिभिरोङ्काराव्याख्यानं परिमळोक्तदिशा अज्ञानाद् वा तत्सूत्रार्थेऽनुपयोगाद्वेति ज्ञेयम् ।

न चैवं सूत्राद् बहिरेवोङ्कारोच्चारणे सूत्राघटकोङ्कारापेक्षया सूत्रघटकातःशब्दस्य कथं तृतीयत्वमिति वाच्यम् । सूत्रवचनवेलायामोङ्कारमारभ्य अथशब्दातिरिक्तशब्दान्तरोच्चारणव्यवधानाभावेन तृतीयतयोच्चारणविषयत्वरूपतृतीयत्वस्याबाधितत्वात् ।

स्यादेतत् । यदि सूत्रप्रणयनात्प्राक् सूत्रकृता आदौ ओङ्कार उच्चारित इत्यत्र किञ्चिन्मानं निरवकाशमुपलभेमहि न चैवम् । 'ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्' इति प्रमाणं तु यथा वेदे ओङ्कारस्य प्रथमत उच्चारणं तथैव सूत्रे अथशब्दस्य प्राथमिकत्वमित्यर्थकम् । 'तृतीयोऽत उदाहृतः' इत्यस्यापि न साधकत्वम् । विष्णुना सृष्टिकाले तृतीयतयोदाहृतत्वस्य तत्प्रमाणादवगमेऽपि सूत्रे तृतीयतयोदाहृतत्वार्थे उदाहृतमानस्यौदासीन्यात्। 'अतश्च पूर्वमुच्चार्याः' इत्यस्यापि वेदपाठकाले आदौ ओङ्कार उच्चार्यः। सूत्रप्रणयने तु आदावथातःशब्दौ प्रयोक्तव्यौ इत्येवार्थः । ततश्चोङ्कारस्य सूत्रप्रणयनात् प्रागुच्चार्यत्वे निरवकाशप्रमाणमेव नास्तीति ।

अत्रोच्यते - 'सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिस्सृतौ । ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।' इति पूर्ववाक्ये द्वयोरुत्पत्तिः स्मर्यते । एकनिःसरणक्षण एवापरस्योच्चारण-

रूपनिस्सरणस्य युगपदुच्चारणद्वयायोगेनायुक्तत्वात् क्रमे अवश्य-मनुसर्तव्ये तयोर्नामग्रहणक्रमस्यैव बुद्धिस्थत्वात् स एव प्रतीयते। 'तस्मात्' इत्यनेन तमेव हेतूकृत्य विधीयमानमुभयोः प्राथम्यमेकत्रैव क्रमिकतया प्राथम्य एव युज्यते । एकस्य एकत्र प्राथम्येनान्यस्यान्यत्र प्राथम्ये तादृश क्रमस्याप्रयोजकतया तस्य हेतुत्वानुसरणासङ्गतिः। तस्मादेकस्मिन्नेव क्रमिकप्राथम्येऽवश्यमनुसर्तव्ये वेदस्याप्रसक्तत्वात् अथशब्दोच्चारणपूर्वकपाठस्य सम्प्रदायसिद्धत्वाभावाच्च सूत्रस्यैव ग्रहणमावश्यकम् । एवं च सूत्रविषयकप्रश्नप्रतिवचनात्मकत्वादस्य वाक्यस्य सूत्रविषयकत्वनिश्चयात् सूत्र एवोभयोः क्रमात् प्राथमिकत्वं सिध्यति ।

'अतश्च पूर्वमुच्चार्याः' इत्यस्य यत्र कुत्रचिदप्रसक्तेः यथाकथञ्चिदुच्चार्यत्वकथनस्य प्रसक्तसूत्रस्वरूपनिरूपणानुपयोगित्वात् अप्रसक्तवेदे ओङ्कारोच्चारणकथनस्यानाकाङ्क्षितत्वात् प्रकृतहाना-प्रकृतस्वीकारप्रसङ्गात् तद्वाक्येन पूर्वपक्ष्युक्तार्थाप्रतिभासाच्च ।

किञ्च 'तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' 'ओमित्युक्त्वा स्वकर्माणि कुर्वन्त्युद्दिश्य केशवम् ।' इत्यादिभिर्मानैः जपस्वाध्यायप्रवचनादिसत्कर्मानुष्ठानात् प्राक् कर्माङ्गतया माङ्गलिकोच्चारणं प्रथितमेव नापलपितुं शक्यते ।

इत्थं चोङ्कारः सूत्रकृता सूत्रादावभिप्रायविशेषेण प्रयुक्तः । अभिप्रायविशेषश्च 'स्रवती'त्यर्थवादबलेन पठनीयोऽयमोङ्कारः प्रथम-सूत्रेणैकवाक्यतामापन्नः अदृष्टमात्रनिर्वाहको वा भवतु प्रथमसूत्रान्वि-तस्वार्थबोधनद्वारा प्रथमसूत्रसाध्यविषयसिद्ध्यादौ अभ्युच्चययुक्ति-सूचको वा भवत्वित्याकारकसमूहालम्बनात्मकः । यथा धूमेन वा आलोकेन वा वन्ह्यनुमितिर्जायतामित्यादिरूपः ।

परैरपि एतादृशाभिप्रायविशेषोऽङ्गीकार्य एव । अन्यथा 'वदतीति

चेन्न प्राज्ञो हि 'प्रकरणात्' इत्येकं सूत्रं पठित्वा व्याख्याय अथवा "प्रकरणात्' इति पृथक् सूत्रं पठित्वा व्याख्यानमसङ्गतं स्यात् ।

एवं चाद्यपक्षे प्रथमसूत्रादावुच्चारितोङ्कारः तत्र वाक्यार्थान्वयेन दृष्टफलकः भवन् अदृष्टफलकश्च भूत्वा सूत्रावयवः । तथापि अथादिशब्द इव न सूत्रघटकः । द्वितीयपक्षे तु वाक्यार्थान्व- येनाथशब्दवदेव ओङ्कारस्सूत्रघटकः । आद्यपक्षमवलम्ब्य सूत्रभाष्या- दिप्रवृत्तिः । 'एवं निरपवादेनादावुच्चारणेनोङ्कारस्य प्रथमसूत्रे अवयव- तासिद्धौ' इति 'एवमनुमाने निरस्ते निरपवोदेनादावुच्चारणेन ओङ्कार- रस्यावयवतासिद्धौ उक्तमुपपन्नम्' इति सौधवचनमप्युक्तार्थे गमकम् इत्यादि विशिष्टवाक्यार्थः तारस्वरूपप्रकाशे सुन्दरतया निरूपितः।

द्वितीयपक्षावलम्बनेनानुव्याख्यान-सुधा-चन्द्रिकादि प्रवृत्तिः । अत एव 'तारश्चाथश्च ताराथौ तयोर्मूलत्वं क्रमेणादित्वम् । आदौ प्रयुक्तौ ओङ्काराथशब्दाविति यावत्' इति, 'एवं प्राप्ते सूत्रयामास भगवानाचार्यः - 'ओम् अथातो ब्रह्मजिज्ञासा' इति', 'यदुक्तं जीवव्य- तिरिक्त ईश्वर एव नास्तीति तत्परिहाराय सूत्रकृता ओङ्कारब्रह्मशब्दौ प्रयुक्तौ' इत्यादि सुधावचनानि च उक्तार्थे प्रमाणानि । पक्षद्वयमपि सुधाचन्द्रिकाकर्तृणां सम्मतमेवेति निपुणतरमुपपादितं तारस्वरूप- प्रकाश इति तदध्ययनेन ब्रह्मानन्दसहोदरानन्दमनुभवन्तु इति सुधियः प्रार्थ्यन्ते । पृथगुच्चरितो वेदितव्य इति सन्न्यायरत्नावल्यपि नाऽथशब्दवत् सूत्रोपनिबद्ध इति संहिततया सूत्रावयवत्वं प्रतिषेधति न पुनस्सूत्रावयवतामेव । अन्यथा 'न सूत्रनिबद्ध' इत्येवावक्ष्यत् ।

चन्द्रिकायां तु - 'स्रवत्यनोङ्कृतं ब्रह्मे'ति निन्दार्थवादबलेन आद्यन्तयोरोङ्कार उच्चार्यः । 'ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्' इति गारुडोक्तदिशा अथातश्शब्दतुल्यतया अन्य एव ओङ्कारस्सूत्रघटक इत्यङ्गीकार्यः । अस्मिन् पक्षे नारायणाष्टाक्षरमन्त्र

इव 'ओम् ओम् नमो नारायणाय ओम्' इतिवत् 'ओम् ओम् अथातो ब्रह्मजिज्ञासा ओम्' इति पाठः सम्भवति । अष्टाक्षरादाविव एक ओङ्कारः, ओतत्वरूपार्थबोधनेन सूत्रावयवः अन्यौ पुनरदृष्ट-मात्रार्थाविनवयवौ चेति त्रय ओङ्काराः । एवं च सन्न्यायरत्नावली 'स्रवत्यनोङ्कृतं ब्रह्मेति श्रुतिप्राप्तसाधारणोङ्कारविषया सती स्मृतिप्राप्तासाधारणोङ्कारस्य न सूत्रावयवत्वं प्रतिषेधयतीति तस्यापि ओङ्कारस्य सूत्रघटकत्वं सम्मतमेव ।

यद्वा श्रुतिप्राप्तोङ्कारस्य स्मृतिविषयत्वसम्भवात् नोङ्कारद्वयं कल्प्यम् । स्मृतिप्राप्त एवोङ्कारः स्विष्टकृदादिन्यायेन प्रथमसूत्रे दृष्टादृष्टोभयार्थकः सन् द्वितीयादिसूत्रेषु तु अदृष्टमात्रार्थको भवति । सन्न्यायरत्नावल्युक्तं पृथक्त्वं तूह्यमानत्वमेव न पुनर्वाक्येऽनन्वय इत्यविरोधः । एवं च 'पृथगुच्चरितो वेदितव्य' इत्यस्य सर्वसूत्रेषूहनीयः न त्वेतत्सूत्रमात्रसम्बद्ध इत्यर्थ इति सुधा-सन्न्यायरत्नावल्याद्यविरोधः निपुणतरमुपपादितः। असंहिततयोच्चारणप्रयोजनं तूत्तरसूत्रेष्वनुगतिसूचनार्थमिति पूर्वमेव सुधायामुपपादितम् ।

अस्तु नाम प्रमाणगतिर्यथाकथञ्चिदथापि ब्रह्मशब्देनैव विषय-सूचनात् नोङ्कारस्य सूत्रघटकत्वे प्रयोजनं पश्याम इति चेत्, मैवम्। न केवलं जिज्ञास्ये 'तद् विजिज्ञासस्व तद् ब्रह्म' इत्यादौ ब्रह्मपदश्रवणात् तस्य जीवाद्भिन्नत्वेन जिज्ञास्यता, अपि तु 'ओमित्येतदक्षर-मुद्गीथमुपासीत' 'आत्मानं जानथ' इत्यादौ जीवेष्वसम्भावितगुण-पूर्तिवाचकोङ्कारादिश्रवणादपीति नान्यतरवैयर्थ्यम् । 'ओतत्ववाची ह्योङ्कारः' इत्यनुव्याख्यानोक्तरीत्या व्याहृति-गायत्री-पुरुषसूक्तद्वारा वा 'तद्यथा सर्वाणि पर्णानि शङ्कुना सन्तृण्णान्येवमोङ्कारेणैव सर्वा वाक् सन्तृण्णा इत्यादि सुधोदाहृतश्रुत्या साक्षाद्वा ओङ्कारव्याख्यानरूपमीमांसा-नुग्राह्यवेदरूपप्रमाणोक्त्यर्थत्वादपि ओङ्कार आवश्यक एव ।

ननु ओङ्कारस्य सूत्रघटकत्वे गुणपूर्तिवाचित्वे च कथं ब्रह्मपदेनान्वयः? ब्रह्मशब्दस्यापि गुणपूर्णार्थकत्वेन घटो घट इत्यत्रेव गुणपूर्णं गुणपूर्णमित्यनन्वयात् इति चेत्, न । ओम् ब्रह्मशब्दयोरेकस्य यौगिकत्वमपरस्य रूढत्वं चाश्रित्य 'ओम् = गुणपूर्णस्य ब्रह्मणः = विष्णोः जिज्ञासा कर्तव्या इति सूत्रवाक्यार्थनिरूपणान्नानुपपत्ति-लेशोऽपि ।

प्रादिर्शि च प्रकारान्तरं तारस्वरूपप्रकाशे यथा - 'ओम्पदस्य स्वरूपग्राहकत्वेन वाच्यतासम्बन्धेन ब्रह्मपदार्थेन्वयः । तथात्वेप्यनु-कार्यानुकरणयोरभेदपक्षे निपातत्वानपायाद् भेदान्वयोपपत्तिः । अस्य प्रमाणाभावशङ्कानिरासकत्वात् सूत्रकारीयतात्पर्यविषयता युक्ता । अनुकार्यानुकरणयोर्भेदपक्षेऽपि ओम् शब्दोत्तरं षष्ट्या वा तृतीयाया वा 'सुपां सुलुक्' इति लुक् । वाच्यत्वं षष्ठ्यर्थो ब्रह्मण्यन्वेति । तृतीयापक्षे करणत्वं तृतीयार्थो जिज्ञासायामन्वेति ।

यद्वा ओङ्कारार्थो गुणपूर्णताविशिष्टः प्रकारितासम्बन्धेन जिज्ञासायामन्वेति । तथा च गुणपूर्तिविशेष्यिका अभेदसम्बन्धेन तादृशविशिष्टवस्तुप्रकारिका जिज्ञासा कर्तव्येति बोधः । '

एवं च वाक्यार्थान्वयस्य बहुधा निरूपितत्वेनोङ्कारस्योक्तदिशा सूत्रावयवत्वं प्रामाणिकमेवेति स्थितम् ।

मातृकास्वरूपविवृतिः : (Description of Manuscripts)

ओङ्कारवाद - तारस्वरूपप्रकाशग्रन्थसम्पादनायोपयुक्त - मातृकास्वरूपमितः परं निरूप्यते -

ओङ्कारवादः

क्र सं	ग्रन्थसंख्या	संज्ञा	परिमाणः	पत्राणि	पङ्क्तिः	अक्षराणि	लिपिः	स्थितिः	मातृकोपलब्धिस्थानम्
१	A १६६	क	२० X २० cm	१८	११	२७	दे	उत्तमा प्रायः	श्रीविद्याधीशप्राच्यग्रन्थसङ्ग्रहालयः, संस्थापकाः - प्रो.के.टि. पाण्डुरङ्गी वेंगळूरु
२	C १२७६	ख	२१ X २०	११	८	२८	दे	उत्तमा अशुद्धा	प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः मैसूरु
३	A २४०	ग	१८ X २२	१५	१०	२८	दे	उत्तमा प्रायः शुद्धा	श्रीजयतीर्थप्राच्यग्रन्थसङ्ग्रहालयः, संस्थापकाः - प्रो. प्रभञ्जनाचार्याः वेंगलूरु
४	A १५६	घ	२८ X २०	१६	११	२५	दे	प्रायः शुद्धा	पूर्णप्रज्ञविद्यापीठीयप्राच्यविद्यासंशोधनालयः, वेंगलूरू. संस्थापकाः-श्री पेजावरमठाधीशाः विश्वेशतीर्थश्रीपादाः

तारस्वरूपप्रकाशः

क सं	ग्रन्थसंख्या	संज्ञा	परिमाणः	पत्राणि	पङ्क्तिः	अक्षराणि	लिपिः	स्थितिः	मातृकोपलब्धिस्थानम्
१	C ८६१	क	३० X १०	४४	१४	५२	दे	उत्तमा प्रायः शुद्धा	प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः, मैसूरु
२	A ४२६	ख	३३ X ११	७३	८	५३	दे	उत्तमा प्रायः शुद्धा	श्रीजयतीर्थप्राच्यग्रन्थसङ्ग्रहालयः बेंगळूरु, संस्थापकाः - प्रो. प्रभञ्जनाचार्याः
३	A २८१	ग	३१ X १०	७०	८	४८	दे	उत्तमा	पूर्णप्रज्ञविद्यपीठीयप्राच्यविद्यासंशोधनालयः संस्थापकाः - श्रीविश्वेशतीर्थस्वामिपादाः पेजावरमठम्, उडुपि.

कृतज्ञतानिवेदनम्

स्वीयपूर्णप्रज्ञविद्यापीठीयप्राच्यविद्यासंशोधनालयात् मूलमातृकाप्रदानेनानुगृहीतवद्भ्यः प्रतिभा - वाक्यार्थपाटव-परमकारुण्याद्यनेकगुणगणमण्डितेभ्यः परमपूजनीयेभ्यः ममाध्यात्मविद्योपदे- शकेभ्यः श्रीपेजावरमठीय श्रीविश्वेशतीर्थस्वामिपादेभ्यः नमांसि भूयांसि समर्पये । तेषां कृपालेशत एवायं ग्रन्थः यथामति समशोधीति सविनयं विद्वत्सु निवेदये ।

तथैव मातृकाप्रदानेन प्रोत्साहितवद्भ्यः बेंगळूरु विश्वविद्यानिलय-संस्कृतविभागीयभूतपूर्व प्राध्यापकेभ्यः भारते अन्यत्र च सुप्रथितेभ्यः अप्रटितापूर्वग्रन्थसंशोधनप्रकाशनादिना विद्वन्मान्येभ्यः प्रो, के.टि. पाण्डुरङ्गीमहाभागेभ्योऽपि प्रणतयो विज्ञाप्यन्ते।

एवमेव मातृकाप्रदानेन प्रोत्साहकेभ्यः 'पण्डितरत्नम्' 'वेदान्तभूषणम्' 'विद्यावाचस्पतिः' इत्यद्युपाधिविभूषितेभ्यः पाठ-प्रवचन-ग्रन्थनिर्माणादिना विद्वन्मान्येभ्यः प्रो. प्रभञ्जनाचार्येभ्योऽपि प्रणतयो विज्ञाप्यन्ते।

इमौ कृतिरत्नौ यस्या भगीरथप्रयत्नाद् विदुषां करनलिनयो-रुपायनीकृतौ, यस्या मार्गदर्शने विदुषोऽविदुषोऽपि परमादरेण कर्तव्यपरायणा भवन्ति, या च मातुरिवास्माकं नितान्तमभिवृद्धिं कामयते, तस्याः डा. देवकी इति सुगृहीतनाम्न्याः अलङ्कारादि-शास्त्रपारङ्गतायाः भूतपूर्व निर्देशिकायाः उपकृतिं प्रोत्साहं च न कदापि विस्मरे । पूजार्हायास्तस्या प्रणतयो विज्ञाप्यन्ते ।

अधुना निर्देशकस्थानमलङ्कृत्य स्वीयपाण्डित्यप्रतिभया विनयादि गुणैश्च सर्वेषां प्रीतिपात्रेभ्यः अपूर्वनिकनिबन्धप्रणयनेन विविधदेशीय

विद्वद्भिः सम्मानितेभ्यः डा. के. वि. रमेशमहोदयेभ्यः सादरं प्रणतयो विज्ञाप्यन्ते ।

संशोधनकर्मणि प्रीत्यतिशयेन प्रोत्साहकेभ्यः 'पण्डितरत्नम्' 'वेदान्तभूषणम्' 'विद्यावाचस्पतिः' इत्याद्युपाधिविभूषितेभ्यः उपनिर्देशकेभ्यः आर्.जि. माळगि. एम्.ए. महोदयेभ्योऽपि प्रणतयो विज्ञाप्यन्ते ।

गहनवाक्यार्थपरिप्लुतस्यास्य ग्रन्थस्य संशोधनसमये तत्र तत्राज्ञानविपरीतज्ञानादिना संशयसमास्कन्दितचेतसो मे स्वीयनिर्ष्कृष्टपाण्डित्याप्रकटितग्रन्थसम्पादनानुभवादिना विशयान्निरस्य नितान्तमुपकृतवद्भ्यः 'पण्डितरत्नम्' 'सच्छास्त्रप्रवचनविचक्षणरत्नम्' इत्याद्युपाधिविभूषितेभ्यः पि.एस्. शेषगिरि आचार्यः बि.एस्.सि., एम्.ए. महोदयेभ्यः सादरं नतिततयः समर्प्यन्ते ।

'गच्छतः स्खलनं क्वापि' इत्यादि न्यायेन विद्यमानदोषान्निरूप्य 'हंसक्षीरन्यायेन गुणावलोकनदीक्षाणां विद्वद्वरेण्यानां सर्वेषामपि करकमलयोः सविनयमिदमुपायनीक्रियते । नमो महद्भ्यः ।

10-10-1998
मैसूरु.

इति सज्जनविधेयः
आनन्दतीर्थ . वि. नागसम्पिगे, एम्.ए.
न्याय-वेदान्तविद्वान्
संशोधकः
प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः, मैसूरु.

ओङ्कारवादविषयानुक्रमणिका

तारस्वरूपप्रकाशविषयानुक्रमणिका

तारस्वरूपप्रकाशे उदाहृताः प्रमाणग्रन्थाः

श्रीविघ्नेश्वरान्तर्गतश्रीभारतीरमणमुख्यप्राणान्तर्गत

श्रीविश्वम्भराय नमः । श्री वेदव्यासाय नमः

ओङ्कारवादः

श्रीविद्याधीशतीर्थविरचितः

(मङ्गलाचरणम्)

द्योतयन्तं[1] दश दिशो भासा सूर्यसमानया ।
बुद्धिमन्तं हनूमन्तं दयावन्तमुपास्महे ।। १ ।।
तात्पर्यचन्द्रिकायुक्तं न्यायामृतकलानिधिम् ।
तर्कोडुताण्डवकृतं व्यासतीर्थ[2]विधुं भजे ।। २ ।।

"ओम् अथातो ब्रह्मजिज्ञासा" इति न्याय[3]ग्रथनात्मकब्रह्म-मीमांसाशास्त्रस्यादिमसूत्रस्थोङ्कारो एतत्सूत्रावयवो न वेति विप्रतिपत्तिः। नेत्यन्ये । भवत्येवेति व्यासमतानुयायिनः ।

(ओङ्कारः न सूत्रावयव इति वदतां मतोपन्यासः)

तत्रान्येषामयमभिसन्धिः । मेयसिद्धेर्मानाधीनत्वात् ओङ्कारस्यैत-त्सूत्रावयवत्वे मानं वक्तव्यम् । [4]तच्च न तावत्प्रत्यक्षम् । असम्भवात्। नाऽपि विमत ओङ्कारः एतत्सूत्रावयवः शिष्टैस्तदादौ नियमेन

---

1. दिश दशो.क.ख.
2. विभुम्.ग.घ.गुरुम्.क.
3. ग्रन्थ - क - ग्रन्थि - ग.
4. तच्च इति ख.ग.ध. कोशेषु नास्ति ।

पठ्यमानत्वात् । प्रथमसूत्रस्थाथशब्दवत् इत्यनुमानम् । जन्मादि-सूत्रोक्त ओङ्कारे व्यभिचारात् । तत्रादौ ओङ्कारस्यापि[1] अदृष्टार्थं नियमेन शिष्टैः पठ्यमानत्वेन[2] एतत्सूत्रावयवत्वाभावात् ।

किञ्चाध्ययनोपक्रमकाले अध्यापकैरुच्चार्यमाण ओङ्कारे व्यभिचारः। तत्र साध्याभावात् । किञ्च[3] ग्रन्थारम्भे माङ्गलिकशब्दोच्चारणवत् ओङ्कारस्याद्य[4]सूत्रानवयवत्वेपि उक्तहेतोरुपपन्नत्वेन अप्रयोजकत्वम्।

(ओङ्कारस्य सूत्राघटकत्वे अनुमानोपन्यासः)

अपि च विमत ओङ्कार नाद्यसूत्रावयवः लक्षणान्तराभावे सति असंहिततया सम्पाठे अखिलैः पठ्यमानत्वात् । वेदोपक्रमेऽध्यापकैरुच्चार्यमाणोङ्कारवदिति सत्प्रतिपक्षः । 'सुध्युपास्य' इति वाक्यावयवे सुधीति पदे अखिलैः पठ्यमाने[5]व्यभिचारपरिहाराय असंहिततयेति। तत्र संहिततया पठ्यमानत्वस्य सत्वात्।[6] 'कृष्णा एहि' इति वाक्यावयवे अव्यभिचाराय लक्षणान्तराभावे सतीति । असंहितता-प्रापकसूत्रान्तराभावे सतीत्यर्थः । तत्र 'प्लुतप्रगृह्या अचि' इति सूत्रमेवास्तीति न व्यभिचारः । पदपाठकालेऽखिलैः असंहिततया पठ्यमानेषु पदेषु व्यभिचारपरिहाराय सम्पाठेति । संहितापाठकाल

1. दृष्टार्थं. क. ग.
2. तत्सूत्रावयवत्वाभावादिति पाठः साधुरिति भाति ।
3. ग्रन्थारम्भ इति नास्ति ख. घ.
4. सूत्राव्यवत्वे. ख. ग.
5. अव्यभिचारपरिहाराय. क. ग.
6. कृष्णा आयाहि क. ग.

इत्यर्थः । तत्पाठकालेऽपि[1] प्रामादिकेष्वसंहिततया पठ्यमानेषु[2] पदेषु व्यभिचारपरिहाराय अखिलैरिति । न हि सर्वेषां प्रमाद इति भवति तन्निरासः ।

न चाप्रयोजकता । तथात्वे अथशब्दवत् संहिततया निर्देशापत्तेः । न च दृष्टान्तः साध्यविकलः । 'ओमिति ब्रह्म' इतिवत्[3] नियतस्थानतया पाठप्रसङ्गात् ।

(स्मृतेरर्थान्तिरोपन्यासः)

किञ्च "**ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।**
कण्ठं भित्वा[4] विनिर्यातौ तस्मात् माङ्गलिकावुभौ।
(ब.भा. 1.1.1.) " इत्यादिना ओङ्कारस्य शङ्खवीणावेणुध्वनिवत् श्रुतितो माङ्गलिकत्वेन समस्त[5]शास्त्राङ्गतया अन्यार्थमुद्दिष्टस्य तस्य कथं सूत्रावयवत्वम् ।

(ओङ्कारस्य सूत्रानवयवत्वे सन्न्यायरत्नावली सम्मतिकथनम्)

किञ्च ओङ्कारस्य सूत्रावयवत्वे "**ओङ्कारस्तु पृथगुच्चरितो वेदितव्यः। नाऽथशब्दवत् सूत्रोपनिबद्धः**" (१.१.१)इति सन्न्यायरत्नावलीविरोधः कथं परिहरणीयः । "**सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः**" (ब्र.अ.1.1.1.) इत्यनुव्याख्यान[6]विरोधश्च । तत्र उभयत्राऽपि पृथगित्यनेन[7] सूत्रानवयवत्वोक्तेः।

---

1. प्रामादिकेषु संहिततया. ख.घ.
2. पदेषु इति ख. ग. कोशेषु नास्ति ।
3. नित्य. ख.
4. समुत्पन्नो. ख.
5. शास्त्राद्य. क. ख.
6. विरोधः ख. ग.
7. सूत्रावयवत्वोक्तेः - क.

(ओङ्कारस्य सूत्रघटकत्वेऽपि विवक्षितासिद्ध्योङ्कारवैयर्थ्यशङ्का)

किञ्च ओङ्कारस्य सूत्रावयत्वे असौ क्वान्वित इति वक्तव्यम् । न तावत्तदर्थस्य ब्रह्मणा सहान्वयः । ब्रह्मणः [1]शब्दत उपसर्जनत्वेन तेन सहान्वयानुपपत्तेः पदान्तरोपात्तत्वादोतत्वस्य ।

किञ्च आद्यसूत्रे ओङ्कार एव कुतः ? प्रयोजनाभावात् । विषयसूचनार्थमिति चेन्न । ब्रह्मशब्देन तत्सम्भवात् ।

ननु 'बृह जाति जीव कमलासन शब्दराशिषु' इति रूढ्या जीवेऽपि ब्रह्मशब्दवाच्यत्वसम्भवेन न ब्रह्मशब्दमात्रेण ईश्वर[2]रूपविषयसिद्धिः । किन्तु जीवासम्भावितानन्तकल्याणगुण-पूर्त्यभिधायकोङ्कारोऽपेक्षित इति चेन्न । **'अथ कस्मादुच्यते ब्रह्मेति? बृहन्तो ह्यस्मिन् गुणाः'** (ब्र.न्या. 1.1. 1.) इति न्यायविवरणोदाहृत विद्वद्योगेन, **'तदेवर्तं तदु सत्यमाहुः तदेव ब्रह्म परमं कवीनाम्'** (भाग.1.2. 11.) इति विद्वद्रूढ्या च **'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते। [3] असम्पूर्णाः परे यस्मात् उपचारेण वा भवेत् । 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'** इत्यादिस्मृत्या (ब्र.भा.1.1. 12.) **'ब्रह्मशब्दश्च विष्णावेव'** इति सावधारणभाष्येण मुख्यया वृत्त्या विष्णोरेव[4] ब्रह्मशब्दवाच्यत्वेन जीवादि- ग्रहणासम्भवात् ।

न च **"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते"** इति

---

1. शब्देन. ख. 2. स्वरूप. ग. स्वरूपविषयत्व. घ.
3. असम्पूर्णा इत्यारभ्य .....शब्द्यते इत्यन्तो भागः 'क' कोशे नास्ति ।
4. ब्रह्मवाच्यत्व. क. ब्रह्मशब्दवाच्यत्वसम्भवेन. ख.

[1]श्रौतार्थवादबललब्धश्रवणविशरणाभावरूपादृष्टमेव प्रयोजनमिति-नोङ्कारस्य वैयर्थ्यमिति वाच्यम् । अदृष्टार्थत्वेऽपि जन्मादिसूत्रोच्चार्य-माणोङ्कारवत्[2] आद्यसूत्रानवयवत्वप्राप्तेः ।

ननु "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" इत्यनुव्याख्याने सूत्रादित्वमुक्त्वा असौ व्याख्यातः । तदन्यथाऽनुपपत्त्या सूत्रावयवत्वं ज्ञायत इति चेन्न । तर्हि भर्गादिपदानामपि सूत्रावयत्वं स्यात् । 'स एव भर्गशब्दार्थः' इति तदर्थस्यापि[3] कथनात् । तद्व्याख्यानं च सर्वविदव्याख्येयोङ्कारार्थवाचकनारायणपदवाच्यस्य सर्वविदार्थतया तस्य शास्त्रविषयत्वमित्यभिप्रेत्यैव ।

(सूत्रावयवत्वनिर्वचननिराकरणम्)

किञ्च ओङ्कारस्य किमिदं सूत्रावयत्वं नाम ? न तावदाद्य-सूत्रार्थान्वय[4] प्रतियोग्यर्थोपस्थापकपदत्वम् । कर्तव्येति पदे अध्याहृते [5]अतिव्याप्तेः । नाप्यदृष्टार्थत्वे सति तत् । वाक्यप्रत्ययरूपदृष्टफल-त्वेनासम्भवात् । नापि दृष्टादृष्टोभयफलकत्वे सति पूर्वोक्तमिति वाच्यम् । तथात्वे अयमोङ्कारः [6]अनवयवोङ्कारादिभ्यो भिद्यते दृष्टादृष्टोभयफलकत्वे सति आद्यसूत्रार्थान्वयप्रतियोग्यर्थो-पस्थापकपदत्वात् इत्यनुमानेन इतरभेदसाधने व्यर्थविशेषणत्वात्। असाधारण्यात् । व्याप्तिरहितत्वाच्च । तस्मादोङ्कारस्य सूत्रावयवत्वं [7]निष्प्रमाणकम् ।

---

1. श्रुतार्थवाद. क. ग.
2. आद्येति क. घ. कोशेषु नास्ति । आद्यसूत्रावयवत्वाप्राप्तेरिति पाठः स्वरस इति भाति ।
3. तदर्थस्यापि कथनं तु तद्व्याख्येयोङ्कारार्थवाचक. क.
4. प्रतियोग्युपस्थापकत्वम् - क.
5. अव्याप्तेः - ख.
6. अन्यावयव. ख.
7. निष्प्रमाणिकम्. क.

(मतान्तरमवलम्ब्य ओङ्कारस्य सूत्रावयवत्वोपपादननिरासौ ।)

अत्र केचित् "**स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यति**" इति श्रवणविशरणाभावरूपादृष्टार्थं प्रतिसूत्रं ब्रह्मविद्यात्वात् [1]सर्वसूत्रेषु आद्यन्तयोरोङ्कारः सर्वत्राध्याहार्य इत्येतदविवादम् । आद्यसूत्रोच्चार्यमाणोङ्कारो आद्यसूत्रार्थान्वित इति तदवयव इति मन्महे ।

न च ब्रह्मशब्देनान्वयानुपपत्तिः । अर्थवादार्थस्य प्राशस्त्यस्य 'यजेत' इत्यत्र यागविशेषणत्ववत् उपसर्जनीभूतेन ब्रह्मणा सहोतत्वा[2]देरन्वयोपपत्तेः । न च ब्रह्मशब्देन विषयसूचनात् ओङ्कारवैयर्थ्यम् । न केवलं "**तद् विजिज्ञासस्व तद् ब्रह्म**" इति श्रुतौ जिज्ञास्ये ब्रह्मपदश्रवणात् जीवभिन्नत्वेन जिज्ञास्यता किन्तु "**ओमित्येतदक्षरमुद्गीथमुपासीत**" इति श्रुतौ (छा.अ.1.) जीवेष्व - सम्भावितानन्तानवद्यकल्याणगुणपूर्तिवाचकोङ्कारश्रवणाच्चेति युक्त्यन्तरसूचकत्वेन सार्थक्योपपत्तेः । न च युक्त्यार्थान्तरसूचनं व्यर्थम्। दार्ढ्यार्थत्वात्।

[3]न च पौनरुक्त्यम् । [4]'विशिष्टवाचकपदानां विशेषणसमवधाने विशेष्यमात्रपरत्वम्' इति न्यायेन सौत्रब्रह्मशब्दस्य रूढ्या केवलविष्णुरूपार्थकत्वस्वीकारेणोङ्कारस्य तु गुणपूर्त्यभिधायकत्वेन अपौनरुक्त्यात् । यथा [5]"स कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यादौ ।

प्रमाणं त्वनुमानम् । विमत ओङ्कारः आद्यसूत्रावयवः

---

1 सर्वत्र - क. सर्वत्र सूत्रेषु इति ख कोशे नास्ति ।

2. रन्वयानुपपत्तेः - ख. घ.

3. न च पौनरुक्त्यम् इति पङ्क्तिः क कोशे नास्ति ।

4. विशिष्टवाचकपदानां पृथक् विशेषणवाचकपदसमवधाने सति विशेष्यमात्रपरत्वमिति पाठेन भाव्यमिति भाति ।

5. स कीचकैरित्यादि. क.

प्रथमसूत्रार्थान्वितत्वात् प्रथमसूत्रस्थाथशब्दवत् इति । किञ्च **"ओङ्कारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात्"** इत्यादिस्मृत्या (ब्र.भा.1.1.1.) "तत्र [1]ताराथमूलत्वं सर्वशास्त्रस्य चेष्यत" इत्यनुव्याख्यानेन च [2]अथातःशब्दतुल्यतया आद्यसूत्रावयवताया उक्तत्वेनोङ्कारस्याद्यसूत्रावयवत्वमिति आहुः ।

तदुपेक्षणीयम् । तथाहि यत्तावदुक्तं - आद्यसूत्रावयवत्वेऽनुमानं प्रमाणमिति । तच्चिन्त्यम् । "ओङ्कारः पृथगुच्चरितो वेदितव्यः । नाथशब्दवत् सूत्रोपनिबद्धः ।" इति सन्न्यायरत्नावलीविरोधात् । "सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः" इत्यनुव्याख्यानविरोधश्च स्यात् । साध्यसमत्वाच्च ।

किमिदम् आद्यसूत्रावयवत्वम् ?[3] आद्यसूत्रार्थान्वितप्रतियोग्यर्थोपस्थापकपदत्वं चेत् [4]हेतुरपि स एव । तथा च साध्यसमः कथं न स्यात् ।

ओङ्कारो न आद्यसूत्रावयवः लक्षणान्तराभावे सत्यसंहिततया सम्पाठेऽखिलैः पठ्यमानत्वात् इति[5] सत्प्रतिपक्षश्च [6]आनन्तर्यप्रतिपादकत्वरूपोपाधेश्च ।[7] माङ्गलिकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् नाथशब्दे साध्याव्यापकता ।

---

1. वाराथ. क.
2. अतःशब्दतुल्यतया. क. अथशब्दतुल्यतया. घ.
3. नाद्यसूत्रान्वप्रतियोग्युपस्थापकत्वं - क.
4. हेतुरपि इति ग कोशे नास्ति.
5. सत्प्रतिपक्षत्वात् - क.
6. आनन्तर्याप्रतिपादक. क. ग.
7. माङ्कलिकरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्नाथशब्देन साध्यव्यापकता - क.

किञ्च जन्मादिसूत्र उच्चार्यमाण ओङ्कारः तदवयवः सप्रयोजनत्वात् सम्मतवदित्याभाससाम्यम् । अध्ययनोपक्रमकाले उच्चार्यमाण ओङ्कारः पक्षतुल्य एवेति न तत्र व्यभिचारः शङ्कनीयः । कर्तव्येतिपदस्य जिज्ञासान्वितत्वेपि [1]आद्यसूत्रानवयवत्ववत् ओङ्कारस्यापि सूत्रान्वितत्वेपि[2] अनवयवत्वोपपत्त्या अप्रयोजकत्वं च । कर्तव्येतिपदे[3] सूत्रार्थान्विते व्यभिचाश्च । अदृष्टार्थत्वे सतीति विशेषणे आनन्तर्यप्रतिपादकत्वरूपदृष्टार्थकेऽथेतिशब्दे उक्तहेतोरभावेन पक्षमात्रव्यावृत्या असाधारण्यम् । [4]असिद्धेश्च। [5]उपसर्जनीभूतब्रह्मणा सह पदान्तरोपात्तोतत्वादेरन्वयानुपपत्तेः।

[6]न चार्थवादस्य प्रशस्तस्य उपसर्जनीभूतयागविशेषणत्वस्येव ब्रह्मणि ओतत्वादेः [7]अन्वयः सम्भवतीति शङ्क्यम् । यागविशेषणत्वे बाधकाभावात् । प्रकृते वैयर्थ्यलक्षणबाधकस्योक्तत्वात् । एवं च असिद्धिः, व्यभिचारः, अप्रयोजकत्वम्, आभाससाम्यम्, उपाधिः, सत्प्रतिपक्षत्वं साध्यसाम्यापादनं विरोधद्वयं चेति उक्तनवदूषणभूषितत्वादनुमानं न मानम् ।

[8]यदपि [9]सूत्रावयत्वे भाष्योदाहृतस्मृति[10]र्मानमस्तीति । तदप्यसत् । अतश्च 'पूर्वमुच्चार्या' इत्यनेन ओङ्कारस्यादावुच्चार्यमाणत्वस्यैव विधीयमानत्वेन [11]सूत्रावयवत्वानुक्तेः ।

---

1. आद्येत्यारभ्य अप्रयोजकत्वात् इत्यन्तो भागः ख कोशे नास्ति ।
2. अवयवत्वापत्या. क.
3. सूत्रार्थसमन्वये. क.
4. असिद्धेः - ख.
5. उपाङ्गभूत. ग. उपांशुभूत. घ.
6. न चार्थवादार्थस्य प्राशस्त्यस्योपसर्जनीभूतेत्यादि पाठेन भाव्यमिति भाति
7. अन्वय इति क कोशे नास्ति ।
8. यद्यपि. क.
9. सूत्रानवयवत्वे. ख.
10. मौनम् । घ.
11. सूत्रानवयकत्वानुत्त्केः. ख.

न चाथातःशब्दतुल्यतयोच्यमानत्वान्यथानुपपत्त्या ओङ्कारस्याद्यसूत्रावयवत्वं ज्ञायत इति वाच्यम् । तर्हि तस्याद्यसूत्रावयवत्वेऽन्यथानुपपत्तिः प्रमाणमित्युक्तं स्यात् । तस्या[1] अनुमानरूपतया प्रागेव दूषितत्वात् ।

यच्चोक्तं दार्ढ्यार्थं हेतुद्वयसूचनमिति । तदपि मन्दम् । सौत्रब्रह्मशब्दार्थप्रतिपादकश्रुतिस्मृतिवाक्यार्थपर्यालोचनया ब्रह्मशब्देनैवातिदार्ढ्योपपत्तेः । सूत्रत्वहानेश्च [2]तेषां निर्णायकत्वात् ।

यदपि पौनरुक्त्यपरिहाराय 'विशिष्टवाचकानाम्' इत्यादिवाणिरभाणि । तन्न । तर्हि सर्वत्राप्येवं वक्तुं शक्यत्वेन पुनरुक्तेः क्वापि दोषत्वं न स्यात् । ब्रह्मशब्दस्यापि स एव ब्रह्मशब्दार्थ' इति सुधायां [3]गुणपूर्णार्थत्वस्य प्रतिपादितत्वात् तद्विरोधापत्तेश्च । तस्मादोङ्कारो न सूत्रावयव इति पूर्वःपक्षः ।

(ओङ्कारस्य सूत्रावयवत्वोपपादकसुधाशयोपवर्णनम्)

अत्र टीकाकाराः - "**स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते** " इत्यर्थवादबलेन प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योहः कर्तव्यः । न चोह्यमानं वाक्यात्[4] पृथगिति शक्यते वक्तुम्। [5]तथात्वे मन्त्रेष्वप्यूह्यमानस्य[6]मन्त्रानवयवत्वप्रसङ्गात् । ओङ्कारार्थस्योतत्वादेः[7] आद्यसूत्रार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहिततया निर्देशस्तु

1. अनुरूपतया. ग.
2. निर्णायकत्वाभावात्. क. ख.
3. गुणपूर्णार्थिकत्वे. - ख.
4. पृथक् इत्येवास्ति. क.
5. तद्यथा. ख.
6. मान्त्रावयवत्व. ख.
7. आद्यासूत्रवयत्वादर्थे

सर्वसूत्रेष्वनुगतिसूचनार्थः" इति ओङ्कारस्याद्यसूत्रावयवत्वं सुधायामाहुः।

अत्रेदं शङ्क्यते - एवं सति "अग्नये[1] जुष्टं निर्वपामि" इत्यत्राग्निपदस्थाने सूर्यपदस्योहः सम्भवति, तत्र स्थानिनोऽग्निपदस्य सत्वात्। [2]नेह चोहः सम्भवति । स्थानिनोऽभावेन ऊहलक्षणाभावात् पूर्वमीमांसाविरोधः स्यात् । यथोक्तं - "[3]**प्राकृतस्थानपतितपदार्थान्तरकार्यतः । ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः**" (न्या.प.) इति । न च सुधास्थोहशब्देनाध्याहारो लक्ष्यत इति वाच्यम् । साकाङ्क्षत्वाभावात् । किञ्च मन्त्रेष्वप्यूह्यमानस्य मन्त्रानवयवत्वमिष्टमेव मीमांसकानाम् । तैरूहप्रवरनामधेयानाममन्त्रत्वस्य द्वितीये सिद्धान्तितत्वात् ।

[4]किञ्च ओङ्कारार्थस्योतत्वादेः न वाक्यार्थे समन्वयः । ब्रह्मणः शब्दत उपसर्जनत्वेन पदान्तरोपात्तोतत्वादेरन्वयानुपपत्तेः । अपि च यथाकथाञ्चिदन्वयसम्भवेऽपि आदावेव प्रयोगेण चरितार्थत्वादन्ते प्रयोगवैयर्थ्यम् ।

किञ्च[5] 'ङ्याप् प्रातिपदिकात्' इत्यधिकारसूत्रे विद्यमानस्य "ङ्यन्तादावन्ताच्च प्रातिपदिकात् परे स्वादिप्रत्ययाः स्युः" इति अनुषक्तस्यापि ङ्यन्त[6] अन्वयदर्शनात् प्रकृतेप्योङ्कारार्थस्यापि जन्मादिसूत्रेष्वन्वयो वाच्यः । स चाशक्यः । किञ्च "ओङ्कारः पृथगुच्चरितो

1. जोपं - क.
2. न चोहः - ख.
3. प्रकृत. ख.
4. किञ्चेति क कोशे नास्ति ।
5. ङ्याप् प्रतिपदिकात् इत्यधिकृत्याधिकारसूत्रे विद्यमानस्य नञः ङ्यन्तादावन्तात् प्रतिपदिकाच्च इति - ख.
6. अन्वयोऽप्यदर्शनात्. क.

वेदितव्यः नाथशब्दवत् सूत्रोपनिबद्ध इति सन्न्यायरत्नावलीविरोधः सुधाया इति ।

(तात्पर्यचन्द्रिकोक्तसमाधानविवरणम्)

अत्र व्यासतीर्थश्रीमच्चरणा आहुः -

"नात्रोहशब्दो[1] मीमांसकाभिमतोहपरः" । किन्तु "अध्याहारस्तर्क ऊह" इति प्रसिद्ध अध्याहारो ऊहशब्देन विवक्षितः ।

न च साकाङ्क्षत्वाभावः । दृष्टार्थाभावेऽपि श्रवणविशरणाभावरूपादृष्टार्थसद्भावात् । अत एव च नान्ते प्रयोगवैयर्थ्यम् । नाप्युत्तरसूत्रे अनन्वयदोषः। अदृष्टार्थत्वस्य सत्वात् ।

यच्चोक्तं - मन्त्रेषूह्यमानस्य मन्त्रानवयवत्वमिष्टमिति । तदपि न । मन्त्रानवयवत्वपदेन मन्त्रेण सहैककार्यकारित्वाभावस्य विवक्षितत्वेनेष्टापत्तेर्वक्तुमशक्यत्वात् ।

यदपि - ओङ्कारार्थस्य ओतत्वादेर्ब्रह्मणि समन्वयो न सम्भवतीति। तदप्यसत् । "सप्तदशारत्निर्वाजपेयस्य यूपो भवति" इत्यत्र सप्तदशारत्नित्वस्य प्रधानभूतवाजपेयस्यागेनानन्वयेऽपि

---

1. "अग्नये जुष्टं" इत्यादौ "सूर्याय जुष्टं" इत्यादिः मन्त्रोहः । "यद्योन्यां तदुत्तरयोर्गायति" इति कवतीषु रथन्तरं गायति "इत्यादिषु प्रकृतिग्रन्थे योनावाम्नातानां साम्नामुत्तरादिषु तत्तदानुगुण्येनान्यथागानं सामोहः । व्रीहिषु श्रुतानामवहननादीनां वैकृते नीवारादिषु औचित्येनानुष्ठानं संस्कारोहः, इत्येतेषां निर्देशके "मन्त्रसामसंस्कारोहः" इत्यादौ मीमांसकव्यवहारे ऊह्यत इति व्युत्पत्या यथा प्रयोगविकारपर ऊहशब्दः न तथा प्रकृते, "ऊह वितर्के" इत्यस्मात् धातोर्भावे घञि लघूपधत्वाभावेन गुणाभावे चोह इति सिद्धेरध्याहारपर इत्यर्थः । व्यक्तमेतत् चन्द्रिकाप्रकाशे ।

2. यागेन सहान्वयाभावेपि. क. घ.

[1]अप्रधानभूतयूपान्वयवत् अङ्गावतारन्यायेन ओतत्वस्य प्रधानभूत-जिज्ञासानन्वितत्वेऽपि उपसर्जनीभूतब्रह्मण्यन्वये बाधकाभावात् । [2]अर्थवादार्थस्य प्राशस्त्यस्य "यजेत" इत्यत्रोपसर्जनीभूतयागविशेषण-त्वदर्शनाच्च । "दण्डिनं पश्य" इत्यादौ दण्डस्योपसर्जनस्य [3]विध्यन्वयदर्शनाच्च ।

न च ब्रह्मशब्देन विषयसूचनादोङ्कारवैयर्थ्यम् । न केवलं जिज्ञास्ये ब्रह्मणि "**तद् विजिज्ञासस्व**" इत्यादौ ब्रह्मशब्दश्रवणात् जीवभिन्नत्वेन जिज्ञास्यता अपि तु "**ओमित्येतदक्षरमुद्गीथमुपासीत**" इत्यादौ जीवेष्वसम्भावितगुणपूर्त्यभिधायकोङ्कारश्रवणाच्चेति युक्त्यन्तरसूचकत्वेन सार्थक्यात् । अदृष्टार्थमवश्यं[4] प्रयोक्तव्यत्वाच्च न वैयर्थ्यम् ।

न च[5] पौनरुक्त्यम् । ओङ्कारार्थस्योतत्वादेर्गुणस्य ब्रह्मशब्देन साक्षादप्रतिपादनात् आर्थिकपौनरुक्तेरदोषत्वात् । नापि सन्न्याय-रत्नावलीविरोधः शङ्क्यः ।[6] मास्तु "स्रवत्यनोङ्कृतं" इत्यनेन श्रौतार्थ-वादेनोक्तसाधारणोङ्कारस्याद्यसूत्रावयवता । तथापि "**ओङ्कारश्चाथ-शब्दश्च तस्मात् प्राथमिकौ क्रमात्**" तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः । "**अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः**" (ब्र.सू. भा.1.1.1.) इति भाष्योदाहृतस्मृत्या अथातश्शब्दतुल्यतया [7]उक्तासाधारणोङ्कारस्य आद्यसूत्रावयवत्वे बाधकाभावात् । "तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते" इत्यनुव्याख्यानेऽपि

1. प्रधान. ख.
2. अर्थवादस्य. क.
3. विध्यनन्वयदर्शनाच्च. ख.
4. प्रयुज्यत्व. ग.
5. पुनरुक्तयम्. क.
6. अत एवैतच्छङ्कापरिहाराय पक्षान्तरमुक्तं चन्द्रिकायां यद्वेत्यनेनेति. क.
7 उक्तं साधारण. ग.

अथशब्दतुल्यतयोङ्कारस्योक्तत्वाच्च ।

एवं च सन्न्यायरत्नावली "स्रवति" इत्यादि श्रौतार्थवादलब्ध-साधारणोङ्कारपरा इति[1] न तद्विरोधः । सुधा तु "ओङ्कारश्चा-थशब्दश्च" इत्यादिस्मृतिप्रापिताऽसाधारणोङ्काराविषयेति बोध्यम् इति।

न च **"स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते"** इति श्रौतार्थ-वादबलेन प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोरोङ्कारस्योहः कार्य इत्यध्याहारापरपर्यायत्वोक्तिस्तस्य न स्यादिति वाच्यम् । तस्याः श्रौतार्थवादबललब्धसाधारणोङ्कारविषयत्वात् । अत एव प्राचीनकोशेषु "ओम् ओम् अथातो ब्रह्मजिज्ञासा" इति पाठः दृश्यते।

एवं च "विमत ओङ्कारः आद्यसूत्रावयवः माङ्गलिकत्वे सति [2]अदृष्टार्थत्वे सति सूत्रार्थान्वितत्वात् सौत्राथशब्दवत् । आद्यसूत्रा-नुसंहितत्वाच्चेत्यनुमानात्[3] ओङ्कारस्य सूत्रावयवत्वसिद्धिः । न चाप्रयोजको हेतुः । भाष्योदाहृतस्मृतिविरोधस्यैव विपक्षे बाध-कत्वात्। प्रथमसूत्रवाक्यार्थे ओतत्वादेरन्वयेन अवयवत्वनिश्चयाच्चेति सुधाविरोधाच्च नाप्रयोजकता ।" अत एव नोपाधिः । समव्या-प्त्यभावाच्च ।

न चोङ्कारस्य संहिततया निर्देशे, "असंहिततया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थः" इति सुधाविरोध इति वाच्यम् । तस्यापि

---

1. न तद्विरोध इति ग कोशे नास्ति
2. दृष्टत्वे सति. ख.
3. ओङ्कारस्येत्यारभ्य विपक्षे बाधकत्वात् इत्यन्तो भागः घ कोशे एवोपलभ्यते ।

साधारणोङ्कारविषयत्वात् ।

न च विमत ओङ्कारः न आद्यसूत्रावयवः लक्षणान्तराभावे सत्यसंहिततया सम्पाठे अखिलैः पठ्यमानत्वात् वेदोपक्रमोच्चार्यमाणोङ्कारवदिति सत्प्रतिपक्ष इति वाच्यम् । असंहिततया निर्दिष्टत्वस्योपाधित्वात् । आद्यसूत्रानन्वितत्वस्योपाधित्वाच्च । उक्तरीत्या ओङ्कारस्य संहिततया निर्देशेन विशेषणासिद्धेश्च । माङ्गलिकत्वावच्छिन्नसाध्यव्यापकत्वस्य द्वितीयोपाधौ विवक्षिततया न कर्तव्येति पदे साध्याव्यापकता शङ्क्या । कर्तव्येतिपदेऽध्याहृते व्यभिचारपरिहाराय माङ्गलिकत्वे सतीति। अदृष्टार्थत्वे सतीति । तु स्वरूपकथनार्थमिति द्रष्टव्यम् । तस्मादोङ्कारः सूत्रावयव इति स्थितम्।

इति श्रीविद्याधीशतीर्थविरचितः ओङ्कारवादः

समाप्तः

श्रीमध्वेशार्पणमस्तु । शुभम् ।

विघ्नेश्वरान्तर्गतश्रीभारतीरमणमुख्यप्राणान्तर्गत
श्रीरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ।

ता र स्व रू प प्र का शः

हुलगी श्रीनाथाचार्यविरचितः

(मङ्गलाशंसनम्)

श्रीमद्व्यासाङ्घ्रियुगलं रमाद्यैः शिरसा धृतम् ।
ज्ञानानन्दप्रदं वन्दे सर्वविघ्नोपशान्तये ।।१।।

श्रीमदानन्दतीर्थार्यान् भक्त्या नौमि निरन्तरम् ।
शिवाद्या अपि यद्भाष्यप्राप्तज्ञानाश्चकाशिरे ।।२।।

जयराजार्यतरणिर्मद्हृत्स्थध्वान्तनाशकः ।
भूयात् स्ववचसामर्थबोधं दिशतु सर्वदा ।।३।।

श्रीव्यासराजप्रमुखान् मुनीन् वन्दे सदोद्यतः ।
रघुनाथाभिधानांश्च नौमि मे परमान् गुरून् ।।४।।

मद्गुरूंश्च पितृंश्चापि वासुदेवाभिधान् वयम् ।
नत्वोङ्कार[1] स्याद्यसूत्रावयवत्वं विवृण्महे ।।५।।

अथोङ्कारस्याद्यसूत्रे अन्वयप्रतियोग्युपस्थापकत्वमदृष्टार्थत्वं चेत्युभय[2] विधमवयवत्वं, द्वितीयादिसूत्रेष्वदृष्टार्थत्वमात्रं, न तु

1. स्याथ - ख.
2. विधत्वं - ग.

(ओङ्कारस्य सूत्रावयत्वं नास्तीति पूर्वपक्षः)

श्रीसुधा- नन्वत्र सूत्रादावोङ्कार एव न विद्यते । तत्कथमुच्यते ताराथमूलत्वमिति। यद्यपि शिष्टैरध्येतृभिरुच्चार्यमाणोऽ -

---

तारस्वरूपप्रकाशः

वक्ष्यमाणव्याख्यानोपयोग्यन्वयप्रतियोग्युपस्थापकत्वं, शास्त्राध्येतृणां श्रुतितो मङ्गलसम्पादकत्वेन समस्तशास्त्राङ्गत्वमित्युक्तं सुधायाम् ।

(ओङ्कारस्य सूत्रावयवत्वप्रतिपादकसुधावाक्यार्थनिरूपणम्)

अत्र केनचिद् रामानुजीयेन सुधाशयाद्यज्ञानेन दूषणान्युत्प्रेक्षितानि। तन्निरासाय सौधफक्किकाशयस्तावन्निरूप्यते-**नन्वत्र सूत्रादाविति** । आदिसूत्रस्यादिभाग इत्यर्थः । प्रथमसूत्रत्वावच्छिन्नविषयकेच्छाधीना या आद्यसूत्रानुकूला कृतिस्तद्विषयताविशिष्टो यः स नेत्यर्थः । ओङ्कारपूर्वकं सूत्र[1]स्यापाठादिति हेतुः स्फुटः । **तदिति।** प्रथमसूत्रघटकतयोङ्कारस्य सूत्रकृता अनुक्तत्वादित्यर्थः।

ननु कैश्चित्तस्यापठितत्वं सूत्राघटकत्वे हेतुरुत सर्वैः । नाद्यः। कैश्चिदथशब्दाघटिततया भ्रान्त्या उच्चारणसम्भवेन तत्रोक्तहेतोर्व्यभिचारापत्तेः । न द्वितीयोऽसिद्धेरित्यभिप्रेत्य शङ्कते - **यद्यपीति।**

नन्वेवं तर्हि इदं पदमेतद्वाक्यघटकमिदं नेति व्यवस्था न[2] स्यात्। सर्ववाक्यानामपि कैश्चित्तदघटकपद[3]साहित्येन पाठसम्भवादित्यत उक्तं - **शिष्टैरिति** । अभ्रान्तैरित्यर्थः । तथा च प्रथमसूत्रोच्चारणेच्छावदभ्रान्तपुरुषसम्बन्ध्युच्चारणविषयत्वहेतु*र

---

1. स्य पाठादिति - ग.
2. न इति. क. कोशे नास्ति. 3. सामर्थ्येन. ग.

* र्नाऽसिद्ध इति पाठेन भाव्यमिति भाति ।

श्रीसुधा - ध्यक्षसिद्धः । तथापि नासौ सूत्रावयवः । लक्षणान्तराभावे सत्यसंहिततया सम्पाठेऽखिलैः पठ्यमानत्वात् । वेदाध्ययनोपक्रमेऽध्येतृभिरुच्चार्यमाणोङ्कारवत् ।

तारस्वरूपप्रकाशः

सिध्दः, इदानीन्तनोच्चारणेन पूर्वपूर्वतनशिष्टोच्चारण-रूपपरम्परामूलत्वेन सूत्रकारीयोच्चारणविषयत्वस्यैव सिद्ध्या तेनैवाथशब्दादिवत्सूत्रावयवत्वं सिद्ध्यतीति भावः । तादृशोच्चारण विषयत्वमङ्गीकृत्येदानीमभिमतस्यावयवत्वस्याभावं साधयति-तथापीति ।

'नायं सूत्रावयवः' इति क्वचित्पाठः । अत्र साध्यमानमनवयवत्वं तदघटकत्वं "वक्ष्यमाणन्यायेन" इत्युत्तरग्रन्थासङ्गतेः । तेन प्रथमसूत्रार्थे ओङ्कारार्थस्य [1]समन्वयकथनेनोक्तानुमानस्य बाधकथनात् । समन्वयेऽपि तद्विषयताव्यापकस्व[2]विषयताकत्वरूपतद्घटकत्वा-सिध्या बाधाप्रसक्तेः । अन्यथा 'तत्तु' इत्यस्य 'ईक्षतेः' इत्यादिसूत्रा-र्थसमन्वितार्थकत्वेन [3]तत्सूत्रघटकत्वापत्तेः । एवम् अथवा दृष्टान्तदूषणं इत्युत्तरग्रन्थासङ्गतिश्च ।[4]ओङ्कारार्थस्य वेदवाक्यार्थेऽनुसन्धानेऽपि वेदवाक्यघटकत्वाभावेन दृष्टान्ते साध्यवैकल्याप्रसक्तेः । किन्तु प्रथमसूत्रघटकपदार्थान्वितस्वार्थबोधजनकत्वेन[5]तत्पाठकेच्छारूप-तात्पर्यविषयत्वाभावरूपमेव । न चाद्यसूत्रानुकूलकृतिविषयत्वा-भावस्यैव पूर्वं प्रसक्तत्वात्तस्यैव साध्यतया तद्विहाय साध्यान्तरा-दरणेऽनाकाङ्क्षिताभिधानापत्तिरिति वाच्यम् । मङ्गलप्रयोज-

---

1. अत्र समन्वय शब्दः अन्वय इत्यर्थे प्रयुक्त इति भाति ।
2. स्वविषयत्व. ग.
3. तत्सूत्राघटक - क.
4. ओङ्कारस्य. ग.
5. तत्पाठेच्छा - ख.

श्रीसुधा - अन्यथा अथशब्दवत्संहिततया निर्दिश्येत ।

तारस्वरूपप्रकाशः

कत्वसहिते प्रथमसूत्रतात्पर्यविषयीभूतबोधोपयोग्यर्थतात्पर्यकत्वरूपे मूलत्व एवेदानीं मुख्यतो विवादस्य प्रसक्तत्वेनोक्तसाध्यस्यैवाकाङ्क्षि- P'`kkP~< ¢P .`kkIkIRYkKk`kdZkIP [1]'एवं चायमोङ्कार' इत्यादिना।

"सूत्रादौ न विद्यत" इत्यादिना सूत्रानुकूलकृतिविषयत्वाभावस्तु पौरुषेयतत्तद्वाक्यार्थोपयेगिपदानां तत्तद्वाक्यानुकूलकृतिविषयत्व- स्यैवोत्सर्गतो दृष्टतया तादृशौत्सर्गिक[2]व्यापकाभावस्तादृशपद- त्वरूपौत्सर्गिकव्याप्याभावसाधनाय शङ्कितः । इदानीं पुनरध्येतृ- परम्परसिद्धसूत्राकारीयोङ्कारोच्चारणबला[3] त्सूत्रानुकूलकृतिविषयत्वं वा तत्कृत्यतिरिक्तकृतिविषयत्वं वाऽस्तु । तावतैव प्रथमसूत्रार्थेऽन्वये बाधकाभाव इत्याशङ्कायां, तथात्वेऽपि प्रथम[4]सूत्रार्थान्वितार्थानु- भावकत्वमोङ्कारस्य न घटत एवेति ओङ्कारस्योक्तमूलत्वं न युज्यत इति वक्तुमुक्तविधावयवत्वाभावस्यैव साध्यत्वौचित्यम् । अत एव **सुधापरिमळे** अत्रत्यावयवपदं धृत्वा अन्वयप्रतियोग्युपस्थापक इति व्याख्यातम् ।

लक्षणान्तरेति । 'असंहिततया' इत्येतत् 'पठ्यमानत्वात्' इत्यने- नान्वेति । 'संपाठे' संहिताकार्यपूर्वकपाठ इत्यर्थः । '**लक्षणान्तर**' इति 'असंहितया' इत्येतत् 'पठ्यमानत्वात्' इत्यनेनान्वेति। 'सम्पाठे'

---

1. एवं चायमित्यादिवाक्यं. ग. कोशे नास्ति ।
2. व्याप्याशास. ख.
3. सूत्रानुकूलकृतिविषयत्वं वा इति. ग. कोशे नास्ति ।
4. त्रान्वितार्थ. ख.

श्रीसुधा - न च दृष्टान्तः साध्यविकलः । अध्ययनोपक्रमविरति-वैचित्र्येण तत्तत्स्थानपरित्यागेनान्यान्यस्थानेऽखिलैः पठ्यमानस्य वेदवाक्यानवयवतायाः सुप्रसिद्धत्वात् । अन्यथा अध्ययनो-पक्रमविरतिवैचित्र्येऽपि 'ओमितिब्रह्मे' त्यादिवत् नियतस्थानतया पाठप्रसङ्गात् । पक्षसपक्षयोरादावुच्चारणं तु प्राङ्मुखत्वादिवदध्य-यननियमान्तर्गतमध्येतृभिरनुष्ठीयत इत्यस्तु । एवं चायमोङ्कारः सूत्रकृता मङ्गलार्थतया सूत्रादावुपनिबद्ध इत्यनुपपन्नमित्यताह - सर्वत्रेति ।

तारस्वरूपप्रकाशः

संहिताकार्यपूर्वकपाठ इत्यर्थः। 'रामकृष्णावमू आसाते' 'इन्द्रवायू इमे सुताः' 'चक्षोः सूर्यो अजायत' इत्यादौ 'अमू वायू' इति पदे सूर्यादिपदे च व्यभिचारवारणाय लक्षणन्तर इति। संहिततयोच्चारणविषयत्वाभावग्राहक [1] प्रमाणाविषयत्वे सतीत्यर्थः। 'असंहिततया' इत्यस्य प्रकृतिभूतानुपूर्वीविजातीयानुपूर्वि[2]कत्वाभावव त्तयेत्यर्थः । तेनोक्तस्थलेष्वपि उच्चार्यमाणानुपूर्व्या अपि [3]संहिताधिकारीयसूत्रप्राप्तत्वेन संहितारूपत्वेन व्यभिचाराप्रसक्तेः 'लक्षणान्तर' इत्यस्य वैयर्थ्यमिति शङ्कानवकाशः । पदकाल असंहि-ततया[4] पठ्यमानाग्न्यादिपदेषु व्यभिचारवारणाय 'सम्पाठे' इति। ब्रह्मसूत्रपाठकाले जिज्ञासान्वितकर्तव्यताबोधककर्तव्यादिपदे कदाचिदसंहिततया पठ्यमाने व्यभिचारवारणाय 'अखिलैः' इति ।

<u>ननु यथाकथञ्चिदखिलैः पठ्यमानत्वं कर्तव्यादिपदेष्वप्यस्तीति</u>

---

1. प्रामाण्यविषयत्वे. क. ग.
2. कत्वाभाव इति. ग कोशे अस्ति । क कोशे तु नास्ति ।
3. संहिताकरणसूत्र - ग.
4. पठ्यमानपदेषु. क.

व्यभिचारवारणमक्षमम् । [1] निरुपचरिताखिलपठ्यमानत्वं तु ओङ्कारेऽपि नास्तीत्यसिद्धिरिति चेन्न । सूत्रार्थानुसन्धानपूर्वकं संहिता-कार्ययुक्तसूत्रपारायणकाले अभ्रान्तपुरुषैर्नियमेन असंहिततया पठ्य-मानत्वादिति हेतोर्विवक्षितत्वेन कर्तव्यादिपदेषु व्यभिचाराभावात्।

हेतोरप्रयोजकतां परिहरति - **अन्यथेति** । प्रथमसूत्रार्थान्वित-स्वार्थबोधकत्व[2]स्योंङ्कारेऽङ्गीकारे तद्घटकाथादिपदानां संहिततया निर्देशकाले अस्यैवासंहिततया निर्देशे किञ्चिद्बीजं वक्तव्यम् । निर्बीजकार्यायोगात् । बीजं च लक्षणान्तराणि वा, संहिता न भवतीति भ्रान्तिर्वा, प्रकृतसूत्रतात्पर्यविषयीभूतबोधोपयोग्याकाङ्क्षा-शून्यत्वं वा वक्तव्यम् । तत्रोक्तहेतुसत्वे आद्यद्वयं न घटते । अतस्तृतीयमेव नियामकं वक्तव्यमित्युक्तसाध्यं विनोक्तहेतोरनु-पपत्तेर्नाप्रयोजकत्वमिति भावः । **वेदवाक्यानवयवतायाः** ।[3] वेदवाक्य तात्पर्यविषयीभूतबोधविषयपदार्थान्वितस्वार्थबोधकतायाः। **नियतस्थानतयेति** । अन्यथा तद्वाक्यस्य स्वतात्पर्यविषयीभूत-बोधानुकूलो[4]ङ्काराघटितत्वेन न्यूनतापत्तेः । पूर्वपक्षमुपसंहरति - **एवं चेति** ।

अयं पूर्वपक्षी आद्यसूत्रपूर्वभागे असंहिततयोङ्कारोच्चारणं नियमेनाङ्गीकृत्यैव प्रवृत्तः । अन्यथा तस्योक्तहेतोरसिद्धिप्रसङ्गात्।[5] सूत्राद्यभागे ओङ्कारसत्वे बहुशिष्टपाठाधीनमस्मदादीनामबाधित-मोङ्कारप्रत्यक्षं साधकम् ।[6] अनभिज्ञानामोङ्कारपाठा -

1. निरूपचित. ग.
2. स्याकरे. क.
3. वेदतात्पर्य. ख.
4. ङ्कारघटि. क.
5. सूत्राद्यभागे इति ग. कोशे नास्ति.
6. अभिज्ञा. ख.

तारस्वरूपप्रकाशः

भावस्याज्ञानमूलकत्वोपपत्या उक्तप्रेक्षावत्पाठाधीनप्रत्यक्षबाधकत्वा-योगात् । इदानीन्तनाभ्रान्तपुरुषीयास्वतन्त्रपाठस्य पूर्वपूर्व-पाठमूलत्वानुमानेनाद्यसूत्रपूर्वभागे असंहिततया पठ्यमानोङ्कारसिद्धिः पूर्वपक्षिणः । परं तु[1] तादृशोङ्कारार्थस्य प्रथमसूत्रार्थे प्रवेशे सूत्रकृतस्तात्पर्याभावमात्रमुक्तहेतुना साधयति । सिध्दान्तग्रन्थेऽपि असंहितत्वेन ओङ्कारघटित एव पाठः । सन्न्यायरत्नावल्यां "ओम् अथातो ब्रह्मजिज्ञासा" इति पाठस्य लिखितत्वात् । असंहिततया निर्देशे पूर्वोक्तबीजत्रयातिरिक्तमन्यदेव बीजं निरूप्य हेतुराभासी-करिष्यते । न तु पूर्वभागेऽप्योङ्कारः साध्यते । तस्य पूर्वपक्षिणोऽपि सिद्धत्वादन्यथा उक्तपूर्वपक्षोत्थानानुपत्तेः ।

(प्रणवदर्पणानुवादः)

अत्र केनचिद् रामानुजीयेन प्रलपितम् - ' इह केचिदोङ्कारस्य सूत्रावयवतां कल्पयन्ति । तन्न ।

'अप्रमाणतयाऽ[2]स्यत्र यस्योच्चारममेव न ।
तस्यावयवता तत्र शशशृङ्गार्जवोपमा।।

ब्रह्मसूत्राद्यन्तयोरोङ्कारोच्चारणे यदि किञ्चित् प्रमाणमुपलभेमहि तदा तस्यावयवत्वं कथञ्चित्कल्पयेमहि । यदा तदुच्चारणमेवाप्रामाणिकं तदा तस्यावयवत्वकल्पनं शशशृङ्गार्जववदपहासास्पदमेव । तथाहि-

'प्रत्यक्षं वा अनुमानं वा नादृष्टार्थे प्रवर्तते
श्रुतिस्त्वनन्यथासिद्धा न दृश्यत - - - - - - - - ।।'
इत्यादि ।

1. तादशोङ्कारस्य. ग.
2. यस्य यत्रोच्चारणमेव. क.

तारस्वरूपप्रकाशः

(प्रणवदर्पणाशयनिराकरणम्)

तन्मूर्खप्रलापत्वादुपेक्षणीयम् । सुधायामेव 'यद्यपि' इत्यादिना साम्प्रदायिकपाठानुरोधेन [1] आद्यसूत्रपूर्वभागे ओङ्कारस्य सत्वे प्रत्यक्षानुमानयोर्दर्शितत्वस्योक्तत्वात् । भवदभिमतोङ्कारसहित-सूत्रपाठो नास्मत्सम्मतो भ्रान्तिमूल इति चेन्न । तादृशापाठऽस्या-भ्रान्तिमूलत्वं सम्प्रदायपरम्परागतत्वमभ्युपेत्य असंहिततया निर्देशमात्रमवलम्ब्य[3] प्रथमसूत्रावयवत्वे विवदमानं शिष्यं बोधयितु-मेतद् ग्रन्थस्य प्रवृत्तत्वेन त्वदसम्मतेरकिञ्चित्करत्वेनोक्तग्रन्थस्या-दुष्टत्वात् । अन्यथा बहुषु स्थलेषु आवयोः पाठभेदस्य सत्वात्तथा अस्मन्मते अद्वैतिमतेऽप्यसम्मतयोरेव "प्रतिज्ञाविरोधाच्च" "अत एव खं ब्रह्म" इति सूत्रयो[4]रीक्षत्यन्तराधिकरणयोः क्रमात्पठित्वा भवद्भाष्ये व्याख्यानाद् भवद्भाष्यकारादीनामप्रेक्षावत्वप्रसङ्गात् ।

तथापि[5] त्वत्सम्प्रदायमुल्लङ्घ्यादौ ओङ्कारसत्वे किं मानमिति मया पृष्टे तव किमुत्तरमिति चेत्, [6]त्वत्सम्प्रदायमुल्लङ्घ्य त्व-दीयसूत्रपाठविषये किं मानमिति मया पृष्टे[7] यथा यथा भवतोच्यते, तथा तथैव मयाप्युच्यत इति न किञ्चिदेतत् ।

ननु स्वपाठमात्रे निर्भरेण सुधाप्रवृत्तौ "स्रवति" इत्यादिग्रन्थे-नोङ्कारस्यादौ सत्वसाधनमनुपयुक्तं स्यात् । अन्यथा अथादिपदानामपि

1. आद्यसूत्रपूर्वभागे. इति. ग. कोशे नास्ति ।
2. स्थ भ्रान्तिमूलत्वं. ग.
3. प्रथमसूत्रानवयवत्वे. क.
4. रीक्षत्यराधि. क.
5. मत्सम्प्रदायेति पाठेन भाव्यमिति भाति
6. मत्सम्प्रदायेति पाठेन भाव्यमिति भाति
7. 'यथा' 'तथा' इत्येकवारमेवास्मिन् वाक्ये ग. कोशे लिखितम्

तारस्वरूपप्रकाशः

सूत्रे [1] सत्वसाधनस्य कर्तव्यतापात इति चेन्न । ओङ्कारस्य सूत्रादिभागे स्थितिमङ्गीकृत्यैवा[2]संहिततया निर्देशगतिमात्रप्रदर्शनपरतयाऽनुपदमेव तद्ग्रन्थस्य व्याख्यास्यमानत्वेन तद्ग्रन्थस्य भवदुक्ताभिप्रायकत्वाप्रतीतेः ।

(प्रणवदर्पणोक्ताशयनिराकरणम्)

यत्त्वत्राशङ्क्योक्तं - वेदोच्चारणपूर्वकाले ओङ्कारोच्चारणं दृश्यत इति चेत्, किञ्चातः, **"यो वेदादौ स्वरः प्रोक्तः"** इति श्रुत्या वेदोच्चारणस्यैवोङ्कारोच्चारणव्याप्यत्वावगमात्" इति ।

तत्तुच्छम् । **"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।।"** इति पठ्यमानतैत्तिरीयपूर्वापरवाक्येषु ओङ्कारस्याप्रसक्तत्वेन स्वरपदस्याकारदिस्वरवाचकस्याक्षरत्रय [3] समाहारात्मकोङ्कारवाचकत्वाभावेनोङ्कारोच्चारणविधायकलिङ्गाद्यभावेन चोक्तवाक्येन भवदभिमतासिद्धेः । एतदन्यस्य कस्यचिद्वाक्यस्य सत्वे प्रकृतोपयोगिनं तद्वाक्यघटकभागं[4] विहायानुपयुक्तैतद्वाक्यघटकभागस्यैव बहुशः त्वयोदाहृतत्वेन त्वन्मौर्ख्यस्य स्फुटत्वात् । वाक्यान्तरेण वेदादौ नियमेन प्रणवोच्चारणसिद्धावपि अस्मदभिमतस्य वक्ष्यमाणन्यायेनासिद्धेश्च । यथा कथञ्चित्त्वया तैत्तिरीयवाक्यस्य त्वदभिमतार्थपरतया योजनायां मयाऽपि -

---

1. सद्यस्साधन. क.
2. व संहिततया. ग.
3. समाहोरति ग. कोशे नास्ति.
4. भागे रांविहाय. ख.

तारस्वरूपप्रकाशः

"सर्वस्य प्रणवो ह्यादिर्मध्यमऽन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।।" (मां. 4.5.)

इति[1]माण्डूकश्रुत्या ओङ्कारस्य सूत्राद्यन्तयोरवान्तरसूत्ररूपमध्यभागे चोच्चारणानुसन्धानादेरुपपा[2]दयितुं शक्यत्वाच्च ।

अत्र 'ज्ञात्वा' इत्यनेनैवोत्तरकाललाभेन 'तदनन्तरं' इत्यस्य वैयर्थ्य-परिहाराय तथानुष्ठायेत्यर्थत्वात् । सर्वपदस्य 'व्यश्नुते' इति फल-वाक्यसन्निधानबला[3] ददृष्टादिफलजनकत्वयोग्यसर्वार्थकत्वस्यैव [4]योग्यताबलेन निश्चयसम्भवात् 'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा', 'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादिवाक्यस्थसर्वपदवत् ।

न चेदं वाक्यं परमात्मनः जगदुदयादि[5]कारणत्वपरं पूर्वापर-वाक्यसन्दर्भावगतं कथमुक्तार्थपरं स्यादिति वाच्यम् । पूर्वग्रन्थस्य[6] प्रणवघटकाकारादिवर्णप्रतिपाद्यरूपमाहात्म्यपरस्य तादृशाष्टाक्षर-माहात्म्यप्रतिपादनेऽपि तात्पर्यावगमेन "ओमित्येतदक्षरमिदं सर्वं" इति तस्यैवोपक्रमाच्च विशिष्टप्रणवप्रतिपाद्यमाहात्म्यकथनपूर्वकं तादृशप्रणवस्योक्तमाहात्म्येऽपि तात्पर्यस्योक्तवाक्ये युक्तत्वात्।

न चैकवाक्यस्यार्थद्वयमसम्भावितमिति वाच्यम् । ऐतरेयो-पनिषद्यन्यसूक्तगतत्वे[7]नान्यपरत्वेनाभिमतानामपि मन्त्राणामत्र स्वोक्तार्थे सम्मतित्वेन 'तदुक्तमृषिणा' इत्यादिना बहुस्थलेषूदा-

---

1. माण्डूवृत्या. क.
2. दयितुमशक्य. क.
3. ददृष्ट. क.
4. योग्यताबलेन इति ग कोशे नोपलभ्यते
5. निमित्तकारणत्व. क.
6. प्रणवघटिताका. ग.
7. त्वपरत्वेना. ख.

श्रीसुधा - अखिलैः सूत्रपाठकैः यत् पृथगसंहिततयोङ्क्रियते, तत् सर्वसूत्रेष्वनुगतत्वेनाभिलषितेन निमित्तेनोपपद्यते ।

(प्रतिसूत्रमोङ्कारोऽध्याहार्यः)

एतदुक्तं भवति - सर्वाणि हि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरब्रह्मविद्याः ।

तारस्वरूपप्रकाशः

हृतत्वात्। **"चत्वारि शृङ्गा"** इति [1] मन्त्रस्याग्निध्यानादौ याज्ञिकै[2]र्विनियुक्तस्याग्निपरत्वेऽपि व्याकरणशास्त्रमाहात्म्यपरतया महाभाष्यकृता योजितत्वाच्च । तस्मादुक्तवैषम्यकल्पनमयुक्तमेव।

ननु सूत्रार्थानन्वितत्वे ओङ्कारस्यासंहिततयाऽपि नियमेन निर्देशो निरर्थकः । कुत इत्यत आह - **पक्षसपक्षयोरिति**। सपक्षग्रहणं दृष्टान्तार्थम् । **अध्ययननियमान्तर्गतमिति**। अध्ययननिष्ठस्तत्कर्मसाध्यफलोपयोगी योऽतिशयस्तन्निर्वाहकमित्यर्थः। **अध्येतृभिरिति** । ब्रह्मसूत्रपाठकैरखिलैरित्यर्थः । **अभिलषितेन निमित्तेनेति** । **'अध्ययनेन वसति'** इतिवत् फलरूपहेताविवियं तृतीयेति भावः ।

ननु प्रथमसूत्र एव तस्यावयवत्वाभावे सर्वसूत्रेष्वनुगतिः कथं सिद्ध्यति, अत्यन्तव्यवहितत्वात् अनुगतत्वाभि[3]लाषस्यापि [4]निरर्थकत्वमेव ।

किञ्चोक्तानुमाने जागरूके सत्येतादृशोक्तिसहस्रैरपि कथमोङ्कारस्यावयवता सिद्ध्यतीत्यत आह - **एतदुक्तं भवतीति** ।

---

1. मन्त्रस्याग्नि. क. 2. युक्तविनियुक्त. ख.
3. लापस्यापि. ख. 4. निरर्थकमेव. ख.

तारस्वरूपप्रकाशः

सर्वसूत्रेष्वोङ्कारोहस्यावश्यकत्वे खलु तज्ज्ञापकतयोक्तहेतोरन्यथा-सिद्धिर्वक्ष्यमाणा घटेताऽपि । स एव कुत इत्यतः पीठमारचयति - **सर्वाणि हीति** । प्रत्येकमवान्तरा ब्रह्मविद्या इत्यर्थः । समस्त-शास्त्ररूपमहाब्रह्मविद्यान्तर्गतप्रकरणविशेषा इति यावत् ।

ननु "औपनिषदः पुरुषः" "नावेदविन्मनुते" इत्यादिवचनबलेन ब्रह्मणो[1] वेदैकवेद्यत्वात् कथमेतेषां ब्रह्मवेदनकरणत्वरूपं ब्रह्मविद्या-त्वमित्यताह - **अनेकवेदविचारपरत्वादिति** । एकस्मिन्नेव वाक्ये उपक्रमादिलिङ्गसमुदायानुसन्धानश्रमायोगेन सूत्रारम्भस्य निष्प्रयोजनतापरिहाराय **अनेकेति** । अनेकाशाखार्थनिर्णयस्तु न सूत्रोक्तन्यायानुसन्धानं विना[2] घटत इति तत्तन्निर्णायकतयाऽवान्तर-प्रकरणात्मकत्वमधिकरणानां तदन्तर्गततया तद्गुणसूत्राणामपि ब्रह्मविद्यात्वमिति भावः । हि शब्देन "सारवद् विश्वतोमुखं" इत्यादिप्रमाणप्रसिद्धिं' द्योतयति ।

अस्तु ततः किमित्यत्राह - **स्रवतीति** । गीतातात्पर्ये सप्तदशाध्याय इयं श्रुतिरुदाहृता । श्रौतः' श्रुत्युक्त निन्दारूपो योऽर्थवादस्तत्सिद्धविधिरूपप्रमाणादित्यर्थः । 'ब्रह्म' मन्त्रादिरूपो वेदः । 'अनोङ्कृतं' आदौ ओङ्कारोच्चारणा[3]नुसन्धानपूर्वकत्वरहितम् । योग्यतया पाठजपादिकाले प्रयुक्तमिति लभ्यते । 'परस्तात्' इत्यनुक्तसमुच्चायकचशब्देन[4] वा चशब्दस्य विशेषरूपार्थकत्वे चरमभागेऽनुच्चारणे विशेषस्य प्रथमभागानुच्चारणावधिकस्य [5]प्रथमं

1. वेदैकत्वात्. क.
2. यत इति. ख.
3. रणरूपानु. क.
4. वाचकशब्दस्य. ख.
5. प्रथमसंबुद्धया - ख.

तारस्वरूपप्रकाशः

बुध्यारूढस्य निरपवादस्य परित्यागानर्हतया वा आदाविति लभ्यते। 'स्रवति' आमघटनिक्षिप्तजलवत्स्रवति अपूर्वजनकं न भवति । 'परस्तात्' अन्त्यभागे । 'अनोङ्कृतं' ओङ्कारानुसंन्धानरहितम् । 'विशीर्यते' [1] हिंस्यते । उत्पन्नापूर्वविघातादिना फलनिष्पादकं न भवतीत्यर्थः ।

यद्यपि "ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते" इति शिक्षावचनं विधिरूपमपि भवति । इत्थं च सामर्थ्याद्विधिकल्पनोक्तिरयुक्तेति भाति । तथापि शिक्षावचनमपि न मूलप्रमाणं विनाऽर्थसाधकं भवतीति तस्यापि मूलभूतोक्तश्रुतिरेवादरणीया । तस्यां विधिर्नास्ति । शिक्षाकृताऽपि तादृशार्थवादसामर्थ्यदिवार्थवादसहितस्फुटविधिवाक्यं कल्पितमित्याशयेन [2]श्रौतार्थवादसामर्थ्यात् इत्युक्तम् ।

यद्वा शिक्षावाक्ये तन्मूलश्रुतिवाक्ये च ब्रह्म इत्युक्त्वा ब्रह्मशब्दस्य "ब्रह्म तत्वं तपो वेदः" इत्यभिधानेन वेदपरत्वाद् वेदस्याद्यन्तयोरोङ्कारोच्चारणसिद्धावपि सूत्रस्य किमायातमित्याशङ्क्य 'श्रौतार्थवादसामर्थ्यात्" इत्युक्तम् । 'श्रौतः' श्रुतिविषयकत्वरूपश्रुतिसम्बन्धी योऽर्थवादस्तत्सामर्थ्यात् [3]तद्बलायत्तार्थापत्त्या श्रुतेः पूर्वं परतश्चोङ्कारस्यावश्यकतयोच्चारणसिद्ध्यैव सूत्राद्यन्तयोरोङ्कारोहसिद्धिरिति यावत्। कथमेतत् ? व्यधिकरणत्वादिव्याशङ्कापरिहारार्थं

1. हिंस्यत इति ख.ग. कोशेषु नास्ति ।
2. श्रौतवाद. क.
3. तद्वलायथार्थपत्य. ख.

तारस्वरूपप्रकाशः

तदुपपादनार्थं पूर्वं 'सर्वाणि'[1] सूत्राणि इत्यारभ्य 'ब्रह्मविद्याः' इत्यन्तमुक्त्वा अत्र ब्रह्मविद्यास्वाद्यन्तयोरूहः कर्तव्य इत्युक्तं, न तु सूत्रेष्विति । [2]तेनायमाशय उन्नीयते -

तथा हि - 'स्रवति' इति श्रुतिप्राप्तशिक्षारूपविधिवाक्ये "ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा" इत्युक्तम् । तत्र मुख्यसर्वकालविवक्षणे कैरपि सर्वदोङ्कारो[3]च्चारणकरणस्य कर्तुमशक्यत्वेनाशक्यार्थे विधेरसम्भव इति, अमुख्यार्थे वक्तव्ये पारायणकालमात्रग्रहणे तस्य "स्रवत्यनोङ्कृतं" इत्यनेनैव लाभादेकमात्रबोधकसर्वपदादर्शनादमुख्यसर्वपरत्वं वक्तव्यम्॥ तत्र सर्वस्मिन्नपि पारायणकाल इति नार्थः, [4]कस्मिंश्चित्पारायणकाल ओङ्कारोच्चारणं न कर्तव्यं कस्मिंश्चित्कर्तव्यमिति निर्बीजशङ्काया अनुत्थानात् तद्वारणाय सर्वपारायणकालार्थकत्वायोगात् । किन्तु पारायणकालमात्रस्य वारणाय मननप्रवचनादिकालार्थकम् । तथा च पारायणकाले तदर्थमननकाले तत्प्रवचनकाले चोङ्कारोच्चारणं कर्तव्यमिति लभ्यते।

तथा च प्रत्यधिकरणमनेकवेदोच्चारणपूर्वकमनुसन्धानपूर्वकं वाऽनेकवेदार्थस्य विचारपूर्वकमनेकवेदार्थज्ञानहेतुत्वात् तत्प्रवचनं वेदार्थप्रवचनरूपम् । तच्च स्वयमेव सूत्रार्थानुसन्धाने स्वात्मानं प्रति [5]प्रवचनरूपं च, युक्त्यनुसन्धानेन तदर्थस्थिरीकरणात् ।अन्यं प्रति प्रवचनमप्येवमेव तदुक्तं -

---

1. सूत्राणि, इति क.ग. कोशेपु नास्ति ।
2. केनायमाशयमाशय. ख.
3. च्चारणाकारणास्य. ख.
4. कस्यचित्पा. क.
5. प्रवचनरूपं चेति क. कोशे नास्ति ।

तारस्वरूपप्रकाशः

"मन्त्रो मन्त्रार्थवचनमन्यस्य स्वात्मनोऽपिवा । सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ[1] **हि तौ"** (तै.भा. 1.21.) इति स्वात्मानं प्रति प्रवचनमेव पारायणमित्युच्यते । निरर्थकपाठस्य [2]प्रत्यवायहेतुत्वेन तदर्थानुसन्धानपूर्वमेव कर्तव्यत्वात् । निरर्थकपाठादेः प्रत्यवायहेतुत्वं च **"वेदवादरताः पार्थ"** इति गीताव्याख्यावसरे उदाहृतेन-

"वादो विवादः सम्प्रोक्तो वादो वचनमेव च ।
वेदोक्तविष्णुमाहात्म्यविवादात् पठनादपि ।
अथवा निरर्थकात् पाठाद्वेदवादी स उच्यते ।
वेदवादरतो न स्यात् न पाखण्डी न हैतुकी" ।(गी.ता.२.४४)

इत्यादिप्रमाणेन सिद्धम् ।

एवं च सूत्रपारायणं तद्भाष्यादिप्रवचनं च वेदप्रवचनरूपमेवेति शान्तिपाठादेरावश्यकत्ववत् ओङ्कारोच्चारणस्यानुसन्धानस्याव[3]श्यकत्वमेव । अन्यथा त्वद्भाष्यादिप्रवचनकाले शान्तिपाठादेर्निर्मूलत्वमेव स्यात् । त्वद्भाष्यादिप्रवचनकाले [4]शान्तिपठने विशिष्य प्रमाणस्य वक्तव्यतापातात् ।

(*ओङ्कारस्य शान्तिपाठवत् सूत्रबहिर्भूतत्वशङ्कापरिहारौ*)

न चैवमोङ्कारः [5]शान्तिवद् बहिर्भूतः स्यादिति शङ्क्यम् । **'स्रवत्यनोङ्कृतं'** इत्यर्थवादवाक्ये[6]न ओङ्कारसाहित्यासाहित्याभ्यां ब्रह्मण

---

1. यतः इति. ग.
2. प्रत्यवायाहतत्वे. क.
3. स्यावाचकत्व ख.
4. शान्तिपाठने. क.
5. शान्तिवदबहिर्भूत. ग.
6. प्राशस्त्येन. क.

तारस्वरूपप्रकाशः

एव फलजनकत्वफलाजनकत्वरूपातिशयलाभेन तद्वाक्यसम- भिव्याहृत[1]त्वेन तद्वाक्यसाध्यफलोपकारकत्वरूपतदवयवत्वस्यैव सिद्धेः ॥ 'अनोङ्कृतमासुरं कर्म' (गी.ता.१७.२३) इति वाक्यशेषे ब्रह्मण एव फलाजनकत्वादिरूपासुरत्वोक्तेश्च । अत एव 'ओमिति ब्रह्मणः प्रवक्ष्यन्नाह' 'ओमिति शस्त्राणि शंसन्ति' (तै.उ. १) इत्यादिका श्रुतिः,

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।
तस्मादोमित्युदाहृत्य यज्ञदानादिकाः क्रियाः ।
प्रवर्तन्ते विधानोक्तास्सततं ब्रह्मवादिनाम्' (भ.गी.17.23)

इत्यादिका स्मृतिः । प्रकृतोङ्कारस्य सूत्रादावुच्चारणसाधिकायां श्रुतौ "ब्रह्मणः प्रवक्ष्यन्नाह" इत्यादिपुराकल्परूपार्थवादकल्प्यविधिना वेदप्रवचनपूर्वकाले ओङ्कारोच्चारणसिद्ध्या उक्तरीत्या सूत्रपारायणतत्प्रवचनकालेऽप्योङ्कारोच्चारणस्यावश्यकत्वसिद्धेः । स्मृतौ च "यज्ञदानादिकाः क्रियाः" इत्यत्रादिपदेन [2]यज्ञपदेन वा वाग्यज्ञरूपसूत्रपारायणादेर्ग्राह्यताया अवर्जनीयत्वात् ।

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।
स्वाध्यायज्ञानयज्ञाश्च" (भ.गी. 4.28)

इत्यत्र स्वाध्यायज्ञान[3]यज्ञशब्देन प्रवचनस्यापि यज्ञत्वोक्तेः। एवं पूर्वं [4]कांश्चिद्यज्ञानुक्त्वा "एवं बहुविधा यज्ञा वितता ब्रह्मणो [5]मुखे "इत्युक्तत्वेन भगवत्प्रीतिसाधनव्यापारत्वेन बहूनां यज्ञत्वोक्तेः।

1. व्याहृतेन ग.
2. यज्ञपदेन वा इति ग. कोशे नास्ति.
3. ज्ञानशब्देन. क.
4. कांश्चिद्ययाज्ञा. क.
5. युगे. ग.

तारस्वरूपप्रकाशः

स्वाध्यायप्रवचनयोश्च "**ऋतं च स्वाध्यायप्रवचने च**" (तै.उ.१.) इत्यादिबहुप्रशंसया तस्यातिशयेन भगवत्प्रीतिहेतुत्वावगमात् । प्रवचनस्यापि यज्ञत्वात्। गीतोक्तयज्ञपदस्यादिपदस्य वा संकोचे बीजाभावेन "**विधानोक्ता**" इत्युत्तरवाक्येन विध्युक्तत्वेन, समस्त[1] सत्कर्मग्रहणेन च तद्बलेनाप्युक्तरीत्या सूत्रादावुच्चारणसिद्धेः । तदनुदाहरणं किमर्थमिति तु न शङ्क्यम् । उक्तरीत्या सूत्रादाववान्तरब्रह्मविद्यात्वेन प्रत्यधिकरणादिपूर्वं च तदुच्चारणसिद्धावपि तस्याध्ययननिय[2]मान्तर्गततयाऽपि संभवेन पूर्वोक्तावय[3]वतया तत्सिद्ध्यभावात् ।

नन्वमध्ययननियमान्तर्गतस्यापि तत्पारायणादिप्राप्यपुण्योपयोगित्वं वक्तव्यमेव, अन्यथाऽध्ययननियमे तन्निवेशानर्थक्यापत्तेः। अतस्तद्वाक्य[4]साध्यफलोपकारकत्वं प्राप्तमेवेति रिक्तमेवेदं वचनमिति चेन्न ; यतोऽस्त्यत्र विशेषः फलप्रयोजकीभूतः पारायणादिकर्तृनिष्ठोऽतिशयः पठ्यमानवाक्यनिष्ठस्तद्भिन्नोऽतिशयश्च पृथगेव। द्वौ परस्परं [5]सहितावेव फलोपयोगिनौ । स्नानतिलकप्राङ्मुखत्वादिरहितेन साङ्गमन्त्रपारायणेऽपि फलासिद्धेः कर्तृवृत्त्यतिशयस्य प्रयोजकत्वम् । एवं कालदेशवृत्यतिशयावप्यनुसन्धेयौ । कविना केनचित्प्रणीतस्य मन्त्रसमानार्थकवाक्यस्य प्राङ्मुखत्वादिनियमपूर्वकं पठनेऽपि फलासिद्ध्या वाक्यनिष्ठातिशयोऽप्यपेक्षितः । अत उक्तवैषम्योक्ति[6]र्युक्तैव ।

---

1. ततकर्म. ख.
2. मानन्तर्ग. क.
3. वताया. क. ग.
4. साधनफलो - ख
5. सहितावेव इति क कोशे नास्ति
6. क्तिरयु. क.

तारस्वरूपप्रकाशः

"अनोङ्कृतं ह्यासुरं स्या[1]द् यत् तस्मादोङ्कृतं त्वपि।
[2]ओङ्कारार्थहरेस्सम्यगज्ञानादासुरं भवेत्" इति (गी.ता.१७.७)

"अनर्थज्ञोदितो मन्त्रो निरर्थस्त्राति मानतः ।
यन्मन्त्रस्तेन कथितो मन्त्रार्थो ज्ञेय एव तत् ।"

इत्यादिरूपया गीतातात्पर्योदाहृतस्मृत्या, (गी.ता.१७.२३) **"यो ह वा अविदितार्ष[3]च्छन्दोदैवतब्राह्मणेन"** इत्यादिश्रुत्या च अर्थज्ञानरहितस्य निन्दितत्वेन [4]तस्य हेतुतया कथनस्यैवोचितत्वाच्च। तथा चार्थवादवाक्ये वेदस्य ब्रह्माधिगतिहेतुत्वरूपब्रह्मविद्यात्वेनैव विशिष्टफलनिर्वाहकत्वस्याभिप्रेतत्वात्तात्पर्यवशात् श्रुतिस्थब्रह्मपदं वेदवाचकमपि फलजनकत्वेन श्रूयमाणब्रह्मज्ञान[5]संपादकवाक्यसामान्यस्य ब्रह्मविद्यात्वेनोपलक्षण- मवश्यं वाच्यम् । उक्तरीत्या न्यायसिद्धत्वाद् बाधकाभावाच्च । [6]मुख्यार्थान्वयानुपपत्तेरेव लक्षणाबीजत्वे काकच्छ्यत्र्यादिपदाना मजहल्लक्षणोच्छेदापत्तेः । "व्रीहीनवहन्ति" इत्यत्र नीवारेष्ववघातस्य चोदकप्राप्तत्वसिद्धये व्रीहिपदस्य पुरोडाशीयद्रव्यत्वावच्छिन्नलक्षकताया मीमांसकसिद्धाया अभावापाताच्च । न हि तत्र व्रीहिरूपमुख्यार्थान्वये किञ्चिद् बाधकमस्ति । 'यो यस्य सुतस्स तदीयं[7]धनमाददीत' **"येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ।"** इत्यादौ [8]सुतादिशब्दानां तच्छब्दमुख्यार्थभूतौरसपुत्राद्यन्वये बाधकाभावेन मुख्यामुख्यसुतसाधारणरूपावच्छिन्नपरताया असिद्ध्या

---

1. यस्तस्मा. ख.
2. ओङ्कारार्थे. क.
3. र्षः च्छन्दो क.
4. कस्य. ग.
5. संग्राहक. क.
6. मुख्यार्थानुपपत्तेरेव. क.
7. धनमाददीयं ख.
8. सूतादि

तारस्वरूपप्रकाशः

पालितामुख्यसुतानां तत्तद्वाक्योक्त[1]धनकर्माद्यसिद्ध्यापत्तेः ।

एवं परमते "**अहं ब्रह्मास्मि**" "**तत्वमसि**" इत्यादिषु 'त्वं' 'अहम्' इत्यादिपदानां सम्बोध्यत्वोच्चारयितृत्वादिना मुख्यार्थभूत-श्वेतकेतुवामदेवादिमात्रपरत्वेनेतरोपलक्षकत्वाप्रसक्त्या समस्त-जीवाभेदे प्रमाणतयोपन्यासायोगापत्तेः । तव तत्रार्थान्तरकथनार्थं प्रवृत्त्यभावापाताच्च ।

न च "**व्रीहीनवहन्ति**" इत्यादिषु पूर्वतनशिष्टाचारमीमांस-कोक्तन्यायानुसारेण लक्षणा, "**तत्वमसि**" इत्यादौ न्यायसाम्य[2]मेवेति वाच्यम् । अत्रापि न्यायसाम्यस्यानुपदमुपपादितत्वात् । शिष्टाचारस्य "**सततं ब्रह्मवादिनाम्**" इत्युदाहृतगीतोक्तस्य सत्वाच्च । ओङ्कारोच्चारणपूर्वकतया पाठकानां' शिष्टत्वं नास्माकं सम्मतमिति चेत्, नीवारादिष्ववघातादिकर्तृणां शिष्टत्वं नास्माकं सम्मतमिति पूर्ववाक्यस्थलेष्वनुपपत्तिर्दुर्वारा ।

ननु [3]प्रबलबाधकप्रमाणं विना तादृशाचारादेर्भ्रममूलकत्व-कल्पनमयुक्तमिति चेन्न, प्रकृतेऽपि पूर्वोपपादितरीत्या न्यायप्राप्तत्वेन ब्रह्मसूत्रे पूर्वकाले ओङ्कारोच्चारणं न कार्यमिति प्रमाणाभावेन [4]चोक्त विशिष्टोच्चारणस्यापि भ्रान्तिमूलकत्वकल्पनस्य प्रद्वेषमात्रमूलत्वात् ।

किञ्च "स्रवति" इति वाक्यस्थब्रह्मपदं वेदमात्रपरं यदि स्यात्पदक्रमपारायणकाले भवदभिमतशिष्टानामेव ओङ्कारोच्चारणकाले

---

1. धनिक. ख.
2. साम्येनैति. ग.
3. प्रबलप्रमाणं. ग.
4. चोक्तविशिष्योच्चा. ग.

भवदभिमतशिष्टानामेव ओङ्कारोच्चारणाभावप्रसङ्गः। तयोर्वेदविकृतित्वेन शाकल्याद्यृषिप्रणीतत्वात् । [1]वेदघटकपद- घटितत्वादिमात्रेण वेदत्वाङ्गीकारे सर्वेषामपि शब्दानामनन्तवेदघट- कतया लौकिकवाक्येष्वपि तत्त्वापत्तेः । अतस्साक्षाद्वा किञ्चित्परम्परया वा मुख्यतो वेदार्थभूत[2]परब्रह्माधिगमे परिकरभूताङ्गसाहित्यविशिष्टस्य तस्य ग्राहकत्वमावश्यकमेवेत्युक्त-रूपावच्छिन्नोपलक्षकमवश्यं वाच्यम् । क्रमस्यापि पौनःपुन्येन वेदार्थभूतब्रह्मज्ञानहेतुत्वादिनाऽतिशयेन ब्रह्मविद्यात्वम् । अत एव वराहपुराणे **"संहितापाठतः प्रोक्तं द्विगुणं पदपाठतः"** इत्यारभ्य संहितापाठात् पदपाठस्य ततः क्रमपाठस्य द्विगुणितफलहेतुत्वमुक्त्वा **"प्रत्यक्षरं तु लभते गायत्रीशतजं फलम्"** इत्यनेन अत्यन्तं ब्रह्मज्ञानहेतुभूतब्रह्मसूत्राणामतिशयितफलमुक्तमिति।

न च भारतादेरपि ब्रह्माधिगतिहेतुत्वेन ब्रह्मविद्यात्वात् तदादावप्योङ्कारोच्चारणप्रसङ्गस्तत्रापि प्रतिवाक्यमूहप्रसङ्ग इति वाच्यम्। भवदीयतर्कस्य अनिष्टप्रसञ्जना[3]त्मकतानिर्वाहाय भारतादावप्युक्तरीत्या सामान्यतस्सिद्धिं प्रति अपवादभूतस्य भारतादि पारायणकाले ओङ्कारोच्चारणं तदर्थानुसन्धानं च न कार्यमित्यादिप्रमाणस्य त्वयैव वक्तव्यत्वात् ।

भारताद्युच्चारणकाले ओङ्कारोच्चारणं जना न कुर्वन्तीत्येतदेवाचारमूलभूतप्रमाणसाधकमिति चेन्न । महदाचा[4]राभावस्य

---

1. वेदपद क.
2. परब्रह्म. ख.
3. नात्मता. ख.
4. चारस्यासिद्धत्वात्. ख. ग.

तारस्वरूपप्रकाशः

(ओङ्कारोच्चारणाभावपूर्वकपारायणादेः) असिद्धत्वात् ।"यज्ञदानादिकाः क्रियाः । प्रवर्तन्ते विधानोक्ता सततं ब्रह्मवादिनाम्" इत्यनेन ब्रह्मज्ञानिनां तथैवाचारस्य गीतासिद्धत्वाच्च । पामराणामाचाराभावेन शास्त्रप्रामाण्याकरणे पामरैरशक्तैर्जगतीतले धर्मशास्त्रोक्तसाङ्ग[1]कर्माकरणात् कैश्चिन्महद्भिः क्रियमाणस्याप्यनाचारताप्रसङ्गः ।

तर्हि भारतादौ ब्रह्मसूत्रोक्तन्यायेन प्रतिश्लोकमोङ्कारोच्चारणप्रसङ्ग इति चेदिष्टापत्तिरेव । शक्तत्वे तेनाधिकफलस्यैव जननात् । नो चेदादावुच्चारणमात्रेणावान्तरप्रकरणप्रतिपाद्यपरमात्मनि तदर्थानुसन्धान[2]रूपोहेन तत्तदधिकारिभेदसिद्धविशिष्टफलनिर्वाहात् ।

"वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुस्सर्वत्र गीयते ।।"

इत्यादिना भारतादेरपि सर्वत्र ब्रह्मपरत्वात् ।

सूत्रेष्वप्यूहो नामैष एव, यत्प्रतिसूत्रादावनुसन्धानमुच्चारणं वा, शक्ताशक्तादिभेदात् । अत एव यत्र भारतादिप्रवचनस्यैतद्दिवसे [3]विरतिः, तत्र द्वितीयदिवसे तदारम्भकाले मङ्गलाचरणादिश्लाक - पाठेवदोङ्कारोच्चारणमपि कार्यमुत्तरत्र [4]तदर्थानुसन्धानबुध्या पठ्यमान ओङ्कारो [5]वाक्यनिष्ठ[6]वीर्याधायक इत्युक्तम् ।

---

1. साङ्गकर्मकरणात्. क. सहाह्यकरग. ग.
2. रूपोतेन. ख.
3. विरतो. ख.
4. तदर्थानुसन्धा - -द्धया इति क. ग. कोशेपु नास्ति ।
5. वाच्यनिष्ठ. क. ग.
6. वीर्याद्यधायक. ख.

तारस्वरूपप्रकाशः

केचित्तु ब्रह्मशब्दस्य कोशे वेदवाचकत्वेनोक्तावपि तत्र तस्य निरूढ[1] लक्षणैव । मुख्यतोऽनन्य[2]शेषतया परब्रह्मण एव [3]प्रतिपादकत्वेन मुख्यतस्तत्सम्बन्धित्वरूपबीजसत्वात् । तच्छब्दबोध्यतावच्छेदकं च ब्रह्मविद्यात्वमेव । अत एव मुण्डके "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्" इत्यादौ वेदे ब्रह्मविद्यापदप्रयोगः, ब्रह्मविद्यापदयोः, भीमभीमसेनपदयोः विधिविध्युद्देशपदयोः सत्यासत्यभामापदयोरिव चैकार्थकतौचित्यात्। सति गौरवादिबाधके व्याकरणोक्तस्यापि कर्तृत्वविशिष्टे कर्मत्वविशिष्टे च लकार[4] वाचकत्वस्य नैय्यायिकैस्त्यक्तत्वात् ।

एवं नीलादिपदानां "गुणे शुक्लादयः" इति कोशेन बोधिताया अपि नीलविशिष्टादौ शक्तेर्गौरवेणैव परित्यागेन निरूढलक्षणाया एव स्वीकृतत्वाच्च, एवं पीलवादिपदानामपि वृक्षत्वावच्छिन्न एव शक्तेः तज्जन्यत्वं निमित्तीकृत्य फले निरूढलक्षणाया एव स्वीकृतत्वाच्च।

[5]न चार्थादिनानार्थकपदानां द्रव्यत्वावच्छिन्ते लाघ [6]वाच्छक्तिः, प्रयोजनत्वावच्छिन्ने लक्षणाप्रसङ्ग इति वाच्यम् । यत्र लघुधर्मावच्छिन्ने शक्तिः क्लृप्ता, तदीयसाधारणसम्बन्धेन यत्र व्यवहारस्योपपत्तिः, तत्रोक्तरीत्या[7]श्रयणात् ।

यथा रघुयद्वादिपदानां तद्वंश्येषु निरूढलक्षणया "रघूणामन्वयं वक्ष्ये" (र. वं 1/4), "यदवः प्रयातुमीषुः" इत्यादयः काव्येषु भूरिप्रयोगाः।

---

1. लक्षणस्यैव. ख.
2. न्याशेष. ख.
3. प्रतिपाद्यत्वेनेति पाठः साधुरिति भाति
4. वाच्यत्वस्येति पाठः साधुरिति भाति
5. नन्वार्थादि. ख.
6. वशक्तिः ख.
7. श्रवणात्. क.

तारस्वरूपप्रकाशः

न च राघवादिशब्दनामेवेदं रूपं, [1]तद्राजसंज्ञाभावेनाणो लोपाभावात्। प्रकृते वेदत्वस्य शक्यतावच्छेदकत्वे कथं गौरवमिति चेत् ; स्वतन्त्रवक्तृरहितवाक्यत्वरूपापौरुषेयवाक्यत्वात्मकवेदत्वस्य स्वातन्त्र्यघटिततया बहुपदार्थ[2]घटितत्वेन गुरुत्वात् । पदक्रमाद्य-संग्राहकत्वाच्च । न चेष्टापत्तिः । ब्रह्मपदघटितोक्तश्रुत्या तदाद्यन्त-योरोङ्कारोच्चारणाऽसिद्धिप्रसङ्गात् ।

किञ्च ब्रह्मविद्यापदब्रह्मपदाभ्यां ईश्वरावगतिहेतुभूतवाक्यत्वेनैव [3]वेदबोधोऽनुभूयते । अन्यथा नैय्यायिकादीनामपौरुषेयवाक्यान-भ्युपगंतृणामबोधकत्वापत्तेः' । प्रत्यक्षादिप्रमाणमूलकत्वविशिष्ट विप्रलम्भाद्यमूलकवाक्यत्वेन [4]तद्बोधे तत्र विप्रलम्भादिमूलकत्व-सन्देहाहितप्रामाण्य[5]संशयाभावप्रसङ्गात् । तादृशरूपेण वेदादिपदजन्यबोधस्यानुभवविरुद्धत्वाच्च । आनुपूर्वीविशेषाणामनन्तत्वेन दुर्ज्ञेयतया तावद्घटितसमुदायत्वरूपशक्यतावच्छेदकोपस्थित्य - भावाद्वेदब्रह्मादिपदैरभ्रान्तानां मुख्यया वृत्या[6] वेदबोधाभावापत्तेः। अतः **"वेदा ह्येवैनं वेदयन्ति"** इति वाक्यानुसारेण (त. उ. पै. श्रु.) वेदपदेन विशिष्टवस्तुवेदकत्वेन, ब्रह्मब्रह्मविद्यापदाभ्यां च ब्रह्मावगतिसाधनत्वेन बोधो जायत इत्यवश्यमभ्युपेयम् ।

तादृशवाक्यत्वं च वेदे यथा वर्तते [7]तथा तेन ब्रह्मप्रतिपत्तौ जननीयायां अन्तरङ्गतया अनुकूलतया प्रवृत्तेषु ग्रन्थेष्वपि वर्तते इतीतरेषामपि तच्छब्दार्थत्वमेव । **"[8]यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम्** " (त. उ. ब्र. पु.) इति वचनात् ।

---

1. तदासंज्ञाभे. क
2. घटिकत्वेन. ख.
3. विद्याबोधो. क.
4. तद्बाधे. क.
5. संशयप्रसङ्गात्. ग.
6. वेदबाधापत्तेः. क.
7. तथा इति ख. ग. कोशे नास्ति
8. यच्चाविरूद्धमेतस्य. ग.

परं तु [1]तच्छब्दप्रवृत्तिनिमित्तभूतब्रह्मावगतिहेतुता यथा यथा [2]यत्रोत्कृष्टा वर्तते, प्रवृत्तिनिमित्तसाम्येऽपि स तच्छब्दमुख्यार्थ इत्युच्यते, अन्योऽमुख्य इति । यथा 'धनी' 'सुखी' [3]इत्यादीनां महाधनादिमत्स्वेव मुख्यत्वमन्यत्रामुख्यत्वं, लौकिकबुद्धौ पूर्वं प्रतिभासाप्रतिभासाभ्यां वैलक्षण्यात् । तथा 'अस्मिन् ग्रामे धनिन आनेयाः' इति वाक्येन [4]मुख्यामुख्यधनिनां तात्पर्यवशा[5]ज्ज्ञानं, न लक्षणया [6]अल्पधनिनस्तु तात्पर्याभावादेव न भानम् । एवं चात्यन्तवेदोपकारकतया ब्रह्मप्रमितिहेतुभूतस्य पौरुषेयत्वेन किञ्चिदमुख्यब्रह्म[7]विद्यारूपसूत्रस्य, पूर्वोक्तसामान्यन्यायसिद्धतात्पर्यवशाद्वेदस्यार्थ - वादवाक्यस्थब्रह्मशब्देन यथा बोधस्तथैव वृत्या बोधे न किञ्चिद् बाधकम् ।

सुधास्थावान्तरपदं किञ्चिदमुख्येत्यर्थकम् । ब्रह्मशब्दस्य परब्रह्मप्रतिपादकत्वेन वेदे वृत्तिस्तैत्तिरीयभाष्योदाहृतया "- - - **बृहत्वाद् ब्रह्म वेदानां समुदायेऽखिले स्थितः । तत्सम्बन्धाद् वेदराशिर्ब्रह्मशब्देन कथ्यते**"। (तै.भा. १.१४) इत्यादिस्मृत्याऽपि सिध्यति । 'तत्सम्बन्धात्' इत्यस्य तत्प्रतिपादकत्वरूपसम्बन्धस्य स्थितत्वरूपसम्बन्धस्येव [8]तात्पर्य- विषयत्वे बाधकाभावात् । [9] सूत्रभाष्योदाहृतायां "अशब्दमस्पर्शम्" (कठ. ३. २) इति श्रुतौ अशब्दपदस्यास्पर्शादिपदसाहचर्या[10]च्छब्द रूपगुणनिषेधकत्वेऽपि

---

1. तच्छब्देति ख. कोशे. नास्ति
2. यत्रोत्कृष्टतया. ख.
3. ज्ञानि इति खकोशेऽधिकं पठयते ।
4. महाधनादिधनिनां. ख.
5. दृगानं. ग.
6. अत्यल्प. ख.
7. ब्रह्मविद्यात्वव्य. ग.
8. तात्पर्थविषये. ख.
9. यथा - क.
10. शब्दनिषेध. ख.

तारस्वरूपप्रकाशः

वाच्यतासम्बन्धेन शब्दनिषेधकत्वेन प्रकृतोपयोगस्याङ्गीकारस्तद्वदेव प्रकृतम् इत्याहुः ।

इत्थं च पूर्वोक्तरीत्या सुधावाक्य[1]स्वारस्येनैवोहस्य कर्तव्यतायामुपपादकलाभात् । 'अत एव प्रतिसूत्रं ब्रह्मविद्या[2]त्वादोङ्कारस्योहः कर्तव्य इति **जयतीर्थशपथोऽपि निरस्तः**' इत्युक्तिरत्यन्तोन्मा[3]दमूलैव। हेतोरप्युक्तत्वेन शपथरूपत्वाभावात् ।

यदपि - "ब्रह्मशब्दस्य वेदे [4]रूढत्वेन बृंहणादिरूपयोगेन सूत्रपरत्वस्य रथकाराधिकरणन्यायेन विरुद्धत्वात्तथात्वे वा तादृशयोगलभ्येतिहासपुराणादिषु ओङ्कारोच्चारणप्रसङ्गात् । **"यो वेदादौ स्वरः प्रोक्तः** "इति श्रुत्यन्तरेण[5] वेदत्वस्यैव प्रणवोच्चारणव्याप्यतावच्छेदकत्वावगमेन सामान्यतो ब्रह्मशब्दघटित श्रुत्यादयो न सूत्रे प्रणवोच्चारणसाधका"-इति । तदपि सुधाविवरणेनैव निरस्तम्।

ब्रह्मशब्दस्य वेदमात्रपरत्वेऽपि सूत्रादौ तदुच्चारण[6]स्य व्यवस्थापितत्वात् । ब्रह्मशब्दस्य सूत्रसाधारणरूपावच्छिन्न[7]परताया अपि व्यवस्थापितत्वात् । तत्पक्षे भारतादिप्रतिबन्दीपरिहास्येष्टापत्त्या निपुणं व्यवस्थापितत्वात् । "यो वेदादौ" इति त्वदुक्तेरत्यन्तं [8]निरभिप्रायकत्वस्योक्तत्वेन तद्वाक्येन वेदोच्चारणस्य प्रणवोच्चारण-

---

1. स्वरेसेनैव. ख.
2. त्वदाद्यन्तयोरोङ्कार. ख.
3. मूलिकैव. क.
4. रूढत्वे. ग.
5. वेदत्वस्यैव इति पदं क कोशे नोपलभ्यते
6. स्याव्यव. ग.
7. परतया. क.
8. निर्विपयकत्वस्यो. ग.

व्याप्यतासिद्धेः सुदूरपराहतत्वात् ।

यदपि "ओमिति ब्रह्मणः प्रवक्ष्यन्नाह" (तै.उ. १.१९) इति वाक्यं सूत्रादावोङ्कारोच्चारणे मानमित्याशङ्क्य ब्रह्मब्राह्मणशब्दयोर्वेदतद- ध्येतृ[1] वाचित्वेन ब्रह्मपदस्य सूत्रपरत्वाभावान्नेयं श्रुतिस्तत्र मानमिति। तदपि [2]न । वेदानुसन्धानोच्चारणान्यतरपूर्वकं ब्रह्मसूत्रार्थानुसन्धान-पूर्वकतत्पाठस्य वेदप्रवचनात्मकत्वादेव तदादावोङ्कारोच्चारणसिध्दे-रुक्तत्वेन तत्र लक्षणाप्रसक्त्यभावात् ।

किञ्च रथकाराधिकरणनिर्भरवतस्तव [3]ब्राह्मणशब्दो [4]रूढ्या ब्राह्मणत्वजात्यवच्छिन्नवाच्यमेव । एवं 'प्रवक्ष्यन्' इत्यत्र धातुः प्रवचन-सामान्यपर एव । "ऋतं च स्वाध्यायप्रवचने च" (तै.उ.१.२०) इत्यादौ प्रवचन- सामान्यस्यैव बहुशो गृहीतत्वाच्च । दुश्शास्त्रप्रवचनस्य तदाभासत्वेन तद्रूपत्वाभावात् । "ब्रह्मैवोपाप्नुवानि" इत्युत्तरवाक्यानुसारेण प्रशब्देन ब्रह्मप्राप्तिहेतुत्वरूपप्रकर्षाभिधायकेन [5]विशिष्टप्रवचनत्वरूपसामान्यधर्मपुरस्कारेण समग्र[6]वेदावान्तरवेद - प्रवचनयोरिव समग्रसूत्रावान्तरसूत्रप्रवचनयोरपि लाभात्तदादा - वोङ्कारोच्चारणमकामेनाप्यङ्गीकार्यम्। अन्यथा[7]वेदप्रवचनमात्रपरत्वे लक्षकत्वापत्तेः। ब्राह्मणपदस्य वेदाध्येतृवाचकत्वेप्युक्तार्थाऽहानिरेव। तस्यानधिकारिव्यावृत्त्यर्थमुपात्तत्वेन तत्समभिव्याहाराद्वेदप्रवचनस्यैव लाभ [8]इत्यर्थस्यासिद्धेः । इत्थं चैतद्वाक्यस्यान्यैरप्येवमनुष्ठेयमिति

1. वाचिब्रह्मपदस्य. ग.
2. नेति क कोशे नास्ति ।
3. ब्रह्मण. ख.
4. रूढयेति क कोशे नास्ति.
5. विशेष्य. ग.
6. वेदान्तर. क.
7. वेदेति गकोशे नास्ति.
8. इत्यस्यार्थस्य. ख.

तारस्वरूपप्रकाशः

बोधनाय पूर्वाचारानुवादकतया तस्यापि निर्मूलत्वायोगेन तन्मूलतया 'स्रवत्यनोङ्कृतं" इति श्रुतिरेव[1] वक्तव्या । अन्यथा दृष्टहान्यदृष्टकल्पनाप्रसङ्गात् । इत्थं च [2]तव वेद-तदनुबन्धिग्रन्थसम्बन्धि[3]पारायणप्रवचनादिकं ग्राह्यमेवेत्यभिम-तार्थसिद्धिर्निर्ष्प्रत्यूहैव । आचारबोधकवाक्य उत्तरत्रोङ्कारोच्चारण-स्यानुक्तावपि न क्षतिः । सर्वं वक्तव्यमिति नियमाभावात् । यदपि वेदशब्दस्य सेतिकर्तव्य[4]ताकत्वविशिष्टवेदवाचकत्वाशङ्कनं, मीमांसायाः पूर्वमेव तत्र वेदशब्दस्य बहुशः [5]प्रयोगदर्शनेन तन्निराकरणं च, तदस्मदनुक्तोपालम्भनरूपमेव ।

यदपि - "उच्चैः [6]प्रावर्ग्येण चरन्ति अवभृतेन चरन्ति" इत्यादिस्थले उच्चैस्त्वादेरङ्गाङ्ग्युभयान्वयस्य तान्त्रिकैर्व्यवस्थापितत्वेन [7]तद्वदिहाप्योङ्कारस्येतिकर्तव्यतात्मकमीमांसाशास्त्ररूपाङ्गवेदरूपा-ङ्ग्युभयानुबन्धित्वमाशङ्क्य "वैषम्यात्" इत्यादिग्रन्थेन 'युक्तं तत्रोच्चैस्त्वादेरुभयाङ्गत्वं, 'प्रावर्ग्येण' इत्यादितृतीयाश्रुत्या प्रावर्ग्यादिकरणकत्वविशिष्टस्याङ्गिनो विधानात् । न चेह तथा "यया तदक्षरमधिगम्यते" इत्यक्षराधिगमभाव्यकपरविद्याकरणकभावना न्वयितयोङ्कारो विधीयते । किन्तु "काम्या इष्टयस्ता उपांशु कर्तव्याः"

---

1. मूलभूता इति क. ख. कोशेषु पाठ्यते
2. तवेति ख. कोशे नास्ति
3. करणाय ख.
4. ताकवि. क.
5. प्रत्ययदर्शनेन. ग. प्रयोगादर्शने. क.
6. प्रवर्ग्यैण. क.
7. तदिहा.ग.

इत्यत्रो[1]पांशुत्ववन्नाङ्गान्वयं लभत इत्याद्यभिहितं, तदस्माभिः "**यया तदक्षरमधिगम्यते**" (आथ.1.4.) इति वाक्यस्य विधाय[2]कत्वेनानङ्गीकारात्तत्र विधिप्रत्ययाश्रवणेन विधायकत्वाप्रसक्त्या चात्यन्तासम्बध्दम् । 'स्रवति' इति वाक्यस्यैवोङ्कारोच्चारण-प्रापकत्वाङ्गीकारात् । न च तद्वाक्यं ओङ्कारं वेद[3]स्वरूपमात्र-सम्बन्धितया प्रतिपादयतीति वाच्यम् । उक्तोत्तरत्वात् ।

किञ्च 'ब्रह्म वेदस्तपस्तत्वं' इति कोशमवलम्ब्य हि त्वया ब्रह्मशब्दो वेदपरो न सूत्रपर इत्युच्यते । तत्रैव कोशे ब्रह्मशब्दस्य [4]तपस्यपि शक्तेरुक्तत्वेन "स्रवति" इत्यादिवाक्यं तपःपरं किं न स्यात् ।

न च "ब्रह्मणः प्रणवं कुर्यादादावन्ते च" इत्ये[5]तच्छिक्षावाक्यं वेदप्रकरण एव पठितमिति प्रकरणवशाद्वेद एव ग्राह्यमिति वाच्यम्। मनुस्मृतौ ब्राह्मणसम्बन्ध्याचारकथनप्रस्ताव एवैतद्वचनस्य सत्वेन तपसोऽपि ग्रहणस्य युक्तत्वात् । तावतापि किमायातमिति चेन्न। "**स्वाध्यायप्रवचन एवेति नाको मौद्गल्यः, तद्धि तपस्तद्धि तपः**" (तै.उ.प्र.व.1.4.) इति द्विरुक्त्याऽऽदरपूर्वकं [6]वेदाध्ययनपाठादिरूपस्वाध्यायस्य तदर्थकथनरूपप्रवचनस्य च तपस्त्वोक्तेः, द्विवचनेन प्रक्रान्तयोरपि स्वाध्यायप्रवचनयोः स्वाध्यायप्रवचनात्मक[7]कर्मत्वरूपेण बुद्धिस्थेन सामान्यरूपेण [8]एकीकृत्य परामर्शात् 'तत्' इत्येकवचनोपपत्तिः। उक्तं च

1. उपांशुवन्ना. क.
2. कत्वे. ग.
3. वेदमात्र. ग.
4. तमस्यपि. क.
5. तच्छिखा. क.
6. वेदाध्ययनपाठादिरूपस्वाध्यायस्येति ग कोशे नास्ति.
7. कर्मस्वरूपेः क.
8. एकत्र

तारस्वरूपप्रकाशः

तैत्तिरीयभाष्योदाहृतस्मृतौ -

"स्वाध्याये च प्रवचने ह्यन्तर्भावो विशिष्यते ।
सर्वकर्मसु कर्तव्यौ सर्वकर्मात्मकौ हि तौ" इति ।(तै.भा. १.२२)

इत्थं च 'स्रवति' इति वाक्ये वेदमात्रग्रहणे विनिगमनाविरहात्तपसोऽपि ग्रहणे प्राप्ते, ब्रह्मशब्दस्य वेदत्वावच्छिन्नपरत्वे तपसो [1]लाभाभावप्रसङ्गः ।

किञ्च 'अनोङ्कृतम्' इत्यस्यो[2]ङ्कारकरणरहितमित्यर्थः । तथा चोङ्कारराहित्यस्य [3]वेदे सर्वदा विद्यमानत्वात् सर्वदा वेदस्य स्रवणविशरणादिना निर्वीर्यत्वापत्तिः । वेदानामेकत्वेनैकपुरुषोच्चारणाभावकालेऽपि पुरुषान्तरसम्बध्युच्चार[4]णसत्वेनानोङ्कृतत्वं नास्तीत्यङ्गीकारे ओङ्कारोच्चारणमकृत्वाऽपि वेदपाठादिनाऽपूर्वोत्पत्तिप्रसङ्गः, पुरुषान्तरोच्चारणस्य सत्वात् । अतो ब्रह्मशब्दस्य पठ्यमानत्वविशिष्टवेदत्वावच्छिन्ने लक्षणा; अनोङ्कृतत्वं सामर्थ्याद्विशेषणीभूतपाठेऽन्वेति । अनोङ्कृतपदस्य ओङ्कारोच्चारण- पूर्वक[5]पाठाविषयत्वावच्छिन्ने लक्षणा वेति वक्तव्यम् । अतोऽर्थवाद- स्थशिक्षा[6]वाक्यस्थं ब्रह्मपदं तपस्त्वावच्छिन्नपरमेव । अत एव श्रुतिशेषे 'अनोङ्कृतमासुरं कर्म' इति कर्मसामान्यग्रहणं पूर्वोक्त, ब्रह्मपदार्थस्य विवरणरूपतया श्लिष्टम् ।

'यज्ञदानादिकाः क्रियाः । प्रवर्तन्त' (भ.गी.17.25.) इति गीताप्युक्तार्थे संवादिनी भवति । तथा च तपस्त्वेन

---

1. लाभाप्रसङ्गः क.
2. ङ्कारकारण. ख. उ तथा क. ख. ग.
3. वेदपाठेन
4. णासत्वे क.
5. पाठविषय. क.
6. वाक्यस्य. ग.

तारस्वरूपप्रकाशः

स्वाध्यायपदोक्त[1]वेदपाठस्य प्रवचनपदेनोक्तरीत्या सूत्रप्रवचनादेश्च लाभादभिमतार्थसिद्धिः। श्रुतौ[2]स्वाध्यायपदं तत्पठनपरमेव। न तु वेदपरम्। तथात्वेऽन्तेवासिनं प्रति [3]कर्तव्यत्वेन तदुपदेशानुपपत्तेः। इत्थं च 'अनोङ्कृतं ब्रह्म' इति श्लिष्टमेव भवति। न तु ब्रह्मपदस्य [4]वेदवाचकत्वपक्षे। पूर्वोक्तान्यतरपदलक्षणादोषश्च।

न चैवं जैमिन्यादिसूत्रव्याकरणसूत्रादिप्रवचनस्यापि लाभेन तत्राप्योङ्कारोच्चारणप्रसङ्ग इति वाच्यम्। तेषामपि परम्परया ब्रह्मप्रतीत्युद्देश्येनैव ऋषिभिः प्रणीतत्वेन तेषामप्यमुख्यविद्यात्वस्य भारतादाविवोक्तरीत्या इष्टत्वात्। अत एव सुधायामेतल्लाभायै-वावान्तरब्रह्मविद्यात्वमुक्त्वा ओङ्कारस्योहः कर्तव्य इत्युक्तम्। तथा च त्वदभिमत[5]कोशप्राप्तशक्तिबलेनाप्याद्यन्तयोरोङ्कारो-च्चारणसिद्धेस्त्वदा[6]ग्रहो अयुक्त एव।

नन्वेवं तर्हि वेदपरत्वं ब्रह्मशब्दस्य स्वीकृत्य भवदुक्तपूर्वव्या-ख्यानमसङ्गतम्। अन्यतर[7]पदलक्षणारूपदोषस्य भवदुक्तस्यैव, सत्वादिति चेन्न। वेदतपसोर्ब्रह्मशब्दवाच्यत्वसाम्येऽपि तपोऽपेक्षया वेदे प्रयोगबाहु[8]ल्यस्वारस्यं "अनोङ्कृतमासुरं कर्म" इति श्रुतौ कर्मशब्दस्य पूर्वोक्तब्रह्मशब्दार्थविवरणत्वापेक्षया भिन्नार्थकत्वे स्वारस्यं चाभिप्रेत्योक्तलक्षणाया निरूढत्वमभिप्रेत्य पूर्वं व्याख्यातम्। तथात्वेऽपि गीताद्युक्तस्य सर्वस्यानुकूलनात्। इदानीं तु गीताद्युक्त [9]सर्वसङ्ग्रहा-भावदोषसाहित्येनान्यतरलक्षणारूपदोष प्राबल्यमभिप्रेत्याग्रहस्त्याजित

---

1. वेदपाठस्येति ग कोशे नास्ति
2. साधुप. क.
3. कर्तव्यत्वेन इति ग. कोशे नास्ति
4. वेदावाच्य. ग.
5. कोशप्राप्तेति क कोशे नास्ति
6. स्त्रहेऽयुक्तेव. क.
7. वादलक्षणा. क.
8. त्यात्स्कार. ग.
9. सङ्ग्रहदोषरा. क.

तारस्वरूपप्रकाशः

इत्यदोषात् ।

न चैवमपि ब्रह्मसूत्राणामाद्यन्तयोरोङ्कारोच्चारणं कार्यमिति स्फुटप्रमाणाभावात् पूर्वोक्त[1]सामर्थ्यरूपार्थापत्त्या नैषोऽर्थः सिध्यतीति वाच्यम् । अर्थापत्त्या सेत्स्यमानोऽर्थः स्पष्टप्रमाणं विना न सिध्यतीत्यङ्गीकारे तेनैवास्या गतार्थतापत्त्या तस्याः स्वतन्त्र-प्रमाणत्वाभावेन तदुपन्यासानर्थक्यापत्तेः । किन्तु सकल [2]प्रमाणविरोधाभावमात्रमपेक्षितम् । स च प्रकृतेऽस्तीत्युक्तप्रमेय-सिद्धेरावश्यकत्वात् । अन्यथा भवन्मतेऽपि सर्वे [3]मुक्ता समानानन्दा इति स्पष्टप्रमाणाभावेन "**परमं साम्यमुपैति**" (आथ.१.३.३) इत्यस्पष्टप्रमाणमवलम्ब्य लोकसिद्धं परस्परेर्ष्याद्याभावरूपं न्यायमनुसृत्य तत्साधनस्य, एवं ब्रह्मणि भिन्नोऽभिन्नश्च द्वौ आनन्दौ वर्तेते इति स्पष्टप्रमाणाभावेऽपि "**आनन्दं ब्रह्म**" "**ब्रह्मण आनन्दः**" (तै. ब्र. व.) [4]इत्युभयव्यवहारान्यथानुपपत्त्या तादृशानन्दद्वयसाधनस्य चासांगत्या-पत्तिः । परं तु भवत्साधनस्य बहुतरप्रबलप्रमाणविरोधो नास्मदीयस्येत्येव[5] वैषम्यम् ।

यद्यपि "**अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरुदहत्**" इति वेद[6]त्रयोपादानकोच्चारणविषयत्वेन "**ओङ्कारप्रभवाः वेदाः**" इत्यादावोङ्कारस्य वेदमूलत्वेनावगतस्य तदा-द्यन्तोच्चारणमेव युक्तं, न तु सूत्राद्यन्तोच्चारणम्" इति । तन्न । वेदानामोङ्कारादुत्पन्नत्वं नाम न जन्यत्वं, द्वयोरप्यनादित्वात् । किन्तु

1. क्तार्थापत्त्या. क.
2. प्रवलमान. क.
3. मुक्ता. ग.
4. इत्युभयाथाव्य. ख.
5. विषमम्. ग.
6. त्रयापादा. क.

तद्व्याख्यानात्मकत्वमेव । तच्च वेदव्याख्यानात्मकसूत्राणामप्यस्तीति तत्रापि तदुच्चारणस्यावश्यकत्वात् ।

(ब्रह्ममीमांसाशास्त्रस्य परविद्यात्वाभावशङ्कानिरासः)

यदपि "स ब्रह्मविद्यां" इत्यत्र ब्रह्मसूत्राणामपि ब्रह्मविद्याशब्दबोध्यत्वादिकं प्रसक्ता[1]नुप्रसक्त्याऽऽशङ्क्य ब्रह्ममीमांसाया वेदेतिकर्तव्यतारूपाया न ब्रह्मज्ञानकरणत्वरूपं ब्रह्मविद्यात्वं करणत्वेतिकर्तव्यतात्वयोर्भावनाया अंशत्रयवत्वव्याघातेनैकस्मिन् [2]समावेशाऽयोगात् । करणेतिकर्तव्यतयोः समप्रधान[3]भावापाताच्च । प्रयाजादीनामपि करणत्वापत्तेश्च । तथा च वेदेतिकर्तव्यतारूपाया मीमांसायाः वेद[4]भाव्यज्ञानं प्रति करणत्वाभावात्कथं ब्रह्ममीमांसाशास्त्रस्य ब्रह्मविद्यात्वमित्युक्तम् ।

तत्रेदं वक्तव्यम् - करणत्वं द्विविधमुक्तं प्राचीनैः व्यापारवत्कारणत्वमेकं, अपरं फलायो[5]गव्यवच्छिन्नत्वम् । द्वितीयलक्षणस्येत्थं निष्कर्षः कर्तव्यः । स्ववृत्तियादृशरूपावच्छिन्नक्षणाव्यवहितोत्तरक्षणत्वं कार्योत्पत्त्यधिकरणत्वव्याप्यं तादृशरूपावच्छिन्नत्वमिति । अन्यथा [6]आलोकाद्यसमवधानकाले केवलचक्षुषा घटसंयुक्तचक्षुषा वा कार्याजननात्तत्राव्याप्तेः ।

अव्यावर्तकपदार्थघटितसमुदायत्वस्यापि तथात्वे तत्तदाश्रयेषु करणत्ववारणाय, यद्यद्रूपावच्छिन्नघटितसमुदायत्वं प्रकृतकार्योत्पत्तिप्रयोजकतावच्छेदकतावच्छेदकं तत्तद्रूपावच्छिन्नसमुदाय-

---

1. क्तान प्रयुक्ता. ग.
2. रामावेशयोगात्.क.
3. भावः च. क.
4. भाष्याज्ञानं. ग.
5. योगाव्य. ग.
6. लोकासमवायि. क.

त्वघटकतावच्छेकरूपावच्छिन्नं करणमिति निष्कर्षः कार्यः । कालादृष्टादीनां सामान्यकारणानामव्यावर्तकानां तादृशसमुदाय-कोट्यप्रविष्टत्वान्न तेषां करणत्वम् । तेषामपि करणत्वानङ्गीकारश्च प्राचां "करणं [1]साधकतमं" इति कोशमवलम्ब्य । तत्र तमपा साधारणकारणव्यावर्तनात् । इत्थं [2]चालोकादेरपि करणत्वं दुर्वार मेव। तेषामपि तादृशसमुदायान्तःपातित्वात् ।

व्यापार[3]वत्कारणं करणमिति पक्षे आलोकस्यापि स्वसंयोग-रूपव्यापारवत्वात् । न चैवं "चक्षुषा घटं पश्यति" इति प्रयोगवत्, "आलोकेन घटं [4]पश्यतीति प्रयोगप्रसङ्गः । हेतुतृतीयाघटिततादृशप्रयोगस्य सर्वैरप्यङ्गीकर्तव्यतया इयं तृतीया हेतावेव न करण इत्यत्र नियामकाभावेनेष्टापत्तेः । अत आलोकस्यापि करणत्वापत्तिरिति त्वदुक्तिरसमञ्जसैव । अत एव सुधायां पिपीलिकालिपेरपि [5]मनसाक्षरस्मृतौ जननीयायां संस्कारस्य व्यापा-रतया [6]तदुद्बोधहेतुत्वेन स्मृतिरूपप्रमासामग्रीघटकत्वात्प्रामा-ण्यमित्युक्तं, "पिपीलिकालिपिश्चापि प्रमाणमविरोधतः" इत्यनुव्याख्यानव्याख्यावसरे । इदमुपपादितं च तट्टिप्पणीषु [7]श्रीमद्यादवाचार्यप्रभृतिभिस्तत्रैवानुसन्धेयम् ।

किञ्च चैत्रेण तुषैर्मैत्रेण काष्ठैः क्रियमाणे एकस्मिन् पाके सति तत्पाकतात्पर्येण, 'मैत्रस्तुषैः पचति' इति प्रयोगवारणाय समभिव्या-

---

1. साधकमिति. ख.
2. लोकादे. ख.
3. त्करणं कारणं. क.
4. पश्येति. क.
5. मानसस्मृतौ. ग.
6. तद्बोध. क.
7. यदि वाचा. ख.

हृतकर्तृव्यापाराधीनत्वं तृतीयार्थ[1]करणघटकव्यापारे प्रतीयत इत्यभ्युपेयम् । एवं च चक्षुर्व्यापारे पुरुषाधीनत्वमिव नालोकव्यापार इति तत्समकक्ष्यतया न मुख्यः प्रयोगः । न ह्येतावता आलोकस्य करणत्वं केनापि वारयितुं शक्यते । [2]यत्कार्यनिर्वाहाय यत्प्रथ ममपेक्ष्यते तत्प्रधानं, तत्सहकारितयाऽनन्तरमपेक्षमाणम् अप्रधानम्। तथाप्यप्रधानं करणं भवत्येव । यथा घटादिकं प्रति मृदादिकमेव[3]प्रधानसाधनं, उत्सर्गतः प्रथमतोऽपेक्षितत्वात् । [4]तत्सिध्यनन्तरमेव घटोत्पत्त्यर्थं दण्डादयोप्यपेक्षिता अप्यप्रधानकरणानि भवन्त्येव । नत्वकारणानि दण्डादयो मृद इतिकर्तव्यतारूपा भवन्ति । कपालसंयोगादि[5] रूपव्यापारद्वारा कारणतया करणभूतमृदि तादृशसंयोगादिरूपातिशयाधायकत्वात्। प्रधाननिष्ठप्रकृत[6] कार्योपधायकतानिर्वाहकतातिशयाधायकस्यैवेतिकर्तव्यतात्वात्' । एवं चालोकस्य चक्षुषि स्वसंयोगावच्छेदकदेशावच्छिन्नसंयोगसम्पादकतयेति कर्तव्यतारूपत्वमपि । एवमन्यत्रापि यथायथं द्रष्टव्यम् । एतदेवाभिप्रेत्य, 'न हि बीजादेरङ्कुरादिकं जनयस्सह[7]कारिभूतस्य क्षितिसलिलादेरङ्कुरादिकं कार्यं न' इत्यादिनेतिकर्तव्यताया अपि (करणकोटौ) निवेशः सुधायां समर्थितः।

एवं वेदेन ब्रह्मज्ञाने जननीये वेदनिष्ठं यच्छक्ति[8]तात्पर्यज्ञानविषयत्वरूपातिशायनं ; तन्निर्वाहिका मीमांसाऽपि तात्पर्यज्ञानरूपव्यापारजननद्वारा ब्रह्मावबोधे करणं भवत्येव । परं तु वेदापेक्षया साऽप्रधानसाधनम् । अत एव, 'असम्भावना-

---

1. करणक. क.
2. तत्कार्य. क. ग.
3. प्रमासाधनं. क. ग.
4. तच्छुद्ध्यनन्तर. ख.
5. रूपाव्यापार. ख.
6. कार्येऽपिधा. ख.
7. कारिणः. ग.
8. तात्पर्यविषयत्व. क.